एवं चूडाद्युन्मुखस्य प्रतिग्रहीतुर्मरणेऽपि पुत्रत्वमेव न तदुन्मुखत्वं च
न तत्करिष्यामीत्याकारिका इच्छा एव चाङ्गेयाः इत्यानुभविकः यथाः एवा
दर्शनीयः अन्यथा नादृशप्रतिग्रहीतुर्मरणे तस्य पुत्रत्वासिद्ध्या ऽ
श्रानुष्पुत्रेण तद्धनग्रहणानुच्छेदं न र कृत चूडत्वेन पुत्रत्वसिद्धौ पुत्रस्य
निर्धनत्वापत्तिः तदानीमेव अशौचाभावेन स्वचूडां कृत्वा अग्निदाना
पत्तिश्च स्यत्तुभव विरोधः स्यात् अथ पार्वणे मातामहपदोल्लेखे
न कस्य पिण्डं दद्यात् अत्र केचित् यथा पत्न्या सह हूयते न पित्रा गृह्यते तस्
स्या एव पत्तिः इत्यत्रानुपपत्तिः पत्नीविरहिणा गृहीतस्य मातामहस्या
नुपपत्तिः पत्नीविरहिणा गृहीतस्य मातामहस्यानुपपत्तिः न च पत्नि
विरहिणो गार्हस्थ्याश्रमविरहिणो गार्हस्थ्यप्रकरणोक्तं पुत्रकरणं न सं
गच्छते इति वाच्यं प्रमाणाभावात् अत एव भार्यासहभावेन वनं प्रस्थित
स्य पाण्डोः क्षेत्रजपुत्रकरणं भारते श्रूयते अत एव व्यासादीनां अकृत
विवाहानां शुकदेवादिरूपपुत्रोत्पत्तिश्च श्रूयते अकृतोद्वाहकस्य मृतप
त्नीकस्य त्यक्तपत्नीकस्य वा एवं यस्य दैवात् विवाहो न भवति अगत्यासो
ऽसंपूर्णसंस्कारको नाश्रमी वास्तु दत्तकपुत्रप्रकरणसमवधानसत्त्वेऽपि
तस्य पुत्रत्वं अनुभवविरुद्धं हेयं अत्र ह्यभार्यापत्नीभ्यां युक्तेन ग्रहणे माता
महपक्षद्वयं स्यादिति अत्र समारधे मातामहानां स्यादेहत्वेऽपि भिन्ना
नामेव श्राद्धे वनात्वमाहरणीयं वाक्योल्लेखश्च अमुकगोत्र मातामह अ
मुकदेवशर्म्मन् अमुकदेवशर्म्मन् एतेष्वपि दद्यादित्यादि द्विपितृकस्य क्षेत्रजा
दिवत् इति केचित् पितृत्वेमासार्थे पुंसामेव पुत्र अवश्यकः अत एव मन्द
पाल ऋषेः स्वर्गं प्रियासत्तः अपुत्रत्वेन पितृलोकानुचरैर्वारितस्य शीघ्रं
पुत्रप्राप्त्यर्थं पक्षियोनिः स्वीकारः एवमन्यस्य च जरत्कारुप्रभृतेः
संसारः पुत्रार्थं भार्यापरिग्रहणादिकं च महाभारतादौ न तु क्वचित् स्त्रिया अ
त एव पार्वणेऽपि तत्पक्षस्याश्राद्धेऽवश्यकत्वे पुत्रस्य न तु मातामहश्राद्ध
करणे एवं निन्दा तस्याश्च विकृतपार्वणे दौ मातामहपक्षविनाकृत
श्राद्धे वकृत्यपक्षश्राद्धसिद्धौ मातामहश्राद्धार्थं नानुष्ठानं इति स्मार्त्तेभ
दृष्टार्थीरिभिस्तत्संसे गच्छते अत एव क्वचिद्विधवास्वाम्यनुमतिं विनाधर्म्म
कार्यं कुर्वन्त्यपि न रनकं कर्त्तुमर्हतीति न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा इति व
शिष्ठवचनात् मर्त्तुराज्ञासत्त्वेन सेत्रजवत् भर्त्तुरेव दत्तकं पुत्रं कुर्य्यात्

अन्यथा भर्त्रनुज्ञां विना भर्त्तुः पुत्रो मा भवतु स्वश्राद्धाद्यधिकारा
र्थं स्वपुत्रो भवतु इत्यपि शास्त्रे वक्तुं युक्तं स्यात् तदत्तकः पुत्रो न मातुः
किंतु पितुरेव ननु तर्हि मातुस्त्यागस्य किं प्रयोजनमिति चेत्त्र रत्नाक
रमतेन किमपि तदृष्टमेवस्य नैमित्तिकोऽभ्यत्यागपक्षेपि मुनिवचनेपर्य्य
नुयोगोऽभावः तन्त्र मूलं एकः पिता अपरस्य पत्नी माता दत्तस्यनेष्यते इ
ति योऽनर्भिविशेषस्तत्तु अधर्म्मजस्य तथाभावं केचिदिच्छन्ति शूल
पाणिप्रभृतयस्तु तस्यापि तथाभावं नेच्छन्तीति तस्मात्सगुणैर्वीदिनोद
त्तकस्य मातृपक्षे मातुः परितत्व इव पितामह्यादिश्राद्धमेव कर्त्तव्यः
मातुर्हीनं श्राद्धं पत्नीपुत्रवदधिकरोतीति नीतिसिद्धान्तः इति तन्न असद्दा
यपारिज्ञानात् यकरत्वणेश्वरादिभिः सपत्नीपुत्रसत्वे क्षेत्रजादिपुत्रक
रणे निषेधकथने न सपत्नीपुत्राभावे भर्त्रनुज्ञासत्वे दत्तककरणस्य फ
लतोऽभ्युपगतत्वादिति मातामहपक्षस्तु जनन्याः पितृपक्ष एव मातामा
हपक्षस्तु सर्वसाधारण एव युक्त इति श्राद्धचिन्तामणिदर्शनादाहुः
पितामहचरणाः तत्राशयं वदन्ति च पितुस्त्यागेन पितरोर्द्दैहिकक्कि
पाकस्थगोत्रसम्बन्धध्वंसः मातुस्त्यागेनापि तस्या एव तत्कस्थगोत्रस
म्बन्धध्वंसः जननीपितुस्तु त्यागाभावात् तदीयश्राद्धतत्कस्यसम्बन्धध्वं
सकत्वं भवति नहि मातामहश्राद्धं स्वत्वनिमित्तकं दौहित्रे मातामहस्व
त्वाभावात् किंतु तज्जन्यदुहितृजन्यत्वनिमित्तकं तच्चात्राणपायमेव
न त्वेवं मातापितृजन्यत्वमपि अव्याहतमेवेति तयोरपि श्राद्धं करोत्व
सौ इति चेत् मातापितृश्राद्धाद्यधिकारित्वे न जन्यत्वमात्रेण किंतु पुत्रत्वे
न स्यात्तच जन्यत्वसत्वेऽपि पुत्रत्वं नास्ति पुत्राणां मध्येऽगणनात् औरस
त्वस्याणां सत्वेऽपि शास्त्रवचनात् क्वाचतेरावश्यकत्वात् पुत्राणां परिभावि
तानां मेव श्राद्धाद्यधिकारित्वात् न त्वेवं जनकस्याप्यपेयं धनं गृह्णी तु श्राद्ध
तु करोतु पुत्राणामिव पौत्राणां परिभाषणाभावेन पुत्रजन्यत्वस्यैव पौत्र
लक्षणत्वात् इति चेत्तु पुत्रजन्यो न पौत्रः अपि तु पुत्र एव अन्यथा पुत्रद
त्तकस्य पौत्रत्वं न स्यात् दृष्टा पत्नौ च भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंश
कराः स्मृताः इति ब्रह्मपुराणवचनविरोधः नहि यः पुत्रस्य पुत्रः स पौत्र
न भवति अथ च पितामहवंशकरः इति वक्तुं युज्यते अथ पृथग्वंशक
रा इत्यस्य पितृवंशकरा इत्येवार्थः ननु पितामहवंशकरा इति चेत् गंगा ८२

श्लोकाः २५

प्रवाहवत् अविच्छिन्नवंशाः पितुरेव न पितामहस्येत्यनुभवासिद्धं
अस्तु वा तथैव परिभिन्नगोत्रत्वं संगच्छते न तथा हि भिन्नगोत्रा इत्यस्या
र्थः भिन्नस्य जनककुलभिन्नस्य अर्थात् प्रतिग्रहीतुर्यो गोत्रकारी मुनिः का
श्यपादिः स एव गोत्रकरी वंशधारामूलीभूतस्तेन स्मृतिबोधिता येषां ते
न तथान्नयाच्चयद्दृशाशिडत्वमा गोत्रजः काश्यपगोत्रेण गृहीतः स एव गृही
तृपितुः पौत्रो न भवति तदा तु न वंशधारामूलीभूतः काश्यपो न भवे
त् एवं पृथक् पिण्डा इत्यस्य वाक्यो ऽर्थः जनितावत् पृथक् जनककुलभिन्ने पि
ण्डदेया येषां इति तथा सति सर्वेषामेव मातृमातामहपितामहपितृ
महादिपिण्डदातृत्वेन पृथक् पिण्डत्वापत्तेः तस्मात् पिण्डपदेन तत्स
पिण्डत्वसत्तीर्थ्यं तथा च पृथक् जनककुलक्रमेण सत्तापिण्ड्यमासीत् तत्
च्छिन्नं सापिण्ड्यं येषां ते तथा तथा च जनककुलक्रमं परित्यज्य गृहीतृक्रमे
णैव यावत्सापिण्ड्यदानलाभः एवमपि पितामहस्य तद्दत्तपिण्डभोक्तृ
त्वमायातं अथवा पिण्डा इति पदं प्राप्तपितृलोकगणपरं तथापि पृ
थक्त्वेन सापिण्ड्यं आयाति पृथक् पिण्डाः पितृगणो येषां इति व्युत्पत्तेः
प्राप्तानुत्पुत्रस्य दत्तकत्वकल्पे पितृगृहीतृगणप्रवेशात् तद्गणस्य पार्थक्यं
गवाजगणात् गोमेषगणस्य पार्थक्यवत् इति न च मातामहपरत्वा
भ्यतमस्य कथं मातृपितुरेव मातामहपरत्वाभावात् अयं च न मातुः
मातामहघटकीभूतमातृपरे जनन्या एवाभिधानात् त्वमातुर्मरणेन
तादृशसम्बन्धध्वंसेपि मातृपदे सत्त्वेन श्राद्धविधानात् ननु मातरि
मृतायां स पुत्रो दत्तः न च पितृहीनात् तत्सम्बन्धनिबन्धनस्यार्हेत्कु
प्यन्ति च न स दानविक्रयत्यागेषु मातापितरौ प्रभवतः इति वशिष्ठः
स्मृतेः तु द्वयोरेव दानत्वबोधनात् मृतमातृकश्चामदेय एव अन्यथा
मृतपितृकोऽप्यन्यत्रादीयतामिति वाच्यं न स्त्री रघारिति परवाक्येन
भर्त्रनुमतिं विना स्त्रीकर्तृकदानस्य विशेषतो निषेधेन पुंस्कर्तृकदा
ने स्त्रीसत्त्वे एव स्त्रीसत्त्वे एव स्त्रीसहकारबोधनात् असत्त्वे तु केव
लपित्रा दानेपि तस्याभावात् इति चेदिष्टापत्तिः वस्तुतस्तु मृतमातृकः
पुत्रो न देयः एव एकः पिता अपरस्य पत्नी माता इत्यनुभवविरोधः
श्चेत् तस्मात् सहकारेण दानसमकालं तदा च पितृत्वादृशानुभवविरोध
वर्तनेऽपि चेति मातृहीनाऽवश्यकत्वात् इति केचिद्वदन्ति चण्डेश्वरस्तु

मातापितरौ इत्यत्र द्वन्द्वान्तपरपूर्वी वाच्यः श्रूयते स समस्तप्रत्येकमभि
सम्बध्यमिति न्यायेन माता प्रभवति पिता प्रभवतीत्यर्थः एवं च पित्र
नुज्ञां विना मातृकर्तृकदाने प्रशक्तिं निषेधति न स्त्री दद्यात् प्रतिगृह्णी
यात् वा अन्यत्रानुज्ञानात् भर्त्तुरिति इयांस्तु विशेषः सति पितरि तद
नुज्ञया नामातुर्दानं असति तदभावेऽपि इत्याह एतन्मते स्त्रीसत्त्वे पितुर
नुमतिं विना पुंसः पुत्रदानं सिद्ध्यति न च स्त्रीसत्त्वनाशो न भवतीति वि
लक्षणस्तिः परं तु विधवाया भर्त्रनुमतिं विना दाने पुंसः पुत्रत्वं कथं
स्यादिति चिन्त्यं अपरे तु मातापितरौ प्रभवत इत्यनेन प्रत्येकं द्वयोर्दान
दानत्वं प्राप्तं तत्र स्त्रीपाराधीन्यं निषेधति न स्त्री दद्यात् प्रतिगृह्णीयाद्वे
ति अन्यत्रानुज्ञानाद्भर्त्तुरिति न चैवं मातापितरौ प्रभवत इत्यत्र मातृ
परं व्यर्थमिति वाच्यं स्वतुल्यसम्बन्धकरणे सामर्थ्यसत्त्वस्यैवबोधक
त्वात् अन्यथा तु तस्याः करणेऽपि न पुत्रत्वसिद्धिः स्वतुल्यसम्बन्धस्यैव पु
त्रत्वरूपत्वात् न च विधवया दानेऽपि पुत्रत्वं सिद्ध्यत्येव तद्दानीं पितुर्म
रणेन तस्याः स्वातन्त्र्यात् पुत्रे च तादृशसम्बन्धमत्तियोगिनोऽभावेन
प्रतिगृहीतुरेव औपादानिकवत्त्वं भवतीति वाच्यं तस्यापि तत्त्वाप
त्तितुल्यसम्बन्धमुपपादयितुमशक्तत्वात् पुत्रे औपादानिकस्वत्वास्वी
कारात् अन्यथा मृतमातापितृकस्य सर्वस्मिन्नेव औपादानिकस्वत्वादे
ण दत्तकत्वसिद्धिः स्यात् अपुत्राशयनं भर्त्तुः पालयन्ती व्रते स्थिता इ
त्यनेन भर्तृशय्यापालनबोधनेन तदानीमपि पारतन्त्र्यप्राप्तेश्च एवं च मृ
तमातृकोऽपि पितृदत्तः पुत्रो दत्तकः सिद्ध्यति ननु यदि जीवन्ती स्त्री दानं
नानुमन्यते मृता वा तदैतन्मतेऽसिद्धोऽपि दत्तकः मातृत्वेष्ट एकस्य
दानेन अपरस्य स्वत्वं नाशयितुमयुक्तत्वात् न च भार्याणां भर्त्तृपारतन्त्र्ये
ण भर्त्तुरिच्छया भार्यास्वत्वनाशः सिद्ध्यति इदमेव पारतन्त्र्यमिति
वाच्यं इच्छास्वामित्वनाशयोः एकाधिकरणयोरेव कार्यकारणभा
वात् पारतन्त्र्यं च न हि इच्छाया दानादिक तत्त्वमेव इत्युक्तोऽसति विरहा
त् एवं च मृताया जनन्याः श्राद्धादिकं स दत्तकोऽधिकरोत्विति चेदिष्ट
मेव ननु दद्यान्मातापिता वा यं स पुत्रो दत्तको भवेत् इति याज्ञवल्क्यव
चने मातापिता वा दद्यातां समद्भिः पुत्रमापदि सदृशं प्रीतिसंयुक्तो स ज्ञे ८३
यो दत्त्रिमः सुतः इति मनुवचने दत्तश्चापद्धर्मः स च मात्रा पित्रा वा यस्य दत्तः

इतिविस्तुवचनेचकारश्रवणात् प्रत्येकमेवदातृत्वंप्रतीयते नचवाकारे
चसमुच्चयार्थकः इतिवाच्यं तथासतिनस्त्रीदद्यादित्यस्यवाशिष्टवाक्य
स्यवैयर्थ्यात् मिलितमातापित्रोरेवदातृत्वस्यशास्त्रावबोधितत्वात् नच
स्त्रीनदद्यादित्यनेनैवतत्दृढीकृतंअन्यथाप्रत्येकसम्बन्धबोधस्यापत्तेः
मातापितृभ्यामुत्सृष्टंतयोरन्यतरेणवा यंपुत्रंपरिगृह्णीयादपविद्धस्तुसं
स्मृतः इति अपविद्धस्यपुत्रबोधकवचनेमातापित्रोरन्यतरेणत्यक्तस्या
परेणपरिगृहीतस्यापविद्धपुत्रत्वस्वीकारेतयोरन्यतरेणदत्तस्यदत्तक
त्वस्वीकारौचित्याच्च एवंचअन्यतरेणदत्तएवद्वयोःस्वत्वंअपाच्छेत्तिद
त्यवश्यंवक्तव्यं अन्यथामात्रात्यक्तस्यकथमपविद्धपुत्रत्वंस्यादितिचेत्
न्नः अन्यतरेणइत्यस्यपित्रापित्रनुमतयामात्रावाइत्युक्तौसतिविरहा
त् नचैतावतापुर्व्योक्तकल्पनेप्रमाणाभावः इतिवाच्यं एकस्यदानेन
अपरस्यस्वामित्वनाशेयुक्त्यभावस्यैवप्रमाणत्वात् नन्वस्तुअननुज्ञा
तायामातुर्दानेनपितुःस्वत्वानाशात्दत्तकत्वासिद्धिःपितुर्दानेन
पितृपरतंत्रायामातुःस्वत्वानाशात् स्त्रियाःआधायनधिकारित्वत्तु
स्यादेवइतिचेत् योहियत्परतंत्रःतद्दानेनतत्स्वत्वनाशात्तद्दा
पितुर्दानेनपुत्रस्यपितृप्रसादत्तधेस्वत्वनाशात्तस्मात्दानेनदातुरे
वस्वत्वनाशः पितुर्दानेनचदत्तकत्वसिद्धिः अननुज्ञातायामातुर्दानेन
चदत्तकत्वसिद्धिःअनुज्ञातायामातुर्दानेनचतत्सिद्धिःइतिनिष्कर्षःतत्
चदत्तकस्यपूर्वमातृश्राद्धकरणव्यवहारस्यासिद्धत्वात्जीवत्मा
तृकस्यमातापितृदत्तस्यदत्तकत्वायग्रहणंयुक्तमितिसंक्षेपः यत्तुमा
तापितृविहीनोयस्त्वात्मानंदद्यात्तदास्वयमुपागतःयदिचजीवन्मा
तृकोमात्रादत्तआत्मानंदद्यात् तदादत्तकएवदद्यान्मातापितावापि
इत्यत्रवाकारस्वरसात् आत्मदानेनचापितत्तुल्यसम्बन्धाःपादानस्य
स्वयमुपागतलक्षणेदृष्टत्वात् युज्यतेचेत् पितृमरणोत्तरंतदीया
शेषधनेत्रैरस्यस्वत्वंभवतितेनचदानेचसंप्रदानस्यस्वत्वंभवतितत्त
स्यापितृमरणोत्तरंस्वस्मिन्नपितस्यैवस्वत्वंतद्दानेनसंप्रदानस्यैवस्व
त्वमतएवजीवन्मातापितृकस्यताभ्यांत्यक्तस्यस्वयंदानेनस्वयमुपा
गतत्वं नन्वेवंमतेपितरिमात्रादत्तःस्वयमुपागतःस्यादितिचेदिष्ट
मेवचस्तुत्वस्तुपुत्रस्यस्वदानेनपितृतुल्यमेवस्वत्वंभवतिमातुर्दाने

न च सर्वस्वत्वनिवृत्तिरित्ति चण्डेश्वराशयं वदन्ति लक्षितस्तं तथाः
हि पितृतुल्यसम्बन्धस्यैव पुत्रत्वस्वरूपत्वात् तत्र च स्वस्य दानजन्य-
त्वेस्व पमनुपागतत्वं पित्रा दानेन च कृतकत्वं इति विशेषः अत्र च
विधवस्या मात्रा दत्ते पितृतद्दाननिमित्तः पितृतुल्यसम्बन्धः किं
तुल्यं दाननिमित्त इति तस्य स्वत्वमनुपागतत्वमेव युक्तं अत्रेदम
वधेयं पितृस्वपरमेपेत कृधनान्तरमत पित्तकपौत्रस्याधिकारः पुत्रे
तु न स्वीक्रियते पुत्रेभाप्यो यां च तादृशस्वत्वाभावात् युज्यते चैत
दिकंज दृष्टांत विधर्मैव लिखितं इति प्राहुः कुल्लूकभट्टस्तु मात्रापि
त्रोः परस्परानुज्ञया दानकर्तृत्वमाह तत्र युक्तिरन्वेषणीया वस्तु
तस्तु तेरवो वितं नाचरपत्तिमिश्राः अपि मिलितयोर्दान ए
व दत्तकत्व सिद्धिरिति नव्रुवते अत्र मातुः पतिपरतन्त्रत्वात् तद्
नैनैव मातृस्वत्वनिवृत्तिः प्रसादलब्धधनादौ पारतन्त्र्याभावान्न त
था एवं च पत्याननुज्ञीते पुत्रे रम्पत्योर्म्मीध्यगं धनमिति पत्न्याः स्व
त्वं गौणं मातामहपक्षस्तु गृहीतस्त्वश्रुरपक्ष एव एतच्चभाष्पीपुत्र
श्चेत्यादिवचनस्य चण्डेश्वरायुपदर्शितव्याख्यानात् विश्वरूपंश्राः
स्तण म्महादिति वचनस्य कुल्लूकभट्टव्याख्यानदर्शनाच्च कल्पय
न्ति इरत्नाकरः चंधनाहूय इति दत्तकस्यांशमाप्त्यर्थं स्वदानसन्निधा
प्प अहूरे बांधवं सन्निहितमात्सीय मातुलादिकं एतच्चामजात्यादि
ता पनार्थं तस्य संबंधवसामाचेतर सन्निकृष्टमपि ममामाणानंतरेण ना
मेगाचज्ञानात् प्रतिगृहीया दूरसन्निकृष्टमेवेस्यैवकारो प्पर्थः सन्देहे
चोत्यन्ते इति अथ च कथं चित् दूरस्थबांधवं गहीत च तोब्राह्मण्योरे
संशयः स्यात् न दासीद पुत्रमिव भरणमात्रोपयुक्तं कृत्वा स्थाप
येत् एकेन बहूनां न्यायेन यत्नः एकेन पुत्रेण बहून् पूर्वान् त्रापतेत् तस्माद
संरिगदृनात्यादिकमेव परिगृह्णीयात् इत्यर्थ इत्याह वाचस्पतिमिश्र
स्तु न स्त्री प्रतिगृह्णीयात् इत्यत्र अन्यत्रेत्यादेवन्न पंनरकेति पतः भ
र्तुरनुज्ञा सत्त्वे पि प्रतिग्रहणासम्भवात् तथा हि प्रहाप्यात् इति होम
स्यांगस्य वाघादेव स्त्रिप्रागृहणासंभवः तत्र स्यान्ते भट्टाचार्य्या वाचस्प
तिभट्टाचार्य्यौ ही नाम तं नहगबाधेम धानाकरणं युज्यते स्त्रीणां ८४
होकान्यासत्कपादवाधात संकल्याकरणापस्याकाम्यकर्ममात्रानधि

श्लोकः २८

कारापत्तेः दृषोन्सर्गाद्दीरेवब्राह्मणद्वारा होमेन पुत्रकरणस्यसिद्धेश्च एवं
चनत्स्त्री दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानात् भर्तुरित्यत्रव्यवहिता
न्वयोः पिनिरस्तइत्तिध्येयं अत्रेदमवधेयं मातापित्रभ्यांयो दत्तः सपदि
दानेसन्मतोः पिनेदद्यः इतिवाचस्पतिमिश्रस्वरसात् अन्यथासम्मतर
त्तिलिखनवैयर्थ्यादितितच्चिन्त्यं पंचवर्षानतिरिक्तवयस्कस्य व्यवहारा
नभिज्ञत्वेनसम्मतसम्मतिविवेकानर्हत्वात् मनुस्वदानेसम्मतंअव
श्यंदद्यात् एकपुत्रत्वेतु सम्मतमपिनदद्यादिति नेषामाशयइत्तिव
दन्तितदपिचिन्त्यं तदानीं तस्यास्वतंत्र्यात् स्वदाने सदानेस्यावश्यं दाने
प्रमाणाभावादित्तिभावनीयं दत्तकपुत्रकरणपरिपाटीतुराजनि
निवेघव्याहृत्ति होमानंतरं आचारात् कांचनं हैमं तिर्कं धान्यं चदत्वा
अकृतचूडादिसंस्कारकं पंचवर्षादर्व्वाक् वयस्कंबालकं पित्रदत्तं
तद[illegible]नुज्ञाया मातदत्तंवासति चतयोः पुत्रांतरे वं धुजनसन्निधानेना
मगोत्रादिविज्ञाप्यगृह्णीयात् ततः पुत्रेष्टिं यागंकुर्य्यात् तत्रपुत्रेष्टिःसा
ग्नेःनिरग्नेस्तु महाव्याहृत्तिहोमोवशिष्ठोक्तोइत्यभियुक्ताः वस्तुतःव
शिष्ठोक्तोव्याहृत्तिहोमोग्रहणात्पूर्वंकालिकापुराणोक्तः पुत्रेष्टिहो
मःग्रहणानंतरमितिक्त्वाचप्रत्ययस्वरसादवगम्यते इदानींपुत्रेष्टयना
चरंतु आलस्यादेवकेषांचित्तसीमंतोन्नयनाद्यनाचारवदिति वदन्ति
कालिकापुराणे। औरसःक्षेत्रजश्चैवदत्तः कृत्रिमएवच इत्यादिनमक्र
म्या पितुर्गोत्रेणयःपुत्रःसंस्कृतःपृथिवीपते आचूडान्तंनपुत्रःसपुत्र
तांयातिचान्यतः चूडाद्यापदिसंस्कारानिजगोत्रेणवैकृताः दत्ताद्यास्त
नयास्तेस्युरन्यथादासउच्यते इत्यनेनप्रतिगृहीतजनकस्यस्वत्वनि
वृत्तिवायाततादात्वात्ताद्याइत्यत्राद्यपदेनकृ[illegible]त्रिमादेरपि पंचवर्षमि
ध्येपरिग्रहः जनकगोत्रेणचूडादिनिवर्तनंच अन्यथादासभावः
अत्रपितामहचरणाः पितुर्गोत्रेणेत्यादिकालिकापुराणवचनेनजन
कगोत्रेणकृतचूडस्यदत्तकत्वासिद्धिकथनात् सगोत्रस्यदत्तकपुत्रत्वं
नसिद्ध्यतीत्याहुः तदपरेनमन्यन्ते पितुर्गोत्रेणेत्यादिवचनंस्वनचूडा
स्यग्रहणनिवृत्तितात्पर्य्यकं तेनसपिण्डपुत्रंगृहीत्वाचूडादौकृ
तेनदोषइतिवदन्तितेशामसमाशयः पितुर्गोत्रेणनइत्येवनइत्यर्थः जनकेनअ
धिकारिणाचइत्यपिबो [redacted]

ध्यं तथाचात्र उभयोरभावेन एकस्य पितृगोत्रोल्लेखमात्रस्य सत्त्वेपि न द
त्तकत्वसिद्धिः अत्र पुत्रदानाय अनुत्सोपत्त्ये दत्वापि तामतः अनंतरं अ
न्येन जनकगोत्रेणैव चूडादिकं कृतं तत्रापि दत्तकत्वसिद्धिस्तु जनकेनाधिका
रिणा चूडायाः कृतत्वात् ननु च जनकावधिकर्मेणानान्त्रीसुतस्याहकरणे
दत्तकत्वसिद्धिर्न तु अधिकारिपर्यंतदिविचनं कर्तव्यमिति वाच्यं यस्य
देवान्त्याह्वयन्तितत्रदोषानुपायात् अत्रोच्यते पितुर्गोत्रेणेत्यादिव
चनं ग्रहणात्पूर्वं चूडाकरणनिषेधाय ग्रहणोत्तरं जनक[illegible]र्तृकचूडा
या असिद्धत्वात् न च चूडापदं न संस्कारपरं किंतु शिरोमुण्डनादिपर
मिति वाच्यं लाघवात् वीनानीयसंस्कार एव चूडापदशक्तेः न च तादृश
स्थले दत्तकत्वसिद्धिसारणं काचनिकमिति वाच्यं तावत्कल्पने प्रमाणाभा
वात् ग्रहणविशेषस्यैव पुत्रत्वप्रयोजकत्वस्य पूर्वमुक्तत्वात् अत्र यत्र ज
नकः पुत्रदत्वाभ्यां त्यागेति त्याहा स्वगोत्रेण संस्कारं करोति तदुत्तरं धर्मशा
स्त्रानुसंधानेन प्रतिग्रहः न पुत्रत्वसिद्धावपि चौमत्वित्वात् चूडाकरणं वृत्त
मिति पुनश्चूडां न करोति तस्य पुत्रत्वासिद्धिमाह चूडाद्या इत्यादि इत्यपरे अ
त्र केचित् शिरोमुण्डनमात्रस्य प्रधानत्वात् अधिकारिमंत्रपाठादेश्चांग
त्वात् अंगाभावेपि जनककृतशिरोमुण्डनेनैव चूडादिसिद्धिः अथ परो
रसपुत्रस्यैवौरसपुत्रत्वक्रमेण कृतापि चूडा सिद्ध्यतीति चेदिष्टमेवेत्या
हुः तत्र शिरोमुण्डनादेरागप्राप्तत्वेन विधानवैयर्थ्यादधिकारिकृतः
शिरोमुण्डनादेरेव विधेयत्वेन विशिष्टस्यैव प्राधान्यात् न चायं नियमवि
रोधः क्रतोभाण्यमिपगच्छेदिति वदिवाच्यं नियमे फलभावात् अस्य प्रा
प्त्या एषातिशयस्य फलानुपपत्तेः संभवतु वाचस्पतीनां नियमविधिः अन्न
प्राशनेन तु नियमो न संभवति तत्र अन्नभोजनं विना शरीरधारणासंभ
वेन नियमस्याग्रतएव प्राप्तः ततश्च एकत्र संस्कारे अधिकारिकृत
कर्मणो विधेयत्वे अन्यत्रापि तथा कल्पते न अद्वैतनिर्णये वाचस्पतिम
ताचार्यैरपि स्वयमेव अधिकारिकृतान्नप्राशनेतरसंस्कारजनिके सुक
त्वात् तस्मात् पितुर्गोत्रेणेत्यस्य जनकसम्बन्धिगोत्रभागित्वं तु एवगोत्र
शब्दस्य वंशवाचित्वेन जनकवंशकरत्ववश्यावाकृतचूडस्यैव दत्तकत्वासि
द्धिरिति निष्कर्षः संततिगोत्रजननकुला[illegible]भिजनान्वयो वंशोन्वेवा
यः संतानः इत्यमरः मुखादिरूपं अंगं जनकेन कृतं चूडस्य दत्तकत्वसिद्धि



श्लोकः २५

रितिनिरस्तं एवंचसगोत्रस्यापिदत्तकत्वंसिद्धमेवइतिसर्वंसमंजसं इदा
नींतुवर्णसंकराणांचशूद्राधनादराणांपराकरचिन्नापितेनकृतशिरोमु
एडनस्यापिपंचवर्षमध्येगृहीतस्यदत्तकत्वंसिद्धमितिकेचिद्वदंति अत्रभ्रा
तृपुत्रस्यदत्तकत्वंसिद्ध्यतिअत्रकेचित् भ्रातृणामेकजातानामेकश्चे
त्पुत्रवान्भवेत् सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीत् इतिमनुवचने
भ्रातृपुत्रस्यपुत्रत्वबोधनात्पुनर्दत्तकत्वंनसिद्ध्यति नहिस्वकीयौर
सस्यैव मातापितृभ्यांपरस्परंदानेनदत्तकत्वंभवतीत्याहुस्तत्रभ्रातृ
पुत्रसत्वेदत्तकस्योनकर्त्तव्याइत्यस्येवचण्डेश्वरकुल्लूकभट्टोदयक
रपारिजातादिभिरुक्तत्वात् नहिभ्रातृपुत्रस्यदत्तकत्वेभ्रांत्याकृतं
नसिद्धतीतिकेनचिदुक्तं यथाऔरसपुत्रसत्वेपुत्रिकानकर्त्तव्याकृतातु
सिद्ध्यत्येवतथात्रापिनतुस्तनस्यदत्तकत्वंसिद्धंतथापिअन्येनभ्रातृपु
त्रेणसमोविषमोभागःस्यात्तस्यापिपुत्रत्वात् इतिचेन्नशास्त्रवत्केन
भ्रातृसत्वेभ्रातृपुत्रस्यानधिकारबोधनेनदत्तकादिपुत्रापेक्षयानिकृ
ष्टत्वस्यार्थवशासंपन्नत्वात् नचऔरसपुत्रपत्नीदुहितृपित्राद्यसत्वे
भ्रातुरधिकारः तदभावेभ्रातृपुत्रस्यअन्येषांचदत्तकादीनांयथायथं
समोविषमोवाअधिकारइतिवाच्यं नभ्रातरोनपितरःपुत्राऋक्थह
राःपितुःपिताहरेदपुत्रस्यऋक्थंभ्रातरएववाइत्यत्रबहुवचनेन
भ्रातृसत्वेसर्वेषामेवपुत्राणामधिकारित्वबोधनात् अतएवकुल्लू
कभट्टः नसहोदराभ्रातरोनपितरःकिन्त्वौरसपुत्रभविष्येत्रजारयोः
मोणपुत्राःपितृऋक्थहराभवंतीत्यनेनैवउच्यतेऔरसेसएवऔर
सःपुत्रइत्यनेनैवसिद्धत्वात् अविद्यमानपुत्रस्यामुख्यपुत्रस्यपत्नीदु
हितृरहितस्यचपित्राधनंगृह्णीयात्तेषामाभावेभ्रातरोधनं
गृह्णीयुरित्याह नमुक्तर्हिअस्यपुत्रत्वातिदेशःकिमर्थइतिचेत्पुं
न्नामनरकत्राणार्थएवइतिजानीहि अन्यथाभ्रातृपुत्रसत्वेदत्तका
द्योनकर्त्तव्याइत्युक्तंस्यात्पुन्नामनरकत्राणार्थनावात् अकरण
जीवन्तुवैयर्थमेवेतिध्येयं तथाचभ्रातृपुत्रोतसत्वेऽपियोदत्तकःस
एवऋक्थंपिण्डंचाधिकरोतीतिसचपुत्रग्रहीतुःदत्तकश्चाष्टमः
सचमातापित्रावायस्यदत्तइतिविष्णुसूत्रात् तस्यस्यादितिरत्नाकरव्या
ख्यानाच्च सप्रतिग्रहीतुर्गोत्रभागी गोत्ररिक्थेजनयितुर्नहरेद्दत्रिमः

गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा इति मनुवचनात् गोत्र-
रिक्थानुग इति तथा च यस्मात् गोत्रं वा रिक्थं च अपसरति तस्मात्
पिण्डोऽपि अपसर इति भावः पिण्डापसरणकथनेन तद्दंशकस्य निरा-
करणं एकेन गोत्ररिक्थानुग इत्यस्य गोत्ररिक्थे यत्र गच्छतः पिण्डो-
ऽपि तत्र गच्छतीति इति नार्थः तथा सति सगोत्रस्य पत्नीथ्यस्य बंधुपर्यन्त-
रहितस्य स्त्रियादिधनहारित्वात् तत्पिण्डदत्वापत्तेः दौहित्रस्यापि पि-
त्रवन्मातामहधनगोत्रभागित्वापत्तेश्चेति गोत्ररिक्थानुग इत्यस्या-
र्थनिरूपणं दुघटमिति निरस्तं एतच्च क्षेत्रजदत्तादीजि गोत्ररिक्थाभा-
गित्वान्न तच्छ्राद्धमपि न कुर्य्यात् द्विपितृकस्तूभयोरेव कुर्य्यादिति अत्र पित्ता-
महचरणाः अधिकारे संशये निष्पामकान्तराभावे स्वगोत्ररिक्थ-
स्य नरहरत्वं विना न पिण्डदत्तमिति व्याप्तिः अत्र दत्तकेऽपि पिण्डज-
नकस्य प्रतिग्रहीतुश्चाधिकारसंशयः तत्र जनकगोत्ररिक्थाग्रा-
हित्वान्न तत्पिण्डदानव्यपगमः अधिकारसंशयाभावस्थले दौहि-
त्रेण मातामहापधनगोत्रभाजनेऽपि पिण्डदेयनिष्पामकशास्त्रान्त-
रसत्वे च यथा नग्रहणं विनापि उदासीने पिण्डदत्वं इति ततश्च गोत्र-
रिक्थान्यान्तरहरत्वं व्यापकं येन दभावात् जनकपिण्डदानस्य व्या-
प्यस्याभावः पिण्डदत्वरूपव्याप्यस्य सत्वात् प्रतिग्रहीतृगोत्ररिक्थ-
भागित्वव्यापकं सिद्धमिति अतएव दत्तकस्य प्रतिग्रहीतृगोत्रभा-
गित्वं रिक्थत्वं चायाति एतदेवोक्तं उद्वहतत्वे स्मार्त्तभट्टाचार्य्यैः
जनकगोत्ररिक्थग्राहित्वेन तत्पिण्डस्वधापरवाग्यश्राद्धकर्त्तृत्वे
न च प्रतिग्रहीतुरेव गोत्रभागित्वं गोत्रकस्य प्रतिपत्तेरिति स्वधाश-
ब्दः पितृभक्तार्थक इति स्मार्त्ताः तथापि तत्र स्यं दत्तः सकाशात्
जनकस्य पिण्डआयातीति भावः ब्रह्मपुराणे दत्तकश्च स्वयंदत्तः कृ-
त्रिमः क्रीत एव च अपविद्धश्च ये पुत्रा भरणीयाः सदैव ते भिन्न-
गोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः सूतके मृतके चैव
त्र्यहाशौचस्य भागिनः अत्राशौचस्य इति प्रातुरुच्यत्तस्य दत्तकेत्व
ऽपि त्र्यहशौचभागित्वमात्रापि त्रोटीने न तत्सम्बंधनिबंधनस्याः
पिण्डनिवृत्तौ दशाहाशौचव्यपगमात् प्रतिग्रहीतुर्ग्रहणनिबंध-
नस्य पिण्डस्यान्तर्दशाहाशौचं सर्वेषां तथा च पितृदानादिहारास्यापि २६

एतस्य मातुरेव त्र्यहाशौचमिति केचित् दत्तकपुत्रादीनामपि जननम
रणयोस्त्रिरात्रमशौचं प्रतिगृहीतृतत्पित्रादेरिति पितामहचरणाः
दत्तस्य पौनर्भवादीनां चाधम्यमिति मनुप्रभृतीनां मतं तत्र यौनसम्बंधा
भावात् अस्यापकर्षः इति विष्णुप्रभृतिमुनीनामाशयः धर्म्मत्वा
दुत्कर्षः इति मनुप्रभृतीनां क्षेत्र जस्य दत्तकबाधकत्वं तु अतिशय
गुणशालित्वादिति मनोर्वाशयः बृहस्पतिस्तु क्षेत्रजस्यापकर्षमाहय
था दत्तोऽपविद्धः क्रीतश्च कृतः स्मृतस्तथैव च जातिशुद्धाः कर्म्मशुद्धाम
ध्यमास्ते सुतामताः क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः स्मृतः कानी
नश्च सहोढश्च गूढोत्पन्नस्तथैव च अत्र औरसपुत्रिकापुत्रयोधर्म्म
जत्वात् यौनसंबंधाच्चाधिक्यमुक्तं बृहस्पतिना यथा एक एवौरसः
पित्र्यधने स्वामी स्तथैव च तत्तुल्या पुत्रिकापुत्रः भर्त्तव्यास्त्वपरे सुताः
तथा च एते एव उत्तमे इति शेषं अपरे दत्तकादयः स्वयमुपगत
स्य कृत्रिमान्तर्भावः जातिशुद्धा इति हीनवर्णनिराकरणाय कर्म्मशुद्धाः
इति नित्यनैमित्तिककर्म्मपरांमुखवारणाय तथा च दत्तक्रीतादियत्पौ
नर्भवादिवाधमत्वं अन्यैर्मुनिभिरुक्तं तज्जात्यशुद्धकर्म्माशुद्धदत्तकक्रीता
दिपरं ब्रह्मपुराणमपि तत्परमेव यथा दत्तकश्च स्वयं दत्तः कृत्रिमः क्री
तएव च अपविद्धश्च ये पुत्रा भरणीयाः सदैव ते इति मनुतर्हि शूद्रा
पुत्रस्यापि गर्हितत्वमस्तु तस्यापि शूद्रा वोढा पतन त्यत्रैरित्यादीना
अधर्म्मपरिणीता जातत्वादिति चेत् तस्यापि नैष जारजातः तन्मातुः प
रिणयत्रवा धर्म्मः न तु तज्जनने तथा प्रस्तुतपरिणीतायाः शूद्राया अ
पि रिक्ता व नाभिगमे पापमेव भवति शौनकस्य तु तदुत्पत्तेस्साहित्यं तु प
रिणयनजन्यपापसैव परिपाककालविधायकं अपरिणीताशूद्राजा
तस्तु शूद्रापुत्र एव पक्ष्यो भवतीत्याहुरिति वशिष्ठोक्तः पाष्टत्वमुत्तर
पट्कापेक्ष्यापकर्षो हारस्य एव इति अत्र विचारः दत्तकस्य वंधुधना
धिकारित्वं भवति न वेति अत्र केचित् यत् दत्तकस्य वंधुदायाद्याधिका
रित्वमुक्तं मनुबौधायनाभ्यां गोतमबृहस्पतिः कालिकापुराणेषु उत्त
कृष्टत्वमुक्तं तत्तु अतिशयगुणशालित्वबोधनात् तथाहि कर्म्मभिः स
नाध्यापनयजनैः शुद्धाः सर्व्वपापविनिर्मुक्ता इत्यर्थः उपपन्नो गुणैः स
र्वैः सुतो यस्य तु दत्तत्रिमः सह देवैनैव तत् रिक्थं संप्राप्तोऽप्यन्यगोत्रतः इति मनु

वचनेन च सर्वगुणशालिनो दत्तकस्य धनहारित्ववो धनात् एवं च गो
त्रमवो धार्यं न कालिकापुराणवचने पुमन्तरजकस्य पौनर्भवादिस
त्वेऽपि धनहारित्वकथनं नन्वनुचरस्यैकवाक्यत्वादवसेयं अत
एव दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव च अपविद्धश्चैव पुत्राः भ
रणीयाः सदैव ते इति ब्रह्मपुराणेनैतेषां भरणीयत्वं बोध्यते अन्यस
होढस्यामभिधानं तत्र जन्मस्थात्वं भोऽस्तीत्यभिप्रेत्य इति हेयं न चैतन
ब्रह्मपुराणवचनं निन्दितदत्तकादिपरमिति वाच्यं निन्दितत्वे सवर्णा
जोऽप्यगुणवान् नार्हः स्यात् पैतृकं धनं न तत्पिण्डदाः श्रोत्रियाः येषां
तदभिधीयते इत्यनेन औरसादेरपि अकस्या[ ]ग्राहित्वस्योक्तत्वात्
अतो दृष्टानां औरसादीनां च अनेकशिष्टा निर्गुणदोषाणां दत्तकानां भ
रणीयत्वा गुणवतां दत्तकादीनामपि पितृत्वं धनकृत्यग्राहित्वेनेति
सिद्धमित्याहुः परे तत्र विवदन्ते याज्ञवल्क्यादीकोषाकल्पावित्यनुदृ[?]
तौ बृहस्पतिः अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः अनेकधा
अनेकप्रकाराः जे सेत्र जारस्यः पुरातनैः ऋषिभिः कृताः अधुनाकृतो
हदत्तैनेः ते सत्रजारयः कर्तुं न शक्यन्ते कुतः इत्यपेक्षायामाह तुर्गभवि[?]
शेषणामाह शक्तिहीनैरिति तथा च से त्रजनादिपुत्रकरणे तपोरूपः
शक्त्यपेक्षाऽस्ति इति प्रतिपादितं तेन च प्रतीयते तपोऽपेक्षा यत्र नास्ति
स पुत्र एव उत्कृष्ट इति वक्तुं युज्यते दत्तौरसेतरेषां तु पुत्रत्वेन पिण्डः
इ[ ]त्यादित्यपुराणेन दत्तस्यापि कलौ पुत्रत्वानुमतेः औरसवत् दत्तेन
ना पेक्षा[ ]पिसा अथ औरसइव दत्तकोऽपि इतरापेक्षया उत्कृष्ट इति बो
ध्यते एवं च मनुवचने उपपन्नो गुणैः सर्वैरित्यत्र गुणपदं दोषाभावपरं
बृहस्पतिवचने जातिशुद्धाः कर्मशुद्धा इत्यत्रापि तत्त्वेवाभिप्रायः इति
तु वं न स्तत्सांप्रतं यत औरसादयो मुख्याः षट् दत्तकादयो गौणाः षट्
द्विविधाः पुत्रास्तेषां तेषां प्रधानस्य औरसस्य दत्तकस्य च कलावनुमतिः
कृताः अत एव बृहस्पतिना एवं पुत्रिकायाः दत्तकापेक्षया उत्कर्ष उक्तः न तु
तपःसापेक्षस्य उत्कृष्टत्वमपकृष्टत्वं चेति केचिदिति कृत्वा लिखितमेवम
नं सम्यक् वस्तुतस्तु सर्वेषामेव पौनर्भवादीनां दत्तकादीनां च पितृकृत्य
ग्राहित्वं वंशकृत्यग्राहित्वं च निर्गुणत्वे तु न वंशकृत्यग्राहित्वं किं
तु ब्रह्मपुराणाद्युक्तपितृकृत्यांशग्राहित्वं केषांचिद्भरणीयत्वमात्रं च

यथापत्यं पूर्वपूर्वविचनावकलनारद्गम्यते इति व्यवहारेः पीडानी
स्वजात्युक्तनित्यनैमित्तिककाम्यइष्टापूर्त्तादिक्रियारतस्य दत्तकस्यापि
पितृव्यादि अनुजाग्रजादित्वे दृश्यते इति सुतस्वत्व श्यामः उपपन्नो गुणै
रितिमत्तवचने गुणैः विद्याचारैरिति च पृथ्वीश्वरादयः बृहस्पतिवचने
कर्म्मणा शुद्धा इत्यनेन नित्या[illegible]दिकर्म्मनिरतत्वं लब्धं जातिशुद्धा इत्यनेन
च हीनवर्णव्यावृत्तिः चण्डेश्वरः उपपन्नो गुणैरित्यत्र त्वादेवमक्ष्य
ग्राहित्वे मास्तु उपपन्नो गुणैरिति औरसे जातेप्यंशग्राहित्वार्थं नि
र्गुणत्वे भरणीयत्वमात्रार्थमेव इत्याहुः तत्र गुणवत्ता दत्तकादीनां
निर्गुणयोनर्भवादिस्वत्वेऽपि दायाद्यधिकारार्थं सर्वेषां निर्गुणत्वे तु ज
न्मासत्तिक्रमेणोत्तरेष्वपि अपूर्णांशहरत्वं इतरेषां च स्वस्वपुरा
णयुक्तभागग्रहणं इति व्यवस्थार्थमित्यपि वक्तुं युज्यते भरणीया
स्तैरेव ते इत्यत्र भरणमपि तादृशभागग्रहणमेव अन्यथा मन्वादि
याज्ञवल्क्यादिविरोधोऽपरिहार्यः स्यात् इति केचित्तु तेषां सव
र्णा ये पुत्रास्ते तृतीयांशभागिनः हीनास्तमुपजीवेयुर्ग्रासाच्छादनसं
भृताः इति देवलवचनैकवाक्यत्वात् भरणीयास्तैरेव ते इति ब्रह्म
पुराणवचनमपि हीनवर्णदत्तकादिविषयं वदन्ति इति संक्षेपः
अथ क्रीतः अयमष्टमः इति याज्ञवल्क्यमतं सप्तमस्य दत्तकस्य
दत्तकनिरूपणानन्तरं क्रीतस्ताभ्यां विक्रीत इत्यनेन तन्निरूप
णात् दत्तक्रीतयोः स्वाम्यच्छाधीनस्वत्वभागित्वाविशेषेपि क्र
यत्य विक्रयेपापस्याधिकत्वात् दत्तापेक्षया क्रीतस्यापकर्षः इ
ति तस्यापकर्षः दत्तापेक्षया क्रीतस्यापकर्षस्तु बहूनां मुनीनां सम्म
तः व्यवधस्याच्चास्य दत्तवत् कालिकापुराणे चूडाद्याः पञ्चसंस्का
रा निजगोत्रेण वै कृता दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते
इत्यत्र द[illegible]त्ताद्या इत्याद्यपदेन क्रीतादेरपि ग्रहणं तस्या ऊर्ध्वं तु प
ञ्चमाद्वर्षान्कृताद्याः सुतान्नृपः इत्यत्रापि विद्यक्रीतस्य नवमः
बौधायनः योऽप्यस्यार्थे गृह्यमेस क्रीतः अन्यत[illegible]स्येति मातापि
त्रोर्ग्रहणेनुभर्त्रनुमतिर्दत्तकप्रकरणोक्तरीत्यपेक्षणीया न स्त्री पुत्रं द
द्यादिति वशिष्ठवचने जहत्स्वार्थलक्षणया विक्रयादिकं विव
क्षितं भर्त्रनुज्ञया स्त्रिया अपि न्याप्ये साम्ये प्रयोजकत्वात् तदुक्तं हारी

त्तेन आदाने वा विसर्गे वा न स्त्री स्वातंत्र्यमर्हतीति इति रत्नाकरात्
गृह्णीते इति मूल्यं तु इति शेषः याज्ञवल्क्यादिवचने मूल्यदानपू
र्वकदानबोधके विपूर्वक्रीधातुप्रयोगस्वरसात् तदेकवाक्य
त्वात् मनुः क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमंतिकात् स
क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा असदृशः अवर्णेन इति पा
रिजातः न हीनजातीयो नोत्तमजातीयः पुत्रत्वे न ग्राह्यः सद
शोऽपि स गुणोपेतः पा इति मेधातिथिप्रकाशकारौ कुल्लूकभट्ट
स्तु अत्र याज्ञवल्क्यसंवादमाह यस्मात् सजातीयेष्वयं प्रोक्तस्तनयेषु म
या विधिः इति एवं चोभयोरेकवाक्यत्वात् शूद्रापुत्रव्यतिरिक्तेषु सर्वत्रैव स
जातीयत्वं लभ्यत इति मातापितृभ्यां विक्रीतो यस्यार्थं गृह्यते तस्य क्रीतः
पुत्रः स चासवर्णोऽपि सदृशोऽसदृशो वेति मनुवचनात् इति दीपकलि
का तथा हि सदृशं प्रीतिसंयुक्तमिति मनूक्तदत्तकलक्षणे यथा हि सदृश
पदं सवर्णत्वाचकं तथा अपि तदेव भवितुमर्हति यत्तु तत्रापि सदृ
शपदं गुणद्वारा सदृशवाचकं इति मेधातिथ्युक्तं तत्तत्र दृष्टे संग
च्छते यदि पंचवर्षबालकस्य गुणविवेचनं भवति इति तदाशयः न च
तथास्तु सजातीयेष्वयं प्रोक्त इति याज्ञवल्क्यविरोध इति चेन्न क्री
तव्यतिरिक्तेष्वेकादशसु पुत्रेष्विति तत्रैव व्याख्यानात् वस्तुतस्तु ही
नास्तमुपजीवेयुरिति देवलवचनात् अधमवर्णस्यापि पुत्रत्वं सिद्धं
एवं च सजातीयेष्विति याज्ञवल्क्योक्तिः शुक्रमरसार्थे तथा हि पौ
नर्भवादिरहीनवर्णत्वे दत्तकादेश्चोत्कृष्टवर्णत्वे दत्तकादेरिव वक्त्र
क्ष्यहरः सजातीये तु पौनर्भवादिरिव इति विभावनीयं क्रीतो यः केन तु
पुत्रः गोत्रभागी रिक्थभागी च अयं हि त्रिमाधवीये सप्तमस्तत्स्वर
गे वक्ष्यते इति यत्तु पंचमः क्रीतपुत्र इति उत्तरषट्कापेक्षया पंचम
त्वस्य फलं तत एकादशत्वस्य विधायकं समवचनं तदपि वृद्धाद्यपेक्षया
निर्गुणत्वे बोध्यं एवं वित्तश्च नवम इति विष्णुवचनमपि सह्योढस्य
सगुणत्वे बोध्यं क्रीतदशमस्तु इति ब्रह्मपुराणं अत्र कृत्रिमः
स नवम इति याज्ञवल्क्यमतं अष्टमस्य क्रीतस्य निरूपणानन्तरमेव कृत्रि
मः स्यात्स्वयंकृतः इत्यनेन तन्निरूपणात् बौधायनः सदृशं यत्कामं
यं कुर्यात्स कृत्रिमः कामेन स हवर्त्तते इति अस्याहं पुत्रो भविष्यामि २८

श्लोकाः २५

मामेयं पुत्रत्वेनग्रहीष्यतीतिमन्यमानः इतिरत्नाकरः अत्रस्वामिभ्यां मातापि
तृभ्यां अरक्तत्वात् कृतात्यापकर्षवस्तुनो अयंमातापितृहीनः ताभ्यां त्यक्तो वा तन
यो स्वामिनोः स्वतोरेव वा पुत्रत्वकरणोऽनुमतिर्वाक्षिपरभुज्यमानभक्तादिव अ
थ वायं कुशादिरचितः तयोर्वलात्तद्भजीवःन्नेनेवंमध्येसो पुत्रत्वेनमन्यतेनतरा
किं स्यादितिचेत् तयोश्चला न तस्य पुत्रो न भवति अथ्य वा गंगा यया जह्नोर्दुहि
तृत्वं स्वीकृतवतीति तथा यदि कोऽपि कस्यचित् पुत्रत्वं स्वीकरोति अयं च तत्पुत्रं
मन्यते न तस्य हि पितृकः अस्य च स्वयमुपगः ताद्युत्कर्षः सगुणत्व एव ज्ञेयः
मनुः सदृशं यं कुर्वीत गुणदोषविचक्षणं पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः
सदृशं सवर्णमिति कुल्लूकभट्टः कुलोपयुक्तगुणायुक्तमितिमेधातिथिः गुणदो
षविचक्षणं मातापित्रोर्बौद्धदेहिकादिकरणाकरणयोर्गुणदोषजानाति यस्तं पुत्र
गुणैः शुश्रूषादिभिर्युक्तं इतिरत्नाकरः तत्र ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता
नृप इतिकालिकापुराणात् पंचवर्षमध्यएवग्रहणं दत्तकतुल्यत्वात्तद्दत्त
कोक्तः सर्वोविधिः प्राय आदरणीयः पंचवर्षवृद्धिसोजात्यदर्शनात् भुविपालि
त्यं ज्ञायतएवइतिवक्तव्यं वस्तुतस्तुएतत्तस्तुर्देमिसंशापरं पुत्रेसूपयोगात् अयं
कर्तुरकस्य भागी गोत्र भागी च कृत्रिमः पंचभागं तु इतिशंख्यगुणशालि कृत्रिम
परं ब्रह्मपुराणं मन्त्रादिवाक्यं चतथेतिसंक्षेपः अथस्वयमुपागतः सदशम
इतियाज्ञवल्क्यमतं नवमस्य कृत्रिमस्य निरूपणानंतरमेवदत्तात्मा तु स्वयं
इतितन्निरूपणात् विष्णुः स्वयमुपागतदशमः स्वयमुपागतस्तस्येतिशेषः इ
तिरत्नाकरः मनुः मातापितृविहीनो यः त्यक्तो वा स्यादकारणात् आत्मानं स्प
र्शयेद्यस्तु स्वयंदत्तस्तु स स्मृतः आत्मानं स्पर्शयेदर्शतेपुत्रइत्यात्मानं दद्यादिति
रत्नाकरः योमत्तमातापितृकोसौ गोचितदोषं विनामातापितृभ्यां त्यक्तो वा आ
त्मानं पस्मैदद्यात् स्वस्वयंदत्तात्यस्तस्य पुत्रो मन्वादिभिः स्मृतः इति कुल्लूक
भट्टः अस्य गौणस्वामिनात्वेनेचरदत्तत्वात् दत्तात् कीतात्चापकर्षः कृत्रि
मस्य अन्येन पुत्रकरणे अनुमतिमात्रसत्वात्स्वयदाना भावात् भेदः इ
तिकेचित् अयं कृत्रिमाद् उत्कृष्टो भवितुमर्हति सूरदशस्वयमागतइति ब्र
ह्मपुराणं अथ सहोढः अयमेकादश इति याज्ञवल्क्यमतं दशमस्य स्व
यमुपागतस्य निरूपणानंतरमे वगर्भे विन्नः [illegible]होढजइति अनेन
तन्निरूपणात् अत्र गर्भेऽउदरस्थितौ विन्नः लब्धइत्यर्थात्तत्तन्मात्रसंस्का
रकस्य च स पुत्र इतिलक्ष्यते विष्णुः सहोढः सप्तमः गर्भिणीयासंस्क्रियतेतत

स्याः पुत्रः सोऽनुपातिनाम्नाहस्य मनुः या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती
वोढुः स गर्भो भवति सहोढ इति चोच्यते अत्र प्रकाशकारः पाणिग्रहणिका मंः
त्राः कन्यास्वेव प्रतिष्ठिता इति वचनात् अस्याश्च पुंसंसर्गेण कन्यात्वाभावात्
संस्कारेण न भवतीत्याह अत्र प्राचः आथर्वणीयविधिना संस्कारस्तु अकन्यास्व
प्यस्ति श्रुतिबोधितः यद्वा नो अधमस्य ज्ञातिभिर्व्यवह्रियते तत्परमेव संक्रियते
इति परमित्याहुः पाणिग्रहणमंत्राणां एव कन्यानां नियमात् तदन्यस्य चतुर्थीहोमाद्या
भिप्रायकं संक्रियते इत्यपरं इति चण्डेश्वरः वस्तुतस्तु गर्भविन्न इत्येतावन्मात्र
दर्शनात् वेदनमात्रं विवक्षितं न तु होमपर्यन्तापेक्ष्य अन्यथा होमात्प्राग्गर्भकाले
होमाभावे सहोढत्वाभावप्रसंगेन मातामहस्य पुत्रः स्यादिति विभावनीयं अयं न
मातामहस्य पुत्रः तेनालंकारांशेरिव दुहितृसंबन्धाभावेनैव दत्तत्वात् किं तु वोढुरे
व तेन च जन्मसम्बन्धात् वधूः बीजद्वारा क्षेत्रद्वारा वा जननात् किं तु न तत्प्रति
ग्रहात्परयात् तत्स्वामिन्यात्तन्मातुर्मातामहस्य दाने गुणाभावाच्च नोदनादि
तोऽयमपकृष्टः वोढुः कानीनः पुत्रोऽस्मादपि अपकृष्टो भवितुमर्हतीति चोः
ध्ये बीजिनः परिचये तस्येव स गर्भो भवतीति न च भागे सहोढस्तु इति ब्रह्म
पुराणं इति संक्षेपः अथापविद्धः अयं द्वादश इति याज्ञवल्क्यमतं एकाद
शस्य सहोढस्य निरूपणानन्तरमेव उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्
सुतः इत्यनेन निरूपणात् विष्णुः अपविद्धस्त्वेकादशः समात्रा पित्रा वा परि
त्यक्तो येन गृहीतः तस्य पुत्र इति शेषः वशिष्ठः अपविद्धः पंचमोऽयं मातापि
तृभ्यां त्यक्तं गृह्णीयात् पुत्रत्वेनेति पंचमत्वोक्तिश्च उत्तरषट्के पंचमत्वमा
द्ययेति रत्नाकरः तथा च एकादशत्वमेवेति भावः मनुः मातापितृभ्यामु
त्सृष्टं तयोरन्यतरेण वा यं पुत्रं परिगृह्णीयादपविद्धस्तु स स्मृतः उत्सृष्टस्त्यक्तः त्या
गश्चात्र पालनभरणासामर्थ्येन केनचिद्वा दोषयोगेन परिग्रहश्च पुत्रधिया न तु जीः
वितकामनयेति रत्नाकरः तुच्छधान्यादिवन्निःस्वतः इमं पः कश्चिद्गृह्णीया
त् स्वेच्छया मा वा ममत्वेन न प्रयोजनं नास्तीति बुद्ध्या त्याग इति भावः स्वयंदत्त
स्य गौण स्वामिना स्वर्ममेव दत्तत्वादस्मादुत्कर्षः अस्य तु पुत्रस्य तदानीमज्ञानत्वे
। न विनिधितुल्यत्वादपकर्षः लोके हि दृश्यते प्रतिगृहीतान्निधिर्दुर्बलः इ
ति कृत्रिमे तु सतोरपि मातापित्रोः परेण स्वीकारात् परभुज्यमानः धनादाविव
उपेक्षयास्वत्वहानिः सचोपेक्षाभ्रमो यथाऽऽगमाभ्रमि बलेन भुज्यते भुज्यतां
असेवमभवतु इत्याकारिका इच्छा तया पुत्रेऽपि एतन्मम पुत्रं करोतु अस्येवायं ८९

पुत्रो भवत्वित्याकारिका इच्छा तस्याश्च मुख्यस्वामिन इच्छया अत्र स्वत्वात् कृ
त्रिमस्य स्वयं दत्तादपरिहार्यो न कर्षः अपि विंहि तु स्वस्वत्वनाशमिच्छति स्वामी न
तु परस्वत्वं कृत्रिमेतिपरस्वमपीति ननु एवं सति दत्तकृत्रिमयोः को विशेषः स्वस
त्वनाशपरस्वत्वाविशेषादिति चेन् उपेक्षा कृत्रिमस्य मूल्यं दानं तु दत्तस्य तयोर्वि
शेषोपि अस्य स्वत्वं भवत्वित्याकारिका स्वत्वोद्देश्यिका इच्छा दानं इदं अनेनो
पादीयमानं स्वमनस्य तु अस्य चोपादाना तत्स्वत्वं भवत्वित्याकारिका उपादानज
न्यस्वत्वोद्देश्यिका इच्छा उपेक्षा अन्याचोपेक्षा वर्तनेन मम स्वत्वं नस्यत्वित्याकारि
का स्वस्वत्वनाशमात्रोद्देश्यिका सैवापविद्धस्य मूल्येन तत्र पूर्वोपेक्षा यान्तस्यैव उपा
दातुः स्वत्वं परोपेक्षायां तु यस्य कस्यचित् उपादातुरिति विशेषः स संक्षेपश्चाप
विद्ध इति ब्रह्मपुराणं इति संक्षेपः अथ शूद्रापुत्रः स च याज्ञवल्क्येन विशेषतो ना
पतेः यत्र कवचनोत्साहिनो द्वादश इति विष्णुवचनस्य पत्रकवचनऊढायामनूढा
यां वा शूद्रायामिति रत्नाकरव्याख्यानात् परिणीता शूद्रापुत्रस्यापि तयोर्दश
त्वमेव तस्य भागस्तु याज्ञव ल्क्येनोक्तः चतुस्त्रिद्व्येकभागाः स्युः क्रमशो ब्रा
ह्मणात्मजाः इत्यनेनयत्रकवचनेन्यस्य शूद्रायामिति विशेषप्रतिपत्तौ मनुव
शिष्ठवचनैकवाक्यत्वं मूलं मनु यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतं स
पारयन्नेव शवस्तस्मात् पारशवः स्मृतः एतद्वचनं द्वादशविधपुत्रनिरूपण
प्रकरणे एकादशनिरूपणानंतरं लिखितं मनुना पारशव इति शूद्राब्राह्मणयोः
पुत्रस्य संज्ञाः पारयन् पितृत्वाभिमतस्य किंचिदुपकुर्वन् शवः न्यूनोपकारकत्वा
दिति रत्नाकरः पारयन् जीवन्नित्यर्थः अपि शवं भवति वशिष्ठः शूद्रापुत्र एव षष्ठो भव
तीत्याह षष्ठत्वमत्र उत्तरपक्षापेक्षयेति रत्नाकरः बौधायनः द्विजातिप्र
वरात् शूद्रायां जातः कामात् पाराशव इति अत्र च परिणीता शूद्रापुत्रस्यांशः
मनुयाज्ञवल्क्यादिभिरुक्तः इदानीं यं ब्राह्मणस्तु इत्यादिना मनुः इत्यादिना मनुः य
त्रक वचने इत्यादिना च विष्णुरपरिणीतापुत्रमेवाह अनन्तरमेव शूद्रा
यास्तस्यापुत्रभाग उक्तः मनुना तस्मात् संज्ञा ब्राह्मणस्तु इत्यादिवचने ब्राह्मण
परं ब्राह्मणस्त्रियं वैश्यपरं याज्ञवल्क्यस्तु द्विजातेर्दासीपुत्रस्य भागं नोक्त
वान् सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः इत्यनेन भिन्नजातीयस्य
द्विजानां दासीपुत्रस्य अत्यंतापकृष्टस्य भागो मत्यंतरवचनोदर्वसेयः इ
ति व्यजितं इति युक्तमुत्पश्यामः जीमूतवाहनस्याप्ययमेव स्वरसः रत्नाकरधृता
स्मृतिः शूद्रो दासः पारशवो वित्प्राणे विद्यते क्वचित् राज्ञां तु शापयद्ध्यानानि

त्यस्यपवनांतथा अथसंख्यामशीलानांकदाचित्वाभावंनिते अनेनैषांअसं
भवेशंकानिवाक्रियते इतिरत्नाकरः एतेनापत्यांतरस्यत्वेपारशरस्यपु
त्रत्वमेचशंपस्त्रीकाप्पीमित्यापातमितिध्येयं औरसेयदिवापुत्रत्वंवापुत्रि
कासुतः विषयेतत्रतेषांतुविंशेयाः क्षेत्रजादयः श्राद्धादिदासवत्सर्वं
तेषांकुर्वीतिनित्यशः औरसोयदिवापुत्रिकापुत्रोस्तितदाक्षेत्रजादयोवं
शमात्रकराइत्यन्वयः दासवत् दासेतिकर्त्तव्यतयाइतिरत्नाकरः तथाग्
ढोत्पन्नश्चकानीनःसहोढःभइजस्तथा पौनर्भवश्चवैश्यानांराजदण्डभः
यादपि वर्जिताःपंचधनिनःशेषाःसर्वेभवंत्यपि अनेनामुख्यसत्वात्वैश्य
स्यैवउक्तः इतिरत्नाकरः भवंत्यपीत्यपिनाऽमुख्यत्वंतदेवंब्राह्मणेराजनिवैश्ये
चामुख्यपुत्रकरणसंभवतिउक्तः इतिरत्नाकरः तथा शूद्राणांदासवृत्तीणांप
रपिण्डोपजीविनां परायत्तशरीराणांनकश्चित्पुत्रइत्यपि तस्मादासाच्चयः
पुत्रोजायतेदासएवहि तथाचभार्यापुत्रश्चेत्यादिमनुवचनेनदासस्यप्रभु
परतंत्रकथनस्यवक्तव्यतयापुत्रकरणेपि प्रभुपरतंत्रत्वंपुत्रस्यापितथा
प्रभुपरतंत्रत्वंबोध्यं इतिरत्नाकराभिप्रायः मनु० श्रेयसःश्रेयसोऽभावे
पापीयान्रिक्थमर्हति बहवश्चेत्तुसदृशाःसर्वेक्तानांक्षेत्रजादीनांगुणच्युतो
गुणवत्साभावेपापीयान्निर्गुणःद्रव्यमर्हतियत्रतुबहवःक्षेत्रजादयोबहु
विधाःसदृशगुणाःतत्रसर्वएवसमांशभाजोभवंति अत्ररत्नाकरः सदृशा
गुणवत्तयातदुपाधिनावाइतितस्याप्ययमेवाशयः तथाचपुत्रप्रकारनि
लक्षणप्रमनात्कत्वस्यगुणैर्लक्षणप्रमाणैश्चदायाद्याधिकारनियमनमिति
मनोराशयः अन्येषांमुनीनांअप्येतदेवमतं परंतुतेषांक्रमनिरूपणंगुणा
पेक्षयैव इतिकेचित् श्रेयसःश्रेयसःपूर्वपूर्वस्याभावेपापीयान्परःपरःअ
धिकारी अतएवयाज्ञवल्क्यः पिण्डदोंशहरश्चैषांपूर्वाभावेपरःपरः अथ
विष्णुश्चएषांपूर्वपूर्वःश्रेयान्सएवदायहरः सचान्यान् बिभृयात् नारदश्च
पूर्वःपूर्वःस्मृतोज्यायान्जघन्योयोयउत्तरः क्रमादेतेप्रवर्त्तन्तेमृतेपितरितं
द्धने ज्यायसोज्यायसोऽभावेजघन्योयोयआप्नुयात् इतिकुल्लूकभट्टाप्ये
वं आहपराईचमनुवचनस्यव्याचष्टेयदितुसमानरूपाःपौनर्भवादयोब
हवःपुत्राभवन्तितदासर्वेएवविभज्यतद्रिक्थंगृह्णीयुरितिसमानरूपाइ
तिपौनर्भवत्वादिरूपेणसदृशाइतिसदृशपदार्थइतितस्याशयः सदृशागु १०
णवत्तयातदुपाधिनावेतिरत्नाकरेपि उपाधिःपौनर्भवत्वादिरित्याहुरपरे

एतन्मते औरसेनसहकदाचिदपिक्षेत्रजादेः समानत्वंनास्ति एतेनेदंमतंसम्
यक् अत एव ब्रह्मपुराणं समग्रधनभोक्ता स्यादौरसोऽपि जघन्यजः त्रिभा
भागं क्षेत्रजो भुंक्ते चतुर्थं पुत्रिकासुतः इति पितृकृतविभागे पिता औरसायत
त्प्रकारेणोक्तं पूर्णमंशं दद्यात् क्षेत्रजाय पूर्णांशस्य तृतीयांशमिव यथेष्टं भा
गं दद्यं वा यथामतं तस्य योग्यं गृह्णीयात् एवं पुत्रिकापुत्राय चतुर्थं एवमन्येभ्योऽपि य
थापथं बोध्यं क्षेत्रजौरसपुत्रिकादिनामापुत्रसमवाये क्षेत्रजस्यैगुण्यं पुत्रि
कादीनां चैगुण्यं पारि औरसस्य आत्मनश्च न तद्वैगुण्यं यस्मात् भवति तथैव भागं कुर्या
त् अत्र च औत्सर्गिकः याज्ञवल्क्याद्युक्तः द्वादशविधपुत्रविधायक प्रकरणे विप
रीतक्रमस्य लिखनेन क्रमो व्याहृतः गुणागुणवैलक्षण्ये पतु ब्रह्मपुराणाद्युक्त एव याज्ञः
सुः इति ध्येयं अथ पुराणादौ श्रूयते केनचित्पित्रा विक्रीतं पुत्रं शुनःशेपनामा
नं राज्ञा क्रीत्वा देवायवलिदानुद्यतः ततः देवप्रसादात् तस्य वधनिर्मुक्तः विश्वामि
त्रं मुनिं प्राप्तत्वेन वरयामास तत्र शुनःशेपो विश्वामित्रस्य कृत्नापंदत्तः विश्वामि
त्रायपित्रादत्तत्वादिति केचित् तत्सम्यक् दत्त इति जानीहि तथाहि मरणस्यागादिनापि
केनचिन्निमित्तवशेन मातापितृत्वत्वनिवृत्तौ पुत्रस्य स्वदानात् स्वयंदत्त इति त
त्त्वलक्षणं इति संक्षेपः अलं प्रपंचेन अत औरसादीनां द्वादशविधपुत्राणां मध्ये
औरसदत्तेतरे पुत्राः कलौ निषिद्धाः यस्मात् आदित्यपुराणं दत्तौरसेतरेषां तु पुत्र
त्वेन परिग्रहः इत्यादिनाभिधाय एतानि लोकगुप्त्यर्थं कल्यादौ महात्मभिः निवर्ति
तानि कर्माणि व्यवस्थापूर्वकं बुधैः लोकगुप्त्यर्थं लोकनिंदानिवृत्तये इति यावत्
समशकार्थे धूम इति च दृष्ट्वा शब्दो निवृत्तिवादी अर्थोऽभिधेयरैवस्तुप्रयोजननि
वृत्तिषु इत्यमरकोशात् तस्याच क्षेत्रजादिपुत्रकरणे लोकनिंदा स्यादिति भावः
इति पितामहचरणाः केचित्तु लोकगुप्तिर्लोकरक्षा तदर्थं न तत्प्रयोजनाय अ
र्थशब्दः प्रयोजनवाची यथा पान्थीदार इति वत्त तथा च क्षेत्रजादिपुत्रकरणे लोक
विनाशः स्यादिति भाव इत्याहुः पूर्वं कामभावं विहायैव तत्तुल्यायां सुपातुल्यायां
चाभ्यां तु पत्न्यां केवलं भ्रातृवंशमुद्दिश्य प्रवृत्त्या आसीत् इदानीं शिष्टाचारपराय
णां वहस्ति स्त्री सुखदर्शनमात्रेणोद्भावितकामाभावानां भ्रातृवंशोत्पादनच्छले
न पुनःपुनःप्रवृत्तानां लोकनिंदा स्यात् अधर्मबाहुल्येन विनाशश्च स्यात् एवं
पुत्रिकादावपि अनुसंधेयं एवं च अनेकधा कृता पुत्रा ऋषिभिर्ये पुरातनैः नश
क्यास्तेऽधुनाकर्तुं शक्तिहीनैर्विदं तनैः इति बृहस्पतिवचने शक्तिपदेन तपोबलत
पोफलविशेषरूप जितेंद्रियतापि ग्राह्येति एवं च एतेषां द्वादशविधपुत्राणां मध्ये

श्लोकः २०

दत्तकस्य औरसस्यव्यवस्था आदरणीया इदानीमस्माभिः अन्येषांव्यवस्था
लिखनं तु ग्रंथस्यांगसंपत्त्यर्थं ये केचिद्देतादृशवचनानवलोकादिनान्यवि
धपुत्रकरणं स्त्रीकुर्वन्ति न दृश्यमपि यस्योद्देशे इदानीमपि भ्रान्तभाष्मीयां
वंशोत्पादनव्यवहारः केषांचिद्दृश्यते इति अथ मन्तुः सित्रजादीन् सुतान्
तानेकादश यस्योदितान् पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः एते
न क्रियालोपसंभावनयैव दत्तकादेः करणं न तु नन्त्संभवे एवं च औरसवान्
परिदत्तकं करोति तदा सिद्ध्यति न वा अत्र न तत्सिद्धेः किं प्रयोजनं स्यादस औ
रसेन कर्त्तव्यत्वादिति चेन्न अनंतरं औरसमरणे दत्तकेन श्राद्धं कर्त्तव्यं न वेति सं
शयनिरासः प्रयोजनं अत्र केचित् दत्तकादीनां [illegible] प्रतिनिधेश्च मुख्यभाव ए
वमुख्यग्रहणानंतरं इदानीं च मुख्याभावात् दत्तकपुत्रं करणं अ[illegible]सिद्धमिति औ
रसमरणेपि पत्न्यादिनैव श्राद्धं कर्त्तव्यमित्याहुः तन्न प्रतिनिधीनिस्यैन दत्त
कस्यैव प्रतिनिधित्वमुक्तं न तु दत्तककरणस्य अत्र औरसमुख्यस्याभावे स एव
प्रवर्त्तनामित्युक्तो दोषाभावात् अत एव आकूर्निंहत्वे प्रदारपिभ्रान्तमतीन
पः पुत्रिका धर्म्ममाश्रित्य शनरूपानुमोदितः इति भागवतीयश्लोकव्याख्या
ने श्रीधरस्वामिपादैर्मुख्यपुत्रसत्वेऽपि गौणपुत्रकरणे पुत्रबाहुल्यकाम
नायाः प्रयोजकत्वेन पुत्रबाहुल्यफलं स्मृतिवचनेन दर्शितं एष्टव्या बहवः पुत्रा
यद्यप्येको गयां व्रजेत् इति एवं च औरससत्वेपि दत्तककरणे न तत्सिद्धौ दत्तक
करणानंतरं औरसोत्पत्तिस्थले तत्तृतीयांशादिकं तदृत्तकस्य बोध्यं
सर्वे चानौरसस्यैते पुत्रा दायहराः स्मृताः औरसे पुत्र उत्पन्ने तेषु ज्यैष्ठ्यं न विद्यते
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः हीनास्तमुपजीवेयुः ग्रासाच्छादन
संभृताः इति देवलवचनात् दायहराः पूर्णांशहराः तृतीयांशभागिन और
सपुत्रेण पत्न्यध्यं तत्र तृतीयभागैकभागहराः नत्वत्र कीदृशो भागः और
सपुत्रेण योदारश स्तु वर्णीन्मकभागो गच्छते तस्मादेव किंचित्तुः सुवर्णा
न्सग्रहलीया तत्सुवर्णीत्रिकं चानु न दत्तकेन यावद्धनं लभ्यते तद्द्विगुणं और
सेन लब्धव्यमिति अत्रोच्यते यदि औरसलब्धभागादेव तृतीयांशग्रहणं
शास्त्रार्थः स्यात् तदा औरसानां बहुत्वे किं स्यात् सत्येक तृतीयांशग्रहणेनाति
शयधनलाभः स्यात् दत्तकस्य न च समुदायेन मिलित्वा एकोंऽशो भवतीति ए
कस्यापि तृतीयांशभागित्वानुपपत्तेः औरसानां धनाधिक्यात् नापि द्वितीयः
कल्पः तस्मात्सति दत्तकस्यपादरयादिलापत्तेः एवं च मरणे क[illegible]ल्पत्रवादरणीयः ९८

श्लोकः २१

सत्यप्यपि तत्कृतविभागे जीमूतवाहनादिमते पैतामहषट्त्रिंशत्तमां सुवर्णमा
द्वौ औरसौ अष्टादश सुवर्णौ गृह्णीयातां पितार्जितषोडश सुवर्णानरदत्तकश्चतुरः
सुवर्णानिति अत्रौरसभागानां तृतीयांशहरत्वं वचनार्थः केचित्तु एकऔ
रसद्वयसत्ता पित्रार्जितपैतामहधनविभागे समुदायधनं त्रयोदशधा कृत्वा
भागमष्टकं पितुः भागत्रयं भागत्रयं औरसयोः एको भागो दत्तकस्य औरस
लब्धभागतृतीयांशतुल्यभागहरा इति वचनार्थः इत्याहुस्तन्न तृतीयांश
हरत्वस्मान्न तृतीयांशतुल्यहरत्वाप्रसिद्धेः स्पष्टत्वे अनेन औरसत्वेप्युक्तलब्धव्य
मासीत्तस्यैव तृतीयांशोऽस्त्वित्यत्र इति तन्न तत्यास्यस्य वशिष्टांशद्वयस्याप्रा
प्तापत्तेः अवशिष्टांशद्वयस्य पुनर्विभागकरणेऽपि अंशद्वयाशेषस्य नि
वारणीयत्वात् द्वचनेन त्वावत्तबोधयितुमशक्तेश्चेति हीनास्तमुपजीवि
युरिति तत्रैव दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव च अपविद्धाश्च ये पुत्रा भ
रणीयास्ते देवते ब्रह्मपुराणे वचनां संगमयेत्तितत्तन्मतत्याः सति विशेषतो
दत्तकस्य पोषणमात्रस्यैव प्रत्यये तस्मात्तद्वचनं निर्गुण दत्तकादिविषयं औ
रसाविषयगमन्यमतस्त्वेतस्यैव पूर्णांशाद्यधिकारित्वस्य दत्तकादेश्च
भरणादिरूपतृतीयांशहरत्वस्य बोधायनाप्यनन्ते वं यत्रैते अभिहिताः पुत्राः
प्रसंगादन्यवीजजाः यस्य ते वाजीतो जाताः तस्योत्तनेन रक्ष्यन्तु इति मनुव
चनस्य अगत्या औरसे उत्पन्ने द्वचवचनेन तृतीयांशहरत्वकथनेन औ
रसे सति दत्तकादेः भरणपरमात्रविषयकत्वात् औरसवत्ता कृतस्य दत्त
कस्यापि द्विष्यसे उक्तं च कुटुम्बभेदे न क्षयेत्कोरससंप्रयोगे च पुत्रिकायां अवजा
तयोन कर्त्ता ष्याद्यत्यैतत्परमिदं वचनमिति न च साधारणधनं एकेन न देया
मिति वत्कुटुम्बभरणे प्रयुक्तं धनन्नदेयमिति वक्तव्य औरसवतः निषेधपरमि
ति वाच्यं तत्र कुटुम्बभरणोद्देश्य विरोधे न दृष्टकल्पनायाः प्राप्तत्वेन दृष्टसिद्धे
व कल्पनात्मनव चने न करणनिषेधस्याबोधनाच्च नन्याहि दत्तकादयो ये
न्यस्यापि तु भिन्नस्य वीजतः तस्योपलक्षणं स्वमंसे त्रनः स्ववीजान्तस्य संचार
इत्यन्तरं इति वा जातास्तेयस्य वीजतः क्षेत्रतः स्वत्ता जाताः तस्य च पुत्राः न प्रतिग्र
हीत्रादेरिति तथा च दत्तकाद्यसिद्धिरेवायातीति चेत् तत्याबिवचनार्थी सं
गतिः पुत्रवतोऽदत्तायां भसाविव तस्मै दत्ते पुत्रकथं न स्वत्वं स्वत्वे च जाते कथं
न पुत्रत्वं दायश्राद्धाद्यधिकारश्च पूर्वं पुरतो राजा तस्यौरसेव भवति इत्यत्रा
पि न विशेषः पुत्रवतां मनोरेव पुत्रिकाकरणं चस्मर्यते न च साविंघ्यमात्रक्करी

न्तिवाच्यं वंशकरत्वेनैव पुत्रत्वसिद्धौ देवंशसम्पन्नदारापाद्यधिकारस्याचार
णीयत्वात् अतएव रत्नाकरः पश्यतेइत्याश्रित्य एतेन तेषां मुख्यत्वनिषेधेनप्र
तिनिधित्वमेव आपतेन नरस्य मुख्या इति शेषः इति नच स्त्रैजीरीत्यादि
नापौनरुक्त्यमिति वाच्यं तदर्थस्यैव पोषकत्वात् नत्रैवं किं पुत्रप्रतिनिधित्व
मिति चेत् मुख्यपुत्राभावे तत्कार्यकारित्वमित्येवेति भवतु रत्नाकरमते कुल्लूक
कल्पतरुमतेपि एषेव व्यवस्थायां गच्छतेन करणनिषेधाभावस्सूचितः नचैवं सं
तिन्दाचरणे दूरणादृष्टं भवतीति वाच्यं दृष्टार्थकत्वेनैव उपपत्तौ अदृष्टार्थ
कल्पनायां मानाभावात् अत्र च प्रयोजनाभावएव निषेधविध्यर्थः इष्टसा
धनत्वव्यतिरिक्तः दत्तकादिपुत्रं विनापि पुन्नामनरकत्राणातिरिक्तं सन्ता
नवाहुल्यमिष्टं तस्य औरसमत्वेपि दत्तकादय न कर्त्तव्या एवमेव श्रीधर
स्वामिपादैरुक्तं एवं भ्रातृपुत्रसत्वे दत्तकाद्यो न कर्त्तव्य इति रत्नाकर
पारिजातोक्तावपुन्नामनरकत्राणत्रयोमार्थिनः करणनिषेध एव वाध्यः
अतएवउत्तरवतः पाण्डोः पुनर्भीमार्ज्जुनादिषूत्पन्नेष्वपि जपुत्रकरणं भार
णं भारतादौ श्रुतं संगच्छते एवं भ्रातृपुत्रवतोऽपि तस्यार्थेति नच भ्रातृपु
त्रइ स्वत्वस्त्रैहारस्य भ्रातुरेव पुत्रो विरसृतं भ्रातृणामेकजातानामिति मनु
वचनेन नचएकयोज्जीत्तामिस्येदार्थ इति वाच्यं विशेषतात्पर्यग्राहकाभा
वे द्विवचनात्तस्यतत्तुरूपानंगीकारात् नचविधिनिषेधविरुद्धयःपौज्ञेः त
स्याकरणप्रवृत्तिरेव तथा तात्पर्य्यग्राहिकेति वाच्यं वत्सधर्म्मार्थशास्त्रा
द्विनिपुनकामनस्येवतस्यप्रवृत्तेस्तत्रैवोक्तत्वात् पितामहश्च रतोरपि भ्रा
तृपुत्रसत्वे दत्तककरणमुक्तमतं कुल्लूककृष्णदस्तु एकजातानां सर्व्वेषा
तापितृकानामिति व्याख्यातवान् पुत्रस्य पुन्नामनरकत्राणकर्तृत्वमाह
तुर्मीतुविष्णुः पुन्नाम्नो नरकात् यस्मात् त्रायते पितरं सुतः तस्मात्पुत्र
इति प्रोक्तः स्वयमेव स्वयंभुवा हारीतः पुन्नाम निरय प्रोक्तश्छिन्नतन्
तुश्च नैरपः तत्र चैत्रायते यस्मात् तस्मात्पुत्र इति स्मृतः वृहस्पतिः
पुन्नाम्नो नरकात् पुत्रः पितरं त्रायते पतः मुखसंदर्शनेनापि तु दुःखतो
यते ततः पौत्रोप्य पत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ रिक्थे च पिण्डदाने
न समौ संपरिकीर्त्तितौ मनुवशिष्ठौ ऋणमस्मिन् संनयति अमृतत्वं च वि
न्दति तेन चानृणतां याति पितॄणां जीवतां मुखं शंखलिखितपैठीन
सयः पञ्चकचनजातेन पिता पुत्रेणानन्दति तेन चानृणतां याति पितृणां ९२

णां पिण्डदेनैव हारीतः यस्य पुत्रः शुचिर्दक्षः पूर्ववयसि धार्म्मिकः नित्यं
तां चान्तरोषाणां संतारयति पूर्वजान् शंखलिखितौ अग्निहोत्रादयो वे
दाः यत्ताश्च शतदक्षिणाः ज्येष्ठपुत्रप्रसूतेश्च कलां नार्हन्ति षोडशीं पुत्रपौ
त्रप्रतिष्ठस्य बहुपुत्रस्य जीवतः अस्कन्नवेदयज्ञस्य हस्तमासन्नं त्रिपिष्टपं
अस्कन्नवेदयज्ञस्य अलुप्तवेदाध्ययनं यज्ञाद्यनुष्ठानस्य एतत् बहुपुत्रे
ष्वपि अन्वेयं तथाच बहूनां पुत्राणां निजस्य च वेदाध्ययनयज्ञलोपाभावः
प्रतीयते पुत्रबाहुल्यफलं च दृष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेदिति
अत एव पुत्रबाहुल्यकामनाया नानाविधपुत्रकरणं शंखलिखितवि
ष्णुहारीताः पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौ
त्रेण ब्रध्नस्याप्नोति विष्टपं ब्रध्नस्य सूर्य्यस्य याज्ञवल्क्यः लोकानन्त्यं दि
वः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः पूर्वेण पिण्डदानं तु निजमुख्यगौणपुत्रा
दिभिरेव दिवशब्दः स्वर्लोकपरः पर्य्यायवाक्यत्वात् वशिष्ठः अन
न्ताः पुत्रिणो लोका नापुत्रस्य लोकोऽस्तीति श्रूयते अयमनाः सन्त्वदृशः श
त्रमाणपुत्रत्वं महानविनाशस्तेनासाविष्यते लोकः स्वर्गः अपुत्रस्य नास्ति
इति श्रुतिनो बोध्यते यथा च पुत्रेण लोकः प्राप्तिं प्रतीयते तच्च याज्ञवल्क्या
दिवचनः स्पष्टीकृतं अनन्ता इति तु तदेकवाक्यत्वात् पौत्रेण [illegible] वपुत्रपरं
च संतानपरं एतेन पुत्रादेः काम्यतोक्ता पुत्रस्य नित्यता महाभारते अ
दृशः अरनशीला राक्षसानन्नमयं महानपकारो मेन राक्षसा नामगम्यते
इति नास्यप्रीतिरत्नाकरः अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः
पिण्डोदकक्रियाहेतोर्नाम्नोः संकीर्त्तनस्य च कांक्षन्ति पितरः पुत्रान्नरका
पातभीरवः गयां यास्यति यः कश्चित् सोऽस्मान् संतारयिष्यति एतेन स
र्वेषामेव नरकनिस्तारकत्वमाम्नातं गयां श्राद्धादिना सम्बन्धमात्रेण च
तथा वृषोत्सर्गेण या श्राद्धमिष्टापूर्त्तिमेव च पालयिष्यति वार्द्धक्ये स्था
इदंस्य त्रिचान्तरं पर्वविचनेन न भगयागमनमात्रं कथितं अनेन च श्राद्धप
र्य्यन्तं इति [illegible] न पौनरुक्त्यं अन्तरं प्रतिदिनं प्रस्यमाचशपमितिपल्लिनार्थः ए
तच्चपे त्रदिनाभिप्रायेण तथा च मासेन स्यादहोरात्रः पैत्र इत्यमरसिंहस्या
प्यभिप्रायेण वा ० परिच्छेदातीतादिविद्याधारापरिशीलनविमलीकृत
पालधिकुलप्रसूतजाह्नवीसमलंकृतत्रिवेणीनिलयश्रीरुद्रतर्कवागीश
भट्टाचार्य्यात्मजश्रीजगन्नाथतर्कपंचाननकृतविवादभंगार्णवे पंचमे दा ९२
यभागद्वये अनित्यभस्पर्शरत्नं चतुर्थं ॥ ० ॥ ॥

अथनिन्दिता यथाप्लवं कुप्लवेनतरन्मज्जतिमानवः तथापिताकुपुत्रेण तम
तमस्यन्धेनिमज्जति तथाचनित्यनैमित्तिकादिक्रियायराङ्मुखः पुत्रः नपितुरूप
कारी अतस्तस्य धनेनाधिकारी आपस्तम्बः सर्वेधर्म्मेनियुक्ताभागिनोद्रव्यमर्हंति
यस्त्वधर्म्मेण द्रव्याणिप्रतिपादयतिज्येष्ठोपितमभागंकुर्यात् ज्येष्ठोपिप्रतिपादयतीत्य
न्वयः प्रतिपादयतिव्ययतेइत्यर्थः अधर्म्मेणद्यूतादिना अभागंव्ययितांशहीनभाग
मितिकेचिदितिरत्नाकरः तथा चकुटुम्बभरणधर्म्माद्यनुद्देशेनव्ययितं तत्तु तस्मा
दंशतोनिष्कालनीयमितिभावः यद्यप्यधिकंस्वांशतोव्ययितंतदा तस्मिन्नृणवन्दव
तीतिशास्त्रं नास्तिपरंतुतस्यनिरंशता एवयुक्ताइतिइदंकाले नाकुलीकृत्यपठितं य
श्चायस्तु धर्म्मेणद्रव्यंप्रतिपादयतिपादयतितंपितृसमभागंकुर्वितेतितदनाकरमिति
जीमूतवाहनः अन्येतुप्रप्रतिपादयतिउत्पादयतिअर्ज्जयतीतियावत् तथाचध न
लोभातुशास्त्रनुमतिंविना अधर्मजीविकांयआश्रयेत् सनिरंशः अत्रसवर्णापु
त्रोऽन्यायवृत्तोनलभेतैकेषामितिगोतमसूत्रे अन्यायवृत्तः अधर्म्मेणजीवन् सर्वए
वविकर्म्मस्थानार्हन्तिभ्रातरोधनमितिमनुवचनेनचविकर्म्मविरुद्धक्रियाहिंसा
दिवस्तुनिन्दितवृत्तिश्च। मनु। सप्तवि[illegible]नामधर्म्यादायोलाभः त्रयोजयः॥
प्रयोगः कर्म्मयोगश्चसत्प्रतिग्रह एवच। नारदः। पार्श्विकद्यूतचौर्यार्तिप्रतिरू
पकसाहसैः व्याजेनोपार्ज्जितंयच्चतत्कृष्णंसमुदाहृतं कुसीदकृषिवाणिज्यशु
ल्कशात्रानुवृत्तिभिः कृतोपकारादाप्तंचशबलंसमुदाहृतं श्रुतशौर्य्यतपःकन्या
शिष्ययाज्यान्वयागतं धनंसप्तविधंशुद्धंमुनिभिःपरिकीर्त्तितं कुवीकृषिवाणि
ज्यानिवैश्यस्यमाहिका निविप्रक्षत्रिययोराजसानिइतिफलितार्थइत्याहुः मत
यावन्ययोर्भद्राभद्रयोर्विशेषः प्रतिपादयतीत्यस्यार्थगतः तथाहिप्रतिपूर्व
पदधातोर्न्यन्तस्यदानेप्रयोगःशिष्टसम्मतः उसूपर्वस्यचजन्मादावितिसव
र्णापुत्रोपीत्यदिगोतमवचनेऽपिनाकिमुतासवर्णापुत्रइत्याचार्यः नलभेतअं
शमितिशेषः। आपस्तम्ब। वचनेज्येष्ठोऽपीत्यपिनामध्यमादेः परिग्रहः शक्या
यनयान्यायवृत्तत्वाद्यपेक्षयाविकल्पइतिप्रकाशकारः तथाच एकपदं विक
ल्पार्थकं विकल्पश्चव्यवस्थितएवयस्यान्यायवृत्तेरपनयः शःकथःसततुकर्म्मणोऽ
पनयंकृताभागंलभेत यस्यान्यायवृत्तेरपनयोनास्तिसनलभेते[illegible]त्याशयः एक
पदं विकल्पार्थकं गोपीचंद्रोप्याह एकइतिविकल्पार्थकं ननुमतभेदसूचनार्थ
मिति मनु, वचनेविकर्मस्थाइतिद्यूताद्यासक्ताइति कुल्लुकभट्टः कटुम्बार्थेहा

श्लोकः २४

निपराइतितन्येपितुरौर्द्धदेहिकादिकर्मविमुखत्वादिति।जीमूतवाहनः।अत्रद्यूताद्यास
क्तस्यनिर्भागत्वकथनंकेचिदितिकृत्वालिखितंरत्नाकरमतेव्यथितांशहीनभाग
भागित्वपरंज्ञेयंअन्येषांमतेतुद्यूताद्यासक्तानांननिर्भागत्वंकिंतुअधर्म्मजीविका
श्रयिणः इतिमतद्वयेवैलक्षण्यंतत्र द्यूताद्यासक्तस्यनिर्भागत्वंग्रंथकारणांवहू
नांमतमितिविवेचनीयं।पुंस्त्व।लिखितो अपपात्रितस्यत्रस्थपिण्डोदकानि
निवर्त्तन्ते अपपात्रितस्यनृपहिंसादिदोषेणवान्धवैःकृतघटापवर्ज्जनस्येइ
ति।रत्नाकरः।अपपात्रितोभिन्नोदकीकृत इति जीमूतवाहन मतयोरैक्य
मेववृहस्पतिःसवर्णाजोप्यगुणवान्नार्हःस्यात् पैतृकेधने तत्पिण्डदाःश्रोत्रि
याये तेषांतदभिधीयते उत्तमर्णाधमर्णेभ्यःपितरंत्रायतेसुतः अतस्तुविप
रीतेनतेननास्तिप्रयोजनं तयागवाकिंक्रियतेयानधेनुर्नगर्भिनी कोर्थस्तेन
चपुत्रेणयोनविद्वान्नधार्म्मिकः शास्त्रसौर्थार्थरहितस्त्यागोदानविवर्जितः।
आचारहीनःपुत्रस्तुमूत्रोच्चारसमस्तुसः अगुणवानग्रिमवाक्यस्थ एवेघेव
वक्तव्यइतिरत्नाकरः तथाच पितॄणांशोधनादिरेव गुणस्तदभाववानित्य
र्थः।अगुणवान्गुणविरुद्धदोषवानितिस्मार्त्तगुणस्यास्तत्वमुक्तिनैव
उत्तमर्णाधमर्णेभ्यइत्यादिनाउक्तस्यभाविपुत्रस्यनिरर्थकत्वकथनेनऋक्था
नधिकारित्वस्यव्यंजनात्नारदवचनंचैतु समानविषकंवक्ष्यते अपिनाही
नवर्णापुत्रादेःपुत्रप्रतिनिधेश्चसुतरांचुदासः ततुपिण्डदाः अगुणवद
ग्रासाच्छादनदातारइतिरत्नाकरः तथाचश्रोत्रियणांदयाद्यधिकारःअ
गुणवद्ग्रासच्छादनदानंकर्त्तव्यमितिचउक्तमितिभावः श्रोत्रियाइत्युपल
क्षणंतेनसाध्यानुसारेणनित्यनैमित्तिकक्रियाकरणश्राद्धादिकरणशील
स्यपरिग्रहः स्मार्त्तास्तु तत्पिण्डदाधनिपिण्डदाइत्यर्थःइत्याहुःउत्तमर्णा
धमर्णेभ्यइतिउत्तमाणांदेवर्षिपितॄणांऋणानि अधमस्यमनुष्यस्यऋणानि
इतिव्याख्यारत्नाकरमते युज्यतेउत्तमर्णस्यऋणाप्रयोगकर्त्तुर्यानिऋणानि
स्वभावतोऽधमानितेभ्यइतिहलायुधमतेयुज्यते विपरितेनतत्राणपराङ्मु
खेनप्रयोजनाभावकथनेनैवऋक्थानधिकारोव्यञ्जितःउपकारकस्यैवऋ
क्थग्राहित्वस्यशास्त्रेकथनात् एतदेवसदृष्टान्तमाहतयागवेत्यादिविद्वान्
धर्माधर्मज्ञानवान्धार्मिकःधर्म्मवान् अत्रधर्माधर्मज्ञानवतोगर्भिणीतुल्य
त्वं धर्मवतोधेनुतुल्यत्वंशास्त्रशौर्यार्थेतिवर्णत्रयपरंक्रमेणतपद्धत्यादिसर्वे ८४

षां आचारः शास्त्रानुसारेण धर्म्माचरणं मूत्रोत्सर्गसमइति इन्द्रियद्वारा यथा मूत्रं पुरीषंच
निःसरति तथायमपि वीजरूपेण निःसृत इति भावः तथाच निर्दोषस्यापि स्वशास्त्रानु
सारेण विहितक्रियामकुर्वतः अनंशित्वं इत्यायातं अन्यथा तत्स योजनाभावकथ
नवैयर्थ्यात् दोषश्च अतिशयपरद्रोहादिः नन्वत्र दोषपदेन विहितक्रियाविमु
खत्वमेव विवक्षितमिति चन्नहि। स्मार्त्तरत्नाकरयोरैकमेव अत्रेदमवधेयं अ
त्र निर्गुणत्वं देशकालोचितनित्यक्रियापराङ्मुखत्वं अनंशिताप्रयोजकं इदं शावि
ध पुत्रप्रकरणे यन्निर्गुणत्वमुक्तं तत्तु काम्यकर्मविमुखत्वं अपकर्षप्रयोजकं इति। नारदः
॥पितृद्विट् पतितः षण्डो यश्च स्यादपपात्रितः औरसा अपि नैते शाल भेरन् क्षेत्रजा।
कुतः दीर्घतीव्रामयग्रस्ता जन्मोन्मत्तान्धपङ्गवः भर्त्तव्याः स्युः कुलस्यैते तत्पुत्रास्त्वं
शभागिनः पितरं यो द्वेष्टि स पितृद्विट् द्वेषश्च पितरि मारणादिभवः मृते तु तदुद्देशेन
उदकादिदानाभावरूपः अपपात्रितः राजवधादिदोषेण कृतघटापवर्ज्जनः दीर्घरोगय
स्मादिती व्रं कुष्ठादि भर्त्तव्याः पोषणीयाः कुलस्य भ्रात्रादेरिति। रत्नाकरः॥
प्रकाशकृतातु उपपातकीति पठित्वा उपपातकैर्युक्त इति विवृतं। जीमूतवाहन
स्मार्त्तौ। भ्यान्तु औपपातिक इति पठितं उपपातिकैर्युक्त इति तदर्थः। कल्पतरौ॥
तु अपपात्रित इति पाठः तत्रापपात्रितस्य भागानर्हत्वं शंखलिखितवचने व्यक्तं उप
पातकिनो भागानर्हत्वं अभ्यास एव उपपातकैरिति वहुवचनमुपन्यस्तं पातित्यं
चानुपातुकादावेव इति ज्ञेयं पितृद्विडित्यनेन श्राद्धादिपराङ्मुखस्यानंशित्वकथना
त्। वृहस्पति। नैकवाक्यत्वं अन्नदानादिना नागुणवतोपि श्राद्धादिपराङ्मुख
त्वे भागानर्हत्वमित्यवैधयं जन्मोन्मत्तेति एतेन धातुवैषम्यादिवशात् आधुनि
कोन्मादजननेन भागानर्हत्वं आधुनिकान्धादिवदिति लक्ष्यते। विवादचिंतामणौ
॥वुजडोन्मत्तांधपंगव इति पाठः जडो निर्विवेक इति व्याख्यानंच॥ तत्पुत्रास्त्वंश
भागिन इति तथाच एतेषां पुत्राः पौत्रविधया भागं गृह्णीयुः अत्र तत्पुत्राणाम
पितामहशालेतत्पौत्राणां प्रपौत्रविधयांशग्राहित्वं तेषामपितामहशालेतत्पुत्राणां
अंसग्राहित्वे प्रमाणं न लक्ष्यते अत्र च पतितस्य पुत्रो नांशंप्राप्नुयात् तदाह देवलः
॥मृते पितरि न क्लीवकुष्ठन्मत्तजडान्धकाः पतितः पतितापत्यं लिंगी दायांशभा
गिनः तेषां पतितवर्ज्जेभ्यो भक्तवस्त्रं प्रदीयते तत्पुत्राः पितृदायांशं लभेरन्नु दोष
वर्ज्जिताः मृते मृतेपीत्यर्थः लिंगी अतिशयेन कपटव्रतधारीति॥ रत्नाकरः॥०॥
जीवतो धने पुत्राणामधिकारस्य स्वतः सिद्धत्वात् मृत इत्यस्य वैयर्थ्यं अतो अपिका

र पूरणंइतिभावः कुष्ठीअकृतप्रायश्चित्तः कृतप्रायश्चित्तस्य पापाभावादेशित्वंपा
पस्यैवानंशितामूलत्वादिति सांप्रतं एवंचेद्राजयक्ष्मादिमतोपिअकृतप्रायश्चित्तस्यैवा
नधिकारः नचपापिनामनधिकारः पतितत्वुल्यनेनैवोक्तः पुनः कुष्ठ्युपादानेनचकुष्ठ
व्याधेःस्वरूपतः अनंशिताप्रयोजकत्वंवोध्यतेइतिवाच्यं कुष्ठ्यादिव्याधिमतः प्रा
यश्चित्तोपदेशोवैदिककर्म्माधिकारार्थइति इतिस्मा र्त्तस म्मतेनवैदिकक्रियाधि
कारवत् धनाधिकारस्यापितुल्ययुक्त्याप्राप्तेः नहिश्राद्धादिवैदिकक्रियाधिकारि
णः पुत्रस्यदायानधिकारोऽन्यत्र दृष्टपुनर्हयादानंचकुष्ठिनोऽपितत्वात् अधिका
रेप्राप्तेतन्निवासः ननुकुष्ठिनः पापशेषत्वेपिगुरुतरपापवत्वात् पतितत्व मेव
नचयत् शरीरंधारयताजीवेनकृतंपापं ततुशरीरमेवपापितत् शरीरधारि
णएव पातित्वंअस्यतुशरीरांतरेणपापस्यकृतत्वात् नैतत् शरीरधारिणः
पतितत्वंइतिवाच्यंतादृशकल्पनेप्रमाणाभावदितिचेत् वैदिकक्रियानर्हत्वया
त्वलौकिकनिष्ठोभयप्रयोजकधर्म्मस्यैव पापित्व पदार्थत्वात् अत्रचकुष्ठंनपारलौ
किकानिष्ठप्रयोजकंततु पापंचनवैदिककर्म्मानर्हताप्रयोजकं वस्तुतस्तत् पाप
वतोपिकुष्ठाद्यनुत्पन्नौवैदिककर्म्माचरणात् ननुज्ञातपापस्यैववैदिकक्रिया
नर्हत्वप्रयोजकत्वं अतएव तस्मिन्नेवजन्मनिदैवात् कृतंपापमज्ञानतोवैदिकक
र्म्मासिद्धिर्भवतीति एवंकुष्ठस्यवैदिककर्म्मानधिकाप्रयोजकत्वं तदाधनानधिका
रप्रयोजकत्वंतस्यैवकथंनस्यात् यत्वन्यथाप्रायश्चित्तोपदेशवैफल्यात् कृतप्रा
यश्चित्तस्यवैदिकक्रियाधिकारइव विनिगमनाविरहात् धनाधिकारोपिभव
त्विति तदपिनरुचिरंजन्मांतरेकुष्ठाद्यनुत्पत्त्यर्थमेवप्रायश्चित्ताचरणंइत्युक्ते
रनिवार्य्यत्वात् । नव्यवाचस्पतिभट्टाचार्य्यस्तु । महापातकंयत् शरीरावच्छे
देनकृततस्यैवाप्रायत्यंअतएवऐहिकब्रह्मप्रपतेर्दाहनिषेधात्जन्मान्तरी
णतत्पापवतएवसहमरणेनोद्धारइतिस्मार्त्तैःकिंसंगच्छते। यदिच महापा
तकिनापरिगृहीतानांसर्वेसामेवशरीराणांअप्रायत्यंस्यात् तदाजन्मान्तरीण
पापवतोऽपि अदाह्यतया। स्मार्त्त । लिखनासङ्गत्यासहमरणेनब्रह्मघ्नपतिपू
तत्वंनस्यात् नचजन्मान्तरीणपापस्याज्ञातत्वेन पातित्यनिश्चयाभावात् दाहएवकु
ष्ठादिनातन्निश्चयेतुअदाह्यत्वमितिवाच्यंअशौचवन् नु अत्रापिनिश्चयापेक्षायां
प्रमाणाभावात् नहिकृतंमहापातकं अज्ञानन्तं यदिकोपियाजयेत् तस्यपापंन
स्यात्अतएववहुजनसम्वलितेनपं क्तौभोजनेपतितसंसर्गशंकयाजलंरेखा

द्विनायद्धिः भेदकरणमुक्तं । मुनिभिः नचैतत् । स्मार्त्तभट्टाचार्यस्य नमतं परंतु निश्चि
तपापवत एवादाह्यतादि अज्ञानब्रह्मघाताादिनाायजने पापं नभवत्येवजलरेखा
दिनापंक्तेर्भेदकरणं पापमपलंपतः संसर्गशंकयाइतिवाच्यं तथास जन्मान्त
रीणत्वस्यव्यर्थत्वापत्तेः । यत्तुजन्मान्तरीणंगु सं यस्येतिजन्मान्तरीणंइहलोकेवि
दितं ऐहिकंइतिश्रुतपेत्तिमालम्बन्तेतन्नतादृशाकुस्टष्टौनिवन्धकारतातुपर्य्यक
ल्पनस्यायोग्यत्वात् एवंपापंकृत्वाऽज्ञानतोदाहेपापमपलपतोदाहइवदाहकानां
पापंस्वीकार्य्यमेवइत्याह तदपिन रूचिरतामादधातिनहि निवंधकारवाक्यमा
कल्पय्यैवयुक्तिं मुनिवचनंचविनावस्तुसाधयितुंशक्यते निवंधकारवाक्यस्य च
यथाकथंचितुपपत्तिसंभवात् यथाब्राह्मणोवलवानुपुरुषस्ताडनननंताडनच्छे
दनादिकं विनाकरचरण निःक्षेपमात्रएव भवतितद्वज्ञानमेवभवतिअतोजन्मा
न्तर पर्य्यन्तानुसरणं नचपातक निश्चय एवादाह्यताइत्यत्र प्रमाणाभावस्त
थाच ब्रह्मघ्नस्यदाह संपत्यर्थमेव यत् शरीर धारिणापापंकृतंतत् शरीरस्यै
वाश्राय त्वंकल्पतेइतिवाच्यंसहमरणस्यब्रह्मघ्नपतिपूतत्वफलरक्षार्थंनैमि
त्तिके निमित्तनिश्चयस्यैवनिषेधेपिनित्त निश्चयस्याधिकारत्वस्यैवयुक्तत्वात् ।
युज्यतेहि एकादशीमज्ञानतोभोजने प्रवृत्तिः नचैवंतत्र पापं नस्यातुइतिवाच्यं शि
वरात्रिमज्ञानतोपिदैवाद्भु पोषितस्यपु एयवत् अज्ञाननिमित्तमपिकृतं निषि
द्धंकर्म्मपापंजनयतीतिवक्तव्यत्वात् उक्तंहितेनैवत्रीणिदेवाः पवित्राणिब्रा
ह्मणानामकल्पयन् अदृष्टमद्भिर्निर्निक्तं यच्चवाचाप्रशस्यतेइतिमनुवच
नात् अज्ञातन्तुसदाशुचि इति । याज्ञवल्क्यवचनाच्च अप्रायत्येज्ञातेपिअ
ज्ञातकृतंकर्म्मसिद्ध्यतीतिअतोऽज्ञातपातकस्यदाहःसिद्धत्येवकिन्तु दाहकानां
पापंभवतीतियंदिच शास्त्रादिनाप्राक्तनपातकान्मेदानीं कुष्ठंजातंइतिज्ञानं वि
रहिणः वैदिककर्म्मानधिकारायकुष्ठस्यापिवैदिकक्रियानर्हत्वप्रयोजकत्वंव
क्तव्यंनहिशास्त्रमूढंवैदिककर्मानधिकारायैवकोपितयापूर्वजन्मनिपातकंकृ
तमितिकुष्ठेनानुमीयतेइतिब्रूयादितिउच्यते तदास्तुकुष्ठस्यापितत् प्रयोजकत्वं
काक्षतिःकुष्ठादि निश्चितस्यपापस्यवैदिकानर्हत्वंप्रयोजकत्वंकेनवारणीयंमहा
पातकोत्पत्त्यवच्छिन्न शरीराप्रायत्यवादिना । वाचस्पतिभट्टाचार्य्येण अतिपा
तकचिन्हगलत्कुष्ठ अधिकरणशरीरस्याप्रायत्यंस्वीकृतमेवतत्र पापनाशेन
एवतन्नाशाच्च गलत्कुष्ठस्यानिशायत्वमाह । भविष्यपुराणे । शृणुकुष्ठगणंविप्रउ

न्तरोत्तरतोगुरुं विचर्चिका तु दुश्चर्म्मा चर्म्मदरीयस्तृतीयकः विकच्छुर्व्रणताम्रौ च कृष्ण
श्वेते तथाष्टकं एषां मध्ये तु यः कुष्ठी गर्हितः सर्वकर्म्मसु व्रणवत् सर्वगात्रेषु गण्डे
भाले तथा नासि तथा। मृतेत्वस्याप्यपेन्नीर्थे अथवा तरुमूलके। न पिण्डं नोदकं कुर्या
न्न च दाहक्रियां चरेत्। षण्मासीयत्रिमासीयो मृतः कुष्ठी कदाचन। यदि स्नेहाच्चरे
द्दाहं यतिश्चान्द्रायणं चरेत् एषामष्टानां कुष्ठानां मध्ये सर्वकर्म्मसु अनधिकारी स
उच्यते इति शेषः। व्रणवत् सर्वगात्रेषु अथवा गण्डे भाले तथा नसि। उपलक्षणत्वा
त् अन्यस्मिन् कुत्रचित् अङ्गे वा व्रणवत् यत् कुष्ठं तद्वान् सर्वकर्म्मसु गर्हितः अ
थवा सर्वगात्रेषु गोवृषन्यायात् गण्डाद्यतिरिक्तेषु गण्डादिषु च यत्र कुत्रचिदित्य
र्थः अथवा सर्वगात्रान्यतमगात्रेषु व्रणवत् इत्येकः गण्डाद्यन्यतमे व्रणान्तरोक्ताः
ताम्रकृष्णश्वेताः स्फुटतरा इत्येकस्तदन्यतमवानित्यर्थः षण्मासीय त्रिमासीय
इति पूर्वमते अन्येषां सप्तानां षण्मासोत्तरं गलत्कुष्ठिनां तु त्रिमासोत्तरं मरणे अ
दाह्यता दायानधिकारश्च तदैव अथवा गात्रगलत्कुष्ठे त्रिमासोत्तरं केवल ग
ण्डादौ तु षण्मासोत्तर मित्यर्थः अथवा यत्तु किंचिद्गात्रे गलत् कुष्ठे षण्मासो
त्तरं गण्डादि विशेषगात्रस्फुटताम्रादिकुष्ठे त्रिमासोत्तर मित्यर्थः अत्रोच्यते प्रा
यश्चित्तोत्तरं पापनाशात् कुष्ठिनवृत्तिरस्तु विशेषोपादानवलात् कुष्ठिनः कृतप्रा
यश्चित्तस्यापि अदाह्यत्वं स्मार्त्तैर्नाभिप्रेतं न वा शूलपाणिना तथा च अदाह्यत्व
निवृत्तौ न वैदिकक्रियाधिकारः तस्मिंश्चासिद्धे तुल्ययुक्त्या दायाधिकारसिद्धिः
कुष्ठिनः पुनर्ह्य यदानं च गोवृषन्यायात् अस्यानुमेयपातित्यवलात् अल्पबुद्धिभि
र्झटिति पातित्यप्रत्ययो न भवतीति झटिति शब्दः प्रत्ययार्थ— एवं — — दी
र्घतीव्रामययोरपीति — ज्ञेयं नहि कुष्ठिनः पुनरुपादानमात्रबलेन स्मार्त्तादीनां
मत विघटनं संभवतीति यत्तु तत् पापस्य ब्रह्महननादिजन्यत्वेपि पातित्यप्रयो
जकत्वं अतः पतितपदेन कुष्ठ्युपादानासंभवात् पृथक् कुष्ठ्युपादानं न च त
त् पापस्य बहुतरभुक्तशेषत्वेपि तज्जातीयत्वमस्त्येव अक्षय एव श्यावदन्तादी
नामदाह्यता स्मार्त्तानुमता संगच्छेतेइति वाच्यं तथा सति द्वादशवार्षिक प्रायश्चि
त्तस्य कर्त्तव्यतापत्तेरिति तत्पापेन यावन्तः क्लेशाजननीयाः भोगेन तन्मध्ये
बहुषु क्लेशेषु वृत्तेषु अवशिष्टक्लेशभागहारेणैव प्रायश्चित्तस्य मुनीनां संकल
नादिति पतितः पातककर्म्मकर्त्ता एव वाच्यः अन्यथा पतितापत्यस्य पतितपदेनै
वोपादानसंभवे पतितापत्यमिति व्यर्थं स्यात् तथा चायं न पातकैककर्म्मकर्त्ता न तु भूरी ६६

रेणतत्कर्म्मणोऽकृतत्वात् यदि च कर्म्मणः अचिरस्थायित्वात् ब्रह्महननाद्युत्तरं दि
दिनद्वयेषु गतेषु धनाधिकारित्वाद्यापत्तिभियात् कर्म्मजन्यपापवतोऽनधिकारित्वं वक्तव्यं इति
विभाव्यते तदा कुष्ठिपुत्रस्यापि अनधिकारित्वापत्तिः तस्मात् शरीरक्रियादेरेव पापहेतुत्वात्
यत्तु शरीरक्रियया पापं कृतं तत्तु शरीरधारिण एवानधिकारः तत्र च कुष्ठिनो भिन्नशरीरत्वेपि
पापस्थितिपर्य्यन्तं अनधिकारप्राप्तये पृथक् कुष्ठ्युपादानं नन्वेवं श्यावदन्तादेरकृतप्रायश्चि
त्तस्यापि दायाद्यधिकारित्वापत्तिरिष्टापत्तौ च स्वल्पकुष्ठिनः श्यावदन्तसमशीलपापिनः अ
नधिकारित्वेन वैषम्यमितिचेत् कुष्ठिपदेन गलत्कुष्ठिन एव ग्रहणं स्वल्पकुष्ठिनः श्यावद
न्तादेश्च दायाद्यधिकारो वर्त्तत एव अतएव भविष्यपुराणे एषां मध्ये तु यः कुष्ठी गर्हितः सर्व
कर्म्मसु इत्यनेन विशेषकुष्ठिन एव गर्हितत्वकथनेन अदाह्यतापि तस्यैव बोध्यं नच तथापि
कुष्ठ्युन्मत्तेत्यत्र कुष्ठपदस्य पापवतिलाक्षणिकत्वे प्रमाणाभावेन कृतप्रायश्चित्तस्यापि म
हाकुष्ठिनो वचनबलादनधिकारित्वमस्तु इति वाच्यं पूर्णपापवतः कृतप्रायश्चित्तस्याधिकारे विशे
षपापवतः कृतप्रायश्चित्तस्यानधिकारे विध्वमशिष्टत्वापत्तेः नहि रोगो धनाद्यधिकाराभाव
प्रयोजकः किंतु पापमेव इति पितामह मतमवलम्ब्योक्तं स्मार्त्तमते श्यावदन्तादीनां स्वल्प
कुष्ठिनश्च प्रायश्चित्तेऽकृते दाह्यत्वं धनाधिकारश्च नास्ति अस्यापि महापातकवत्वात् महापा
तकिनो ये च पतितास्ते प्रकीर्त्तिता इति वचनात् नन्वेवं कुष्ठपूर्वदग्धोत्पन्नस्य तत्पुत्रस्य पति
तायत्त्वेनानधिकारापत्तिर्नवेष्टापत्तिः शिष्टाचारविरोधात् नच पतित इत्यत्र पतितपदं
पातककर्म्मविशिष्टशरीरधारिपरं इति वाच्यं अथवा धानोच्चरितयोः पतितपदयोर्विभि
न्नार्थकल्पने प्रमाणाभावादितिचेन्न अत्र पतितपदद्वयमेव पातककर्म्मविशिष्टशरीर
धारिपरं एतदर्थमेव कुष्ठिनः पृथगुपादानं एवं च। ब्रह्मपुराणे महापातकिनो ये च पतिता
स्ते प्रकीर्त्तिता इत्यनेन पतितत्वमुत्कीर्त्य पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसंचय इ
त्यनेन पतितानां दाहनिषेधेन तदेकवाक्यतया भविष्यपुराणे कुष्ठिनां दाहनिषेधः पति
तानामेव तत्र पातित्यं महापातकादिमतमेव तथा च कृतप्रायश्चित्तस्य पातित्याभावात्
दाहादौ प्राप्ते वैधक्रियाश्राद्धादेरपि प्राप्तिः तत्पाशौच दायाधिकारप्राप्तिः नन्वेवं श्या
वदन्तादेरकृतप्रायश्चित्तस्य तुल्ययुक्त्या दायानधिकारो भवति स च न वचनेन बोध्यते इ
तिचेत् दीर्घतीव्रामयग्रस्तजन्मोन्मत्तान्धपंगव इति नारदोक्तेर्नो वतस्य दायानधिकारो
बोध्यते श्यावदन्तादेरपि व्याधिपदसमानपर्य्यायामयपदवाच्यत्वमाह शातातपः।
महापातकजं चिह्नं सप्तजन्मसु जायते ॥ बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः। कुष्ठं
च राजयक्ष्मा च प्रमेहो ग्रहणी तथा। एतेन महापातकजचिह्नस्य व्याधित्वमुक्तं विष्णुना च श्या

वदन्तस्यापिमहापातकजचिह्नत्वमुक्तं यथा अथनरकानुभूतदुःखानांतिर्यक्त्वमुत्तीर्णानां
मानुष्येलक्षणानिभवन्तिकुष्ठ्यतिपातकीब्रह्महायक्ष्मीसुरापःश्यावदन्तकःसुवर्णहारीकुन
खीगुरुतल्पगोदुर्म्मीइत्यादिदेवलवचनेचकुष्ठिपदंतेषामुपलक्षणंवक्ष्यमाणवचनेषुचप्रायो
रोगव्याधिशब्देनोपादानात् नन्वेवंप्रमेहणीवतोरपिअनधिकारप्रसंगइतिचेत् प्रमेहग्रहिण्या
देर्धातुवैषम्ये ऽपिसंभवः अतिपातकचिह्नत्वनिर्णयेतुदीर्घतीव्रामयग्रस्तेत्यादिनारदवचनोक्त
त्वादिष्यतएव एवं आधुनिकोन्मादादावपि नैचवं एषांमध्येतुयःकुष्ठित्यादिनाविशेषोपादा
नंव्यर्थमितिवाच्यंस्वल्पकुष्ठ्यादीनांनित्ये ऽधिकारो ऽस्तिमहाकुष्ठिनस्तुनित्येप्यधिकारोनास्तिइ
त्येवविशेषादितिध्येयं अत्रचनानाबुधानांकुष्ठिनोदायाधिकारेविवादनिराकरणायनानाको
टिप्रदर्शनंकृतं फलंतुमहाकुष्ठिभिः कृतप्रायश्चित्तस्यदायाधिकारो ऽस्तीतिउभयोरेवमतं
स्वल्पकुष्ठराजयक्ष्ममधुमेहश्यावदन्तादिदुश्चिकितु सामयविशिष्टाणामकृतप्रायःश्चि
त्तानांदायाद्यनधिकारित्वंस्मार्तादीनांमतं तेषांदायाद्यधिकारित्वंइति ।पितामहचरण
नांमतंकुष्ठीअकृतप्रायश्चित्तइतिभवदेवइतिसंक्षेपः देवलवचने ऽन्मत्तोजन्मोन्मत्तः ना
रदैकवाक्यत्वात् जडोधर्मकृत्यनिरूतसाहइतिस्मार्ताः जडोबुद्धिविकलइत्यपरे ।अन्धो
जन्मान्धःनारदैकवाक्यत्वात् पतितःब्रह्महननादिकंकृत्वाअकृतप्रायश्चित्तविमुखश्च स्वध
नाधिकारध्वंसे पतितस्यप्रायश्चित्तवैमुख्यंसहकारीतिस्मार्तोक्तिपैतृकधनाधिकारेपिप्राय
श्चित्तवैमुख्याभावस्यसहकारित्वं युक्तंपितामहचरणास्तुपतितस्यस्वधनाधिकारध्वंसेप्रा
यश्चित्तवैमुख्यंसहकारीतिस्मार्तोक्तेः पैतृकधनाधिकारेपिप्रायश्चित्तवैमुख्याभावस्यसह
कारित्वंयुक्तंपितामहचरणास्तुपतितस्यस्वधनाधिकारध्वंसेप्रायश्चित्तवैमुख्यंनहेतुःधनसा
ध्यप्रायश्चित्तादिकन्तुपातित्यदशायामेवपुत्रादितो ऽन्यतोवाभिक्षितधनादेवसंभवति
नहिपातित्यदशायामर्जितधनेपातित्यात् स्वत्वंनश्यतीतिवक्तुंयुज्यतेपतितस्यभोजना
र्थंसर्वदास्तेयप्रसंगयात् परन्तुपुत्रादिर्यदितस्यधनंगृहीत्वाप्रायश्चित्तार्थंधनंनद दा
तितदादापयेदितियुज्यतेइत्याहुः तन्मते ऽत्रापिप्रायश्चित्तवैमुख्यानुसरणं नास्तीतिवि
भावनीयं पतितापत्यंपतनीयेकर्म्माणिकृते ऽनन्तरोत्पन्नमपत्यंविष्णुवचनैकवाक्यत्वात्
।लिंगीअतिशयेनकपटव्रतधारीइतिरत्नाकरः विष्णुपतितक्लीवेत्याद्यभिधायते
षामेवौरसानतुपतितस्यपतनीयेकर्म्माणिकृते ऽनन्तरोत्पन्नाःप्रतिलोमासुस्त्रीषु उ
त्पन्नाश्चाभागिनस्तत् पुत्राःपैतामहेप्यर्थेतेषांपूर्वोक्तानांऔरसाइत्युपलक्षणंक्लीवस्यऔ
रसासंभवात् भागिनइतिपूरणीयंतत्रपतितपुत्रस्यविशेषमाहनन्विति प्रतिलोमास्विति
क्षत्रियादेर्ब्राह्मण्यादिषुभार्यासुब्राह्मणादिवैश्यादिविवाहानन्तरंविवाहादितासुक्षत्रि — २९

यादिषु चेत्यर्थः अत्र तत्सन्ततेरपि भागानर्हत्वमाह तत्पुत्रा इति पैतामहे इत्युपलक्षणं प्रपि
तामहधनस्येति केचित् अपरे तु पैतामहे इति दर्शनात् तत्पौत्रस्य प्रपितामहधने ऽधिकारं वदंति
अत्र वैलक्षण्यग्राहकं प्रमाणं नास्तीत्यालोचनीयं बौधायनः अतीतव्यवहारान् ग्रासाच्छादनैर्वि
भृयुरन्धजडव्यसनिव्याधितांश्चाकर्म्मिणः पतिततज्जातवर्ज्जं । अतीतव्यवहारान् अप्राप्तव्यव
हारान् इति रत्नाकरः व्यवहारमुपेक्ष्य पारलौकिककर्म्ममात्रालम्बनेन स्थितानित्यपि वक्तुं शक्य
ते इति ध्येयं ग्रासाच्छादनैर्विभृयुरिति रत्नाकरमते तस्यां शुंवं धुक्षिप्य तस्मादेव इति ध्येयं अंधो जन्मा
न्धः व्यसनं विपदि भ्रंशो दोषे कामजकोपजे इत्यमरः तथा च धर्म्मतो भ्रष्टान् द्यूताद्यासक्तान्
कामजदोषग्रस्तान् वेश्याद्यासक्तान् कोपजदोषग्रस्तान् सतत परापकारशीलान् विभृयुः
भरणेनैव तेषां निरंशत्वमायातं ब्रह्मपुराणे पाषण्डाः क्रूरबुद्धय इत्यनेन क्रूरबुद्धयः पर
द्रोहशीला इति स्मार्त्तव्याख्यानेन च परद्रोहिणामदायत्वे सिद्धे दायानधिकारित्वमपि युज्य
ते इति ज्ञेयं व्याधितान् कुष्ठ्यादीन् अत्राकर्म्मिणः धर्मकर्मयागादिषु अनधिकारिणः तथा
चाहुः यज्ञार्थं द्रव्यमुत्पन्नं तस्मात् द्रव्यं नियोजयेत् स्थानेषु धर्म्मजुष्टेषु न स्त्रीमूर्खविधर्म्मि
ष्विति मुर्खो गायत्रिरहितः गायत्र्यर्थाज्ञानीति रुद्रधरः । विकर्म्मी सन्ध्यावन्दनादिरूपनि
त्यकर्म्महीनः अत्र स्त्रिया यज्ञायोग्यत्वं वेदानधिकारात् मूर्खविकर्म्मिणोर्यज्ञायोग्यत्वमा
ह्निकक्रियाहीनस्य मूर्खस्य स्वंमहारोगिन एवंच यथेष्टाचरणस्याहुर्मरणान्तमशौचकं तथा
चैषां मरणपर्यन्ताशौचकथनात् अशुचिसाध्ययज्ञायोग्यत्वं सूचितं जीमूतवाहनस्तु अक
र्म्मकर्म्मिण इति पठति तन्मते द्यूताद्यासक्ता अकर्म्मकर्म्मिण इत्यस्यैवार्थः पतिततज्जा
तवर्ज्जमिति तथा च पतितादेर्भरणस्यापि वर्ज्जनेन अंशस्य सुतरां वर्जनमायातमिति
भावः । मनुः । अनंशौ क्लीवपतितौ जात्यंधबधिरौ तथा उन्मत्तजडमूकाश्च ये च केचि
न्निरिन्द्रियाः सर्व्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणः ग्रासाच्छादनमत्यन्तं
पतितो ह्यददद्भवेत् यद्यर्थिता तु दारैः स्यात् क्लीवादीनां कथंचन तेषामुत्पन्नतंतू
नामपत्यं दायमर्हति अत्र जात्यंधेत्यत्र जातिग्रहणेनान्धस्याप्रतिसमाधेयतामाहनो
त्पत्तिकत्वं जड आत्मपरविवेकशून्यः निरिन्द्रियग्रहणेन पंग्वादयः श्रोतस्मार्त्तक्रिया
नधिकारिणः गृह्यंते सर्व्वेषामपि क्लीवादीनां अत्यंतं यावज्जीवं यद्यर्थितेत्यादि क्लीवा
दीनामित्यत्रातद्गुणसंविज्ञानो बहुव्रीहिः क्लीवस्यापत्योत्पादनायोग्यत्वात् प्रकारा
कारास्तु क्लीवत्वं व्यग्रे अपने यद्दोषप्रयुक्तं अपत्योत्पादनाशक्तत्वं विवक्षितं नातो ऽतद्गु
णसंविज्ञानबहुव्रीहिं मन्यन्ते इति रत्नाकरः जातिग्रहणादित्यादि । अयं भावः अचिकि
त्स्यरोगात्तामर्त्तव्या इति वत् अचिकित्सान्ध्यादिमानपि भर्त्तव्य इति कुल्लूकभट्टस्य
मतं यथाह सः नपुंसकपतितगर्भान्धश्रोत्रविकलोन्मत्तधर्म्मनिरुत्साहवाक्यरहिता।

येचेतिजीमूतवाहनस्तुजातिपदमन्धबधिराभ्यां संबध्यतेइत्युक्तवानुमृते पितरि नक्लीवेत्यादि
प्रागुक्तदेवलवचनव्याख्याने अन्धोजात्यन्धः जात्यन्धबधिरौ तथेत्येकवाक्यत्वादिति भावः
व्यवहारस्तु आधुनिकवधिरस्याचिकित्सनासम्भवेपिदायग्रहणमिति दृश्यते अंधस्यापि
तथाश्रूयते तथाचजन्मान्धोजन्मबधिरश्चज्ञेयः नारदेनतुस्पष्टमेवोक्तः जडइत्यादि अ
ज्ञानात् नतुपरमज्ञानात् निरिन्द्रियेत्यादिना इन्द्रियसामान्यहीनः तथासति अंधबधिरयोः
पौनरुक्त्यापत्तेः किन्तु एकैकेन्द्रियहीनः यथाहस्तहीनः पादहीनः एवंचान्धादेः पुनरुक्ता
दानं गोवृषन्यायात् पादहीनः पंगुरिति फलितार्थः सर्वेषामित्यादिवचने सर्वेषां क्लीवादी
नां ग्रासाच्छादनं यावज्जीवं दातुं न्याय्यमित्यन्वयः पतितइत्यादिस्मरत्विच्छयाऽददताद्
पयेदिति बोध्यं अतः एतसंविज्ञानबहुव्रीहेः फलं समासे आदिशब्देन सम्बन्धपदार्थस्य संग्र
होन भवति तेन क्लीवं विहाय पतितादेर्यक्षर्थिता इतिभावः नच्चिंत्यं मृतस्य च प्रसूतोयः क्ली
वस्य पतितस्य चेत्यनेन क्लीवस्य क्षेत्रजपुत्रकरणस्य मनुनोक्तत्वात् मृतस्य प्रसूतोयः क्लीव
स्येत्यादिना बौधायनोक्तत्वाच्च प्रकाशकारमते तु आधुनिकक्लीवस्यैवायं क्रमउक्तः इत्या
शयः अत्रेदं चिंत्यं आधुलिकान्धादिवत् आधुनिकक्लीवादेरपि अंशिता युक्तेति एवं द्रु
पदपुत्र्याः शिखंडिन्याः स्त्रियाः भारतोक्तदारसंग्रहवत् पुंस्त्वभ्रमेण क्लीवस्यापि दारसं
ग्रहः संभवत्येव इति क्लीवो हि द्विविधः शिश्नहीनः सत्यपि शिश्ने पुरुषकर्मकरणासमर्थ
श्चतदाह ।कात्यायनः। नमूत्रं फेनिलं यस्य चाप्सु विष्ठा निमज्जति ।मेढ्रंचोन्मादशुक्रा
२ भ्यां हीनं क्लीवं सउच्यते क्लीवादेर्दारसंग्रहाभावेपि दत्तकादिरूपपुत्रकरणं संभवति
अतः कथं यक्षर्थितेत्युक्तमिति तच्चिन्त्यं। अत्र पतितस्य पूर्वगृहीतेक्षेत्रे पातित्यदशायां
क्षेत्रजादेः पूर्वोत्पन्नौरसस्य च भागहारित्वं पूर्वोक्तदेवलादिवचनादवगन्तव्यं तन्तुरप
त्यं ।याज्ञवल्क्यः पतितस्तत्सुतः क्लीवः पंगुरुन्मत्तकोजडः ॥अन्धोऽचिकित्स्यरोगा
द्यैर्भर्त्तव्यास्तु निरंशकाः तत्सुतः पातित्यानन्तरोत्पन्नः जडो विकलान्तःकरणः अ
चिकित्स्यरोगोऽप्रतिक्रिय कुष्ठादिः ।आदिशब्देनान्येऽरूषन्तवोक्ताः अनंशा भरणीया ग्र
हयाइति रत्नाकरः पदा न गच्छतीति पङ्गुरिति जीमूतवाहनः एतन्मते एकपादस्य ग
तिसंपादकत्वसत्वेन पंगुत्वं पद्भ्यां न गच्छतीति पंगुरिति नव्याः एतन्मते पादद्वयस्य ग
तिसंपादकत्वेन पंगुत्वं तथा च एकेन पादेन चलन्नपि पङ्गुरुच्यते तत्र जीमूतवाहनमत
मेव सम्यक् तथाहि मनुवचने ये च केचित्तु निरिन्द्रियाइत्यत्र नेन्द्रियसामान्याभावो बोध्य
ते तथात्वे केवलहस्ताभाववतोऽधिकारित्वं स्यात् नैयायिकैश्च इन्द्रियसामान्यमात्रवृ
त्तिर्धर्म्मो न स्वीक्रियते अत इंद्रियसामान्याभावो न संभवत्येव किंतु विशेषेन्द्रियसामान्या
भावः सच हस्तसामान्याभावः पादसामान्याभावः नासिकासामान्याभावः रसनासामान्या

भावः चक्षुसामान्याभावः अन्धता श्रोत्रसामान्याभावो वधिरता शिश्नसामान्याभावः
क्लीवता जिह्वानिष्ठवागिन्द्रियसामान्याभावो मूकता पायुसामान्याभावे पुरीषत्या
गाभावेन जीवनं स्यात् इन्द्रियं च मांसपिण्डरूपं तत्तत्स्थाननिष्ठो वस्तुविशेषः अ
त एव शिश्नाकारे इन्द्रियनामकवस्तुविशेषाभावान्न पुंस्कार्य्यकारित्वमित्यादित
थाच एकहस्तसत्वे हस्तसामान्याभावो न तिष्ठेत् एवं एकपादसत्वेपि एवं वचमनुव
चनैकवाक्यत्वात् अत्रापि पंगुपदेन तथैव वोधनीयमित्युचितं व्यवहारोपि एकपादे
नापि योगं न शक्नोति स एव पङ्गुरिति अन्धो जात्यन्ध इति दीपकलिका अत्रेदमवधे
यं अंधसाहचर्यात् पंङ्गुरपि जन्मपंगुरेव वसेयः एवं हस्तहीनादयोपि जन्मावधि हस्त
द्वयहीनादयो ज्ञेयाः। इति शिश्नस्तु न मूत्रत्यागेन्द्रियं किन्तु पुत्रजननाद्यर्थं उपस्थस्तु
प्रजात्यानन्द निर्वृतेरिति श्रीभागवतात् प्रजातिः पुत्रोत्पादनं आनन्दः सुखं औरसाः
क्षेत्रजास्तेषां निर्दोषा भागहारिणः इति याज्ञवल्क्यवचने औरसक्षेत्रजयोरेव कु
ष्ठ्यादीनां पुत्रयोर्दायाधिकारो नान्येषामित्याहुस्तन्न मनोरमं पुत्रिकापुत्रादेर्दत्तका
देश्चानपराधित्वात् मन्वादिवचने क्षेत्रजौरसयोर्विशेषानभिधानाच्च नच याज्ञवल्क्यै
कवाक्यत्वात् मनोः संकोचः मनुवचनाद्धि याज्ञवल्क्यवचनस्योपलक्षणताइत्यत्र विनि
गमकाभाव इति वाच्यं वेदार्थोपनिवन्धृत्वात् प्राधान्यं हि मनोः स्मृतं मन्वर्थविपरी
ता या सा स्मृतिर्न प्रशस्यते इति वृहस्पतिना मनोः प्रधान्यकथनात् नन्वेवं तेषामुत्
पन्नतन्तूनां अपत्यं दायमर्हतीति अपत्यमिति सामान्यश्रवणात् दुहितॄणामपि दा
यार्हत्वप्रसक्तौ मुन्यन्तरैकवाक्यत्वेनापत्यपदस्य पुमपत्यवाचकतावत् याज्ञवल्क्यै
कवाक्यतावलात् औरसक्षेत्रजान्यतरपुमपत्यवाचकतास्त्विति चेत् मनुवचने अ
पत्यपदस्य पुमपत्यपरत्वे मूलं न मुन्यन्तरैकवाक्यत्वं अपितु मनुवचनान्तरमेव त
थाहि पितुर्धनस्य अपत्यैर्विभागे क्रियमाणे पुमपत्यैरेव कर्तव्यं इति भ्रातर इत्यनुवृत्तौ
एवं सहवसेयुर्वा पृथग्वा धर्मकाम्ययेति वचनेन प्रतीयते पितामहधनविभागेतु सुतरां
तथा प्रतीयते क्षेत्रजाइत्र वहुवचनं आद्यर्थं ज्ञेयं इत्यादि वहुवचनान्ता गणस्य संसू
चका इति स्मरणात् निर्दोषा इति अंधत्ववधिरत्वादिरूप भागानर्हत्वप्रयोजकदोष
रहिता इत्यर्थः भागहारिणः इति न तु भरणमात्रं॥ याज्ञवल्क्यः॥ सुतास्तेषां प्रभ
र्त्तव्या यावन्न भर्तृसात्कृताः। अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः॥ निर्वास्या
व्यभिचारिण्यः प्रतिकूलास्तथैव च सुता दुहितरः यावन्न भर्तृसात्कृता इत्यनेन ता
सां संस्कारश्च कर्त्तव्य इति प्रतीयते एतच्च पुत्रेण भागे क्रियमाणे ज्ञेयं पुत्रेण भागहर
णे तु मृतपितृकपुत्रवत् तेनैव भगिनीपोषणं तत्संस्कारश्च कर्त्तव्यः एवं स्वपितुर्भरण

मयि तेनैव कर्तव्यमित्यर्थः अत्र क्लीबस्यापि क्षेत्रजा दुहिता भवति दत्ता दिरूपा भवति इत्यत्र
प्रमाणं शास्त्रं न दृश्यते इत्यवधेयं क्लीबादिपरिणीतपत्नीः प्रत्याह अपुत्रा इत्यादि इति रत्ना
करः तथा च दास्यादिरूपा न भर्तव्या इति तदाशयः एषामित्यत्र षष्ठी परिणय सम्बन्धे इति भा
वः वस्तुतस्तु तनुस्त्री दुहितृभरणं यदि भ्रातृभिः क्रियते तदा तद्दासी दासभरणमपि तैरेव
कर्तुं युक्तं पुनर्भूप्रभृतीनां कथं चित्तु संभवे पि न भर्तव्यत्वमिति ज्ञेयं प्रतिकूला इ त्यत्र प्रा
तिकूल्यं विषप्रयोगादिकाविलं विवक्षितं न तु कलहमात्रकारित्वं इति रत्नाकरः तथा
च याद्दृशी परिणीता स्त्री भर्त्रा निर्वास्या तादृशी देवरादिभिरपीति भावः गौतमः जड
क्लीबौ तु भर्त्तव्यौ अपत्यं जडस्य भागार्हं शूद्रापुत्रवत् प्रतिलोमासु ॥ अर्हं पदात् यदपि
तामह भरणादिना ऽसौ अधिकारी भवति तदेव भागं गृह्णीयात् न त्वसौ जडस्य पुत्र
इति पितामहे सत्येव भागं प्राप्नुयादिति स्पष्टीकरणं वोद्धव्यं शूद्रापुत्रवदिति अपरि
णीता शूद्रापुत्रवदित्यर्थः तथा चास्य जीवनमात्रं देयं असति अन्यस्मिन्नधिकारिणि
भागमेव प्राप्नुयात् इति तथा च शूद्रापुत्रवदिति प्रतिलोमासु स्त्रीषु जातानामपि शु
श्रूषमाणानां शूद्रापुत्रवज्जीवनं देयमित्यर्थः इति रत्नाकरः परिणीता शूद्रापुत्रस्तु
अंशं शूद्रासुतो हरेदिति मनुवचनात् चतुस्त्रिद्व्येकभागाः स्युः क्रमशो ब्राह्मणात्मजा
इति याज्ञवल्क्यवचनेन चैकांशहारी प्रतीलोमासु तस्य तथात्वस्वीकारे प्रतिलोमा
सु स्त्रीषु उत्पन्ना अभागिन इति विष्णुसूत्र विरोधस्यात् इति ध्येयं कात्यायनः अक्र
मोढासुतश्चैव स्वगोत्राद्यश्च जायते प्रव्रज्यावसितश्चैव न रिक्थं तेषु कर्हिचित् ॥ अ
क्रमोढासुतस्त्वृक्थी सवर्णाश्च यदा पितुः असवर्णाप्रसूतश्च क्रमोढायाश्च यो भ
वेत् प्रतिलोमप्रसूतायास्तस्याः पुत्रो न रिक्थभाक् ग्रासाच्छादनमत्यन्तं देयं तद्बन्धु
भिर्मितं ॥ बन्धूनामप्यभावे तु पित्र्यं द्रव्यं तदाप्नुयात् अपित्र्यं तद्धनं प्राप्तं दापनीया न बा
न्धवाः अक्रमोढासुतो नानावर्णानां कन्यानां विवाहे यः क्रमः शास्त्रीयः तदुल्लंघ
नेन विवाहितायां ब्राह्मणस्य क्षत्रियादिकन्यायामुत्पन्नः ग्राह्यः सन् रिक्थभाक् ।
अक्रमोढायां ब्राह्मणादेर्ब्राह्मण्यादौ जातः ऋक्थग्राही अक्रमोढासुतस्त्वृक्थीत्य
नेनैवोक्तः क्रमोढायां ब्राह्मणादेः क्षत्रियादिपत्न्यां स्वभावतो ऽसवर्णोपि रिक्थभा
क् असवर्णाप्रसूतश्चेत्यादिनोक्तः अपकृष्टवर्णेनोत्कृष्टवर्णायाः परिणीतायाः पुत्रो
न रिक्थभाक् प्रतिलोमप्रसूताया इत्यादिनोक्तः ग्रासाच्छादनमिति तस्य यदि बांधवाः
सन्ति तदा तैर्ग्रासाच्छादनं देयं यदि तु तेन तदा स्वयमेव पित्र्यं धनं गृह्णीयात् यदा तु बांध
वैरपित्र्यं धनं प्राप्तं तत्पितुर्धनं न प्राप्तमित्यर्थः अपित्र्यमित्यत्र अ शब्दो निषेधे प्राप्तमित्यत्रा ६५
न्वयी तथा च अमानो नानिषेधवाचका इति पठंति तदा ग्रासाच्छादनमपि न देयमित्यर्थः

(श्लोकः २८

वचनेपितुःसवर्णाइतियोजना ऋमोढायांचयेऽसवर्णाप्रसूतोभवेत्सऋक्थीतियोजना।एवं
सगोत्रायां योजायतेसनऋक्थभागीएवंप्रव्रज्यावसितःप्रव्रज्याश्रमंकृत्वापुनस्तंपरित्यज्य
गार्हस्थ्याश्रमंप्रविष्टोपिनऋक्थग्राहीइतिरत्नाकरसम्मतः पेन्याएवंप्रव्रज्याश्रमेसन्न
पितइत्तंपित्र्यत्वेननाप्नोतितदाहवशिष्ठःअनंशास्त्वाश्रमान्तरगताःआश्रमान्तरंगृहस्था
श्रमादितिरत्नाकरः।अत्रसगोत्रायांतुयस्तुजायतेइतिश्वल्पयुक्ताअविवाह्यामात्रतेयोजा
यतेतदुपलक्षणं तेनसमानप्रवरासप्तमीपंचमीकन्यातोजातानांअनंशत्वंनन्वेवंवि
वाह्या तुपूर्वंऋतुमंतीयाकन्यातस्यांविवाहसंस्कारानन्तरंभ जातस्यापनंशि
त्वंआयातिनचअसपिण्डचयामातुरसगोत्राचयापितुः सप्रशस्ताद्विजातीनांदारकर्म
णिमैथुने॥इतिमनुवचनेनसगोत्रायाः मातृसपिण्डादेश्चपर्युदासेननसगोत्रांनसमा
नप्रवरांभार्यांविन्देतइत्यादिवचनेधापितदेकवाक्यतयासमानप्रवरादेरपितुल्ययक्त्या
पर्युदासोनाम यद्भिन्नेक्रियाव्यवस्थीयतेतत्रान्वितोनञर्थः पर्युदस्तेचक्रियायाअ
सिद्धिःतथाचसगोत्रादेर्विवाहासिद्ध्यानतु पुत्रस्यानंशत्वंऋतुमत्याअपर्युदस्तत्वात्तु
तत्पुत्रस्यांशभागित्वमितिवाच्यंत्रिंशद्वर्षः षोडशवर्षांभार्यांविन्देतनग्निकामित्यनेन
ऋतुमत्याअपिपर्युदस्तत्वात् नग्निकानागतार्त्तवाइत्यमरःआर्तवंऋतुर्यस्याअजा
तंसानग्निकाइत्यर्थःनचभार्यांविन्देतनग्निकामितिधर्मविवाहारंऋतुमतीविवा
हे॥अत्राह्वियमपांगेयंतंविद्याद्वृषलीपतिइतिनिन्दाश्रवणात् नतुऋतुमत्याविवा
हासिद्धिरितिवाच्यंसगोत्रादेरपिविवाहेनानामुनिभिर्दोषकथनात्असगोत्रावि
वाहोधर्म्यइत्यपिवाच्यतापत्तेःइतिचेदिष्टमेवइतिकेचित् अपरेतुऋतुमतीविवा
हेपिजातःपुत्रोभागभागीतिव्यवहारोपिदृश्यतेतस्मात् स गोत्रादेर्विवाहासि
द्धिः ऋतुमत्यान्तुशूद्रावत्तुविवाहःसिद्धइत्येवेतिकल्पनीयंअतएवभ्रान्त्यासगोत्रा
याविवाहेऽनन्तरंज्ञातेतस्यास्त्यागोमुनिभिरुक्तः यथासुमन्तुःपितृष्वसृसुतांमा
तुलसुतांमातृसगोत्रांसमानार्षेयींविवाह्यचान्द्रायणंचरेत् परित्यज्यचैनांविभृया
दिति वौधायनोपिसगोत्रांचेदमत्याउपयच्छेद(मत्याउप) तुमातृवदेनांविभृया
दितिसुमंतुवचनेसमानार्षेयींसगोत्रांसप्रवरांचेत्यर्थः ऋतुमत्यान्तुत्यागोनमु
निभिरुक्तःतथाचअत्यागेप्रतिऋतुअभिगमनंमावश्यकंततश्चसंतानोत्पत्तिर्वैधेवइति
सभागंगृह्णीयात् ननुसुमन्तुवचनेसगोत्रासमानप्रवराग्रहणंअविवाह्यामात्रोप
लक्षणमितिप्रायश्चित्तविवेकेशूलपाणयुक्तेःस्मार्तानांचतत्रसम्मतेः ऋतुपत्यापि
विवाहितात्याज्यैवेतिचेन्नसम्बन्धप्रयुक्ताविवाह्यातावुपर्यकत्वात् एवंमातृना
म्नीकन्यायाअपिमत्स्यसूक्तेनत्याज्यतमभिधानात् जननीसनाम्नीपुत्रस्यापनंशित्वं

ज्ञेयंइत्याहुः अत्रेदमवधेयं शूद्रस्यसगोत्राविवाहस्यानुमतत्वात् तत्पुत्रस्यांशित्वमिति मनुः
अनियुक्तासुतश्चैव पुत्रिण्याप्तश्चदेवरात् उभौतौनार्हतोभागंजारजातककामजौ अनि
युक्तासुतोभर्त्रभावेगुर्वननुज्ञाता यायंमुत्पादयति सउच्यते भागंक्षेत्रिकऋक्थस्यतत्पितृ
ऋक्थस्यचतथानियुक्तायामपिपुनर्नाय्यांजातोऽविधानतः नैवार्हःपैतृकंऋक्थंपतितो
त्पादितोहिसः गौतमःदेवरवत्यामन्यजातमभागं अत्रदेवरेवर्त्तमानेअन्यस्मातुत्पन्न
मपत्यंनभागभागितिरत्नाकराशयः नारदः जातायेत्वनियुक्तायामेकेनवहुभिस्तथा अरि
क्थभाजस्तेसर्वेवीजिनामेवतेसुताः दद्युस्तेवीजिनेपीण्डंमाताचेत् शुल्कतोहृतां अशुल्को
पहृतायांतुपिण्डदावोढुरेवते अनियुक्तायांस्वैरिण्यां अनृक्थभाजक्षेत्रि ऋक्थंनभजंते
इतिरत्नाकरः मातृक्षेत्रिकमातामहानांनरिक्थंभजंतेइतिप्रकाशः वीजिनामेवइत्येव
कारेणमातृमातामहादेरेवव्यावृत्तिरित्याशयः वीजिनोधनग्रहणंनकेवलंपिण्डदानम
पीत्याह दद्युरितियदिशुल्कंमूल्यंक्षेत्रिणोदत्वा अपत्योत्पादनार्थंमाताक्रीतातदाएव
क्रयाभावेतुमातृविवाहकर्तुरेवपिण्डदाइतिरत्नाकराशयः पुनर्नारदः ॥अपत्यमु
त्पादयतियस्तासांयाःशुल्कतोहृताः अशुल्कोपहृतायान्तुक्षेत्रिकस्यैवतत्फलं। मनुः
द्वौस्तुतौविवदेयातांद्वाभ्यांजातौस्त्रियाधने तयोर्यत्तुयस्यापित्र्यंस्यात् सतद्गृह्णीतनेतरः
अत्रस्त्रीवेश्यापुनर्भूस्वैरिणीतरेतीपारिजातःरत्नाकरोप्येवं अत्रेदमवधेयं अनियुक्ता
यामपिशुल्कक्रीतायांस्त्रियांजातःक्षेत्रिकस्यैवपिण्डदातापुत्रइतिरत्नाकरा[illegible]शयः
तत्रचवीजस्यैवचयोन्याश्चवीजमुत्कृष्टमुच्यते सर्वभूतप्रसूतिर्हिवीजलक्षणलक्षितेनि
मनुवचनविरोधः नचस्वपुत्रार्थंपरदारगमनविषयकमेतद्वचनमितिवाच्यंयुक्तिविरोधा
त्। तथाहियादिवीजमेवपुत्ररूपमुत्पद्यतेतदाततुकथंनतुक्षत्रिणाइति अत्रकेचितुव
चनवलादिदमेवव्यवस्थेयमितिवदंतिअपरेतुजातायेत्वनियुक्तायामितिनारद वच
नात् अशुल्कोपहृतायाअपिपुत्रोवीजिनएवदद्युस्ते इत्यादिनातुशुल्कहृतापुत्रस्या
पिवीजिपुत्रत्वंव्यवस्थेयं नहिमूल्यंगृहीत्वाविक्रीतायाअनियुक्तत्वविशेषेणमर्थवद्भ
वतिअशुल्कोपहृतायामित्यादिकन्तुछलतोनियुक्ताविषयकमाहएवंचअनियुक्तासु
तश्चेत्यादिमनुवचनंअअशुल्कोपहृताविषयमपिभवति रत्नाकरकारैस्तुकथंशुल्का
हृतक्षेत्रविषयंमनुवचनंमुक्तमितिचिन्त्यमित्याहुः इतिसंक्षेपः [redacted] म
नुः विद्याधनन्तुयद्यस्यतत्तस्यैवधनंभवेत् मैत्रमौवाहिकंचैवमाधुपर्किकमेवच तस्यै
वेतिएवकारेणभ्रात्रन्तरव्यावृत्त्या अविभाज्यत्वप्राप्तिः॥ अत्रमाधुपर्किकंमधुपर्ककाले
पूज्यत्वे पालब्धंतस्यैवभवेदिति रत्नाकरः। व्यासः। विद्याप्राप्तंशौर्यधनंयच्चसौदायि
कंभवेत् विभागकालेतत्तस्यनान्वेष्टव्यंतदृक्थिभिः शौर्यधनंयुद्धादिलब्धमितिरत्ना १००

करः कात्यायनः परभक्तोपयोगेन प्राप्तविद्योयदन्यतः तयाप्राप्तन्तु यद्वित्तं विद्याप्राप्तंत
दुच्यते उपन्यस्तेचयल्लब्धंविद्ययापणपूर्वकं विद्याधनन्तुतद्विद्याद्विभागेनविभज्यते ।
शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात् स्वज्ञानसंशंसनाद्वाद लब्धंप्राध्ययना
च्चयत् विद्याधनन्तु तत्प्राहुर्विभागेनविभज्यते शिल्पेष्वपिहिधर्म्मज्ञैर्मूल्यात्यच्चाधि
कंभवेत् विद्यापणकृतंचैव याज्यतः शिष्यतस्तथा एतद्विद्याधनंप्राहुःसामान्यंयदतोऽ
न्यथा । परंनिरस्ययल्लब्धंविद्ययापणपूर्वकं विद्याधनंतुतद्विद्यान्नविभाज्यंवृहस्पतिः ।
विद्याप्रतिज्ञयालब्धंशिष्याद्दाक्षंचयद्भवेत् ऋत्विज्यंयेनयल्लब्धंएतद्विद्याधनंभृगुः ।
परभक्तोपयोगेन परमात्रभक्तोपयोगेन अन्यथावहुकालंविद्यामभ्यस्यतः परभक्तोपयो
गः कदाचित्स्यादेवेतिवचनानर्थक्यंस्यात् भक्तपदंवस्त्रादेरप्युपलक्षणमितिसुष्टुअ
त्रपरपदार्थः पितृप्रतियोगिकः तथाचपितृधनानुपयोगेन याविद्यार्जिता तयालब्धंवि
द्याधनंपारिभाषिकं नतुविद्यासम्वन्धाल्लब्धमात्रमित्यर्थः एवंभ्रात्रादिसाधारणाभक्ता
नुपयोगोपिवोध्यः अत्रलाभेपिविशेषमाहउपन्यस्तेत्यादि इतितुचण्डेश्वरादिमतेसं
गच्छते पणपूर्वंउपन्यस्ते यल्लब्धंतद्विद्याधनं नविभाज्यमित्यर्थः अत्राध्यायिकोपिभद्रमुपन्य
न्तुनशक्नोतीतिइतिकेनचिदुक्तेविद्यानुब्रूयात् पद्यहंभद्रमुन्नयस्यामितदामेकिं ददासि
इत्यत्रप्राश्निकेनयणकरणोत्तर विदुषाभद्रोपन्यासेयल्लब्धंतविद्याधनमितिस्मार्त
जीमूतवाहनयोरभिप्रायः शिष्याद्ध्यापितानदक्षिणास्वरूपं आर्त्विज्यतः पौरोहित्यात्
यजमानतोदक्षिणास्वरूपं प्र श्नात्यथाकथंचित्प्रश्नोनिस्तीर्णोऽपणितमेवयदिक
श्चित्परितोषात्ददाति सन्दिग्धेत्यादियोऽस्मिन्शास्त्रार्थेसंशयमपनयतितस्मैसु
वर्णमिदंददामीतिउपस्थितस्य संशयमपनीय यल्लब्धंवादिनोर्वासन्देहेन्यायकर
णार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धंषष्ठांशादिकमित्यर्थः स्वज्ञानशंसनादिति
अयंपण्डितइतिधनिज्ञनज्ञापनात् यथालोकज्ञारास्वयंवाविदुषेदानंप्रशस्तमितिज्ञा
नात् ददतोयल्लब्धंतथाच यमः ॥ विद्यायुक्तोधर्मयुक्तः प्रशान्तःक्षान्तोदान्तःसत्यवादी
कृतज्ञः वृत्तिग्लानोगोहितोगोशरण्योदातायज्वाब्राह्मणःपात्रमाहुः अव्रतानांअ
मंत्राणांजातिमात्रोपजीविनांनैषांप्रतिग्रहोदेयोनशिलातारयेत् शिलांशास्त्रज्ञानवि
वादेअन्यत्रापि यत्रकुत्रचित्अन्योन्यज्ञानविवादेवानिर्ज्जित्य यल्लब्धंप्राध्ययनादिति य
त्रएकंदेयमुपस्थितं तत्रवहूनांपात्राणामुपस्थितत्वात् कस्मैदेयमितिसंशयेउपस्थि
तेप्रकृष्टाध्यापनशालित्वात्मानार्हत्वेन यस्मैदीयतेतत्तस्यविद्याधनं तथाशिल्पादि
विद्ययाचित्रकारस्वर्णकारादिभिर्यल्लब्धंतथाद्यूतेनापिपरंनिर्ज्जित्य यल्लब्धंतत्सर्वमवि
भाज्यमितरैस्तदयमर्थोयथाकथाचित्विद्यया यल्लब्धंतदर्जकस्यैव तेषांप्रदर्शनार्थ

श्लोकः २५

न्तुकात्यायनेनविस्तरेणोक्तंइतीजीमूतवाहनस्मार्त्तादीनांमतंअत्रमतेमूल्यमितियाव
न्मूल्येनक्रीतंतावद्धनंमूल्यप्रतिनिधिरेवअधिकन्तुअस्यस्वोपार्ज्जितत्वंकथंप्राध्ययनात् ।
प्रकृष्टाध्ययनात्मूल्यादितिअचितमूल्यात् पुरुषबुद्ध्यायदधिकंगृह्यतेतदपितस्या
साधारणमित्यर्थः विद्यापणमितिअत्राध्यायेऽत्रवादेवायोभद्रंवेत्तितस्मैशतंसुवर्णादे
यादितिविद्यामवलम्ब्यपणीकृतेभद्रंज्ञानंविज्ञा प्ययल्लब्धंपूर्वंयाजितात् यजमानात्
पूर्वमध्यापिताच्चशिष्यात्भक्तिभावेनार्पितंयल्लब्धंविदुषोविवादिनिमध्येकोपिचतुकथ
यतिअत्रयोजेतातस्मैधनंदास्यामीतितत्रवादिनंविजित्ययल्लब्धंविद्याप्रतिज्ञयेतिअ
हमेवइमांविद्यामधीपइतिप्रतिज्ञयादातुश्चित्तेचमत्कारंजनयित्वायल्लब्धंशिष्यात्
याचित्वायत्गृहीतंअथवाशिष्योऽयंतान्त्रिकमन्त्राध्येतासदेवपूजाद्यर्थंयद्ददाति य
द्वावेदपाठार्थमागतःशिष्यःगुरुपूजाद्रव्यंमंगलार्थदेवपूजाद्रव्यंवायद्ददाति एवंया
जनसमल्पेदत्तंदेवपूजार्थंद्रव्यंऋत्विक् पूजाद्रव्यंवातत्सर्वंविद्याधनंइतिचएडेश्वरमि
श्रादीनांमतंअत्रस्वज्ञानशंसनादितियत्रविदुषांमिलनेऽहमेवसर्वेभ्योऽधिकइति
ज्ञापनादस्यप्रकृष्टाध्ययनाभावेपियत्धनंलभ्यते तद्विद्याधनंप्राध्ययनशालिनस्तु
स्वयंज्ञापनाभावेपिपूर्वोक्तरीत्यायल्लब्धंतद्विद्याधनंइतिज्ञेयंअयंज्ञानवान्इतिकथं
चित्ज्ञात्वादातागंगातीरेपुण्याहेवैधविधिनाधनमु त्सृज्यसर्वविद्वत्सुसंप्रदानक
दानोपष्टंभेनयद्ददाति ननुनविशेषविद्याधनंकिन्तुसामान्यंयदतोऽन्यथेत्यनेनोक्तंअत
एवस्वज्ञानशंसनादित्यत्रस्वपदमुपन्यस्तं वादादिति विचारस्थलेवादिनं निरस्यधनि
कतुष्टिंजनयित्वाअर्पणितंयल्लब्धंप्राध्ययन पदंवाप्रकृष्टवेदपुराणाद्यावृत्तिवाचकं ए
वंयदि एकाह्निम एतांवेदशास्त्रांकोपिआवर्त्तयतितस्मैशतंदास्यामीतिप्रतिज्ञातं ए
काह्नेनएकशाखाध्ययनंप्राध्ययनं अथवासपणः विद्यापण एवज्ञेयः एतन्मतेवि
द्यायापणपूर्वकमितिपाठः षष्ठश्लोकपूर्वार्द्धेजीमूतवाहनादिमतेतुविद्ययाप्रयु
तपूर्वकमितितथाचद्यूतविद्याअनेनप्राप्ताइतिभावशिल्पेष्वपि तादृशेतादृशासा
धारण गुणाभ्यासेनयदर्जितंतत्शिल्पविद्याधनंअन्यत्तुसामान्यं एवंगानशास्त्रा
दावपिवैश्ययवृत्तावप्प मूल्यात् यच्चाधिकमिति ननुक्षत्रियवृत्तौकिमितिनोक्तंअ
त्रमिश्राः विद्याऽत्रशस्त्रशास्त्रयोरितितथाच एतदुक्तंविद्याधनंशास्त्रेपिज्ञेयमितिभा
वः वस्तुतः क्षत्रियवृत्तौशौर्यधनंवक्ष्यते एतद्भिन्नंतुपारिभाषिकंविद्याधनंनेत्याह
सामान्यमितिइतिच एडेश्वरादिमतेवक्तव्यंकेचित्तुप्रश्नादितिप्रश्नद्वारासन्तोषयल्लब्धं
यथाकोपिदिग्विजयीराजानमुपागतोस्तत्रकोप्यपरिमित महाबुद्धिशालीप्रश्नेन
दिग्विजयिनाविचारंप्रचारयतिसोऽजयन्नपिसभाशोभामातन्वानोराज्ञोधनंलभते

इतिसन्दिग्धप्रश्ननिर्णयादित्यस्यपूर्वोक्तएवार्थः अथवायोगग्रन्थेनिबद्धंसंशयोनुसार
कवाक्यसमूहंदर्शयित्वाधनंप्राप्नोतितस्यतद्धनंविद्याधनमित्याहुः केवललेखकानांवेत
नंसामान्यवेदपुराणादिपाठदक्षिणाकाव्यकथार्थयोः कौशलातिशयमंतरेणश्राव
णातोलब्धं एवमादिधनंनचण्डेश्वरादिमतेविद्याधनमित्यर्थः वस्तुतस्तुयत्रयत्रस्थ
लेऽधिकनैपुण्यापेक्षावर्त्ततेतत्रतत्रैवपारिभाषिकंविद्याधनंअन्यथातुस्वोपार्जित
मात्रमितिचण्डेश्वरादीनांनिगर्भः अत्रजीमूतवाहनस्मार्त्तादयः अनुपघ्नन्पितृद्रव्यंश्र
मेणयदुपार्जितं स्वयमीहितलब्धंतन्नाकामोदातुमर्हतीति मनुवचनेचोहितेतथात्व
यतस्तत्स्वयमीहितेनस्वचेष्टामात्रेणलब्धं अतःकामनांविनाभ्रातृभ्योदातुंनार्हती
त्यर्थः तेनचअविशेषेणसर्वेषामेवविद्याधनादीनां स्वोपार्जितानांपितृद्रव्योपघाता
भावेऽविभाज्यत्वं पितृद्रव्योपघातेतुइतरेषामपिभ्रातृणांवक्ष्यमाणांशविशेषग्राहि
त्वं तच्चविद्याधनेऽप्यविशिष्टंनचैवंसतिकात्यायनस्यविद्याधनविशेषाभिधानंवैयर्थ्यंवि
द्ययाप्राप्तंविद्याधनमित्यस्यैववक्तुमुचितत्वात् इतिवाच्यं कात्यायनवचनानांविस्ता
रमात्रपरत्वान्नचसामान्यंयदतोऽन्यथेत्यस्यकोऽर्थइतिचेत् उक्तप्रकारात् अ
न्यथापितृद्रव्यंदत्वादातारंसन्तोष्यग्रहणेनसंपादितंभूम्यादिकंसामान्यंसाधार
णंसर्वेषांभ्रातृणामितिविशेषः इतिननुकात्यायनेनविद्याधनानांविशेषतोऽभिधा
नात्विद्याधनेपितृद्रव्योपघातसत्वेपिनविभागः अनुपघ्नन्नित्यादिमनुवचनन्तुउ
दितरत्रप्रवर्त्ततामितिवाच्यंसाधारणंसमाश्रित्ययत्किंचिद्वाहनायुधं शौर्यादिना
प्नोतिधनंभ्रातरस्तत्रभागिनः तस्यभागद्वयंदेयं शेषास्तुसमभागिनः इतिव्यास
वचनेनविद्याधनसमशीलशौर्यधनेभ्रातृणामंशित्वकथनात् विद्याधनेपितथै
वयुक्तत्वात्विद्याधनशौर्यधनयोश्चसमशीलत्वं व्यासेनैव एकव्यवस्थायोगित्वकथ
नात्ज्ञेयंयथाविद्याप्राप्तंशौर्यधनंयच्चशौदायिकंभवेत् विभागकालेतत्तस्यनान्वेष्ट
व्यंस्वरिक्थिभिरिति एतद्वचनमपिपितृद्रव्यानुपघातस्थलेवोध्यं पितृद्रव्योपघा
तस्त्वविद्योपार्जनकालेपिभवति एवंपैतृक्याविद्ययोपार्जितेपिपितृद्रव्योपघातोभ
वति एतदेवोक्तंकात्यायनेन परभक्तोपयोगेनइत्यादि अत्रकुलविनीतविद्यानांभ्रा
तृणांपितृतोऽपिवा शौर्यप्राप्तन्तुयद्वित्तं तद्विभाज्यंबृहस्पतिरितिकात्यायन
वचनान्तरवलात् पितृव्यादितोपिप्राप्तयाविद्ययार्जितेभ्रातरस्यांशःकर्त्तव्यः कुलप
दस्यपितामहादिमात्रपरत्वेपितृतोऽपिवेत्यस्यवैयर्थ्यापत्तेरित्याहुः ननुयत्रको
पिविद्यारत्नवशीकृतेनकेनचित् धनिकेनवहुतरविप्रसंप्रदानकोलब्धधनानांवि
प्रेषुसमर्पणेनियोजितः अतिप्रश्रयादधिकधनराशिंस्वयंगृहीत्वाकतिपयधनंब्रा

ह्मणेषु समर्पयततो ऽपि पुनः पूजां गृहीतवान् अनन्तरं दानापितस्य वृत्तान्तं ज्ञात्वा अयमपि
ब्राह्मण इति मम कार्यं सिद्धमित्यनुमतवान् तत्र एवं को ऽपि अंकविद्यावान् कुत्रचित्॥
राजकार्ये नियोजितः कियतीं भूमिं वशीचक्रे अन्यो राजपुरुषो भयात्तं वारयितुं न शशाक इति
राजचज्ज्ञात्वा ऽतिप्रियकारित्वात् तत्र न विमतिं चक्रे तत्र च का व्यवस्था अथ विद्या चेदुभय
त्र कुल एव पित्र्यभक्त्यो योगेन वा प्राप्ता न तदा विद्याद्वारा पितृद्रव्योपष्टम्भसत्वात् भ्रातृ
णामंशित्वमिति चेत् यत्र पित्रा धनव्ययेन को ऽपि धनिकः किंचित्कार्यार्थमानीतः अन
न्तरं च उदासीनवत् पुत्रेणापितस्य प्रीतिर्जाता ततः प्रीतिचिह्नं किंचिद्धनं पुत्राय दत्तं
तत्रापि भ्रात्रन्तरस्यांशित्वापत्तिः अथ यत् द्रव्यग्रहणमुद्दिश्य धनव्ययः कृतः पैतृ
कद्रव्योपष्टम्भकतया पैतृक्या वा विद्यया यदर्जितं तत्रैवेतरेषां भ्रातॄणामंशित्वं अ
त एव जीमूतवाहनेनापितस्मात् द्रव्योद्देशेनैव उपघातेनार्जितं साधारणं न्याय्यमि
ति सिद्धमित्युक्तं अत्र तु धनव्ययो ऽन्यकार्यार्थं कृतः विद्यापि नात्र धनदानसाध
नीति न भ्रात्रन्तरस्यांशित्वमिति चेत् पैतृकधनव्ययस्य परम्परया उपयोजिते यदि
न भ्रात्रन्तरस्यांशित्वं तदा पैतृक्या विद्यायाः परम्परया उपयोगितेन साधारण्ये किं प्रमा
णमिति अत्र केचित् भ्रात्रन्तरस्यांशित्वं नास्त्येवेति वदन्ति अनुकात्यायनेन परिभाषित
विधने पितृद्रव्यानुपघाते तु कस्यचिदपि भ्रान्तरस्य भागो न देयः पितृद्रव्योपघाते
तु हीनविद्यस्याविद्यस्य च नांशित्वं किंतु समविद्याधिकविद्यस्य चांशित्वं यदाह॥ कात्याय
नः॥ निर्विद्यानां तु वैद्येन देयं विद्याधनं क्वचित् समविद्याधिकानां तु देयं वैद्येन त
द्धनं अविद्यो विद्याभाववान् अल्पविद्यावांश्च यदाहुस्तत्सादृश्यमभावश्च तदन्यत्वं त
दल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिता इत्यभियुक्ताः वैद्यो विद्यावा
न् क्वचिद्धिति साधारणधनोपघाते तदनुपघाते चेत्यर्थः समेत्यादि अत्र तन्त्रोच्चरि
तविद्यापदं उभयप्रसवधृतेन समविद्यानां विद्ययाधिकानां चेत्यर्थः॥ इति जीमू
तवाहनस्मार्त्तौ॥ परे तु समविद्यानां अधिकानां च इति समासः अधिकपदेन विद्या
या आधिक्यमेव बोध्यते यथा उत्तमसुन्दरो देवदत्तो मध्यमो यज्ञदत्त इत्यादौ सौन्दर्ये
णैव मध्यमत्वमित्याहुः इति मैवं ॥ वैद्यो ऽविद्याय नाकामो दद्यादंशं स्वतो धनात्॥
पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदाहृतं॥ इति नारदवचनेन साधारणधनानुपघाता
र्जितधनस्यैव अविद्याया देयत्वाभिधानेन साधारणधनोपघाते तु अविद्यायापि वि
द्याधनस्य दातव्यता प्रतीतेः पितृद्रव्याविघातेन यदन्यत् स्वयमर्जितं॥ मैत्रमौद्वा
हिकं चैव दायादानां न तद्भवेत् क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः दायादेभ्यो
न तद्दद्यात् विद्यया लब्धमेव च इति याज्ञवल्क्यः॥ अन्यत्तु मैत्रादिव्यतिरिक्तमपि अत्र १०३

पितृद्रव्याविघातेत्यादिनैवविद्याधनस्यापिप्राप्तौ क्रियालब्धमेवचेतित्यर्थमितिचेन्न
परभक्तोपयोगेन इत्यादिकात्यायनोक्त भिन्नेपित्र्यभक्तोपयोगार्जितविद्यार्जितसाधा
रणधनानुपघातेपिअविद्यानामनंशित्वार्थकत्वात् शूलपाणिरप्यभिप्रायोयमित्युक्तो
नदोषः एवंमैत्रेमित्राल्लब्धेपिसाधारणधनानुपघातएवाविभाज्यत्वंमैत्रंचप्रदर्शनम
त्रंनारदः शौर्यभार्याधनेहित्वायच्चविद्याधनंभवेत् त्रीण्येतान्यविभज्यानिप्रसादो
यश्चपैतृकः भार्याप्राप्तिकालेप्राप्तंधनंभार्याधनंशौर्य्याधनंविद्याधनंचहित्वाऽन्य
तुविभजेदितिशेषः अत्रहेतुःत्रीणीत्यादिः पैतृकःपित्रादिनाधनस्वामिनादत्तोयःप्रसा
दःसोप्यविभाज्यः ॥ व्यासः ॥ पितामहेनयद्दत्तंपित्रावाप्रीतिपूर्वकं तस्यतन्नापहर्त्तव्यं
मात्रादत्तंचयद्भवेत् प्रतिग्रहधनस्यापिसाधारणधनोपष्टम्भःसम्भवतियथास्वकीयंध
नंदत्वादातारंपरितोष्यप्रतिगृह्णातिअतएवकलौत्वनुगमान्वितइतिस्मरन्तिइति
जीमूतवाहनादिमते अविशेषःप्रकाशकारजितेन्द्रियादयोप्येवमाहुः मिश्रचण्डेश्व
रादयस्तुअनाश्रित्यपितृद्रव्यंस्वशक्त्याप्नोतियद्धनं दायादेभ्योनतद्दद्यात् विद्याल
ब्धंचयद्भवेदितिव्यासेनपितृद्रव्यानुपघातेनार्जितेऽनर्जकस्यानंशित्वमुक्तायच्च
द्विद्यालब्धंचयद्भवेत् इत्यनेनविद्यालब्धस्याविभाज्यत्वकथनात् कश्चिद्विशेषोऽभि
प्रेतइत्यवगम्यतेसचविशेषःसाधारणधनोघातेपिभ्रात्रन्तरस्याभागइत्येवावसी
यते नचान्यत्रसाधारणधनानुपघातेऽन्यस्यनांशित्वंपरभक्तोपयोगेनेत्यादिका
त्यायनोक्तविद्याधनेपितथाविद्याधनस्यपुनरुपादानात् कात्यायनोक्तेनरविद्यार्जि
तेसाधारणधनानुपघातेपिभ्रात्रन्तरस्यांशित्वमितिति पूर्वोक्तएवार्थइतिवाच्यं व्या
सयाज्ञवल्क्यवचनेनतथावोधनात् तथाहिव्यासवचनेइयंयोजनाभवतिकर्तव्या
साधारणंधनमनाश्रित्यार्जितंदायादेभ्योनदद्यात् साधारणंधनमनाश्रित्यकात्याय
नपरिभाषितंविद्यालब्धंदायादेभ्योनदद्यात् याज्ञवल्क्यवचनेपिपितृद्रव्याविद्या
तेनेत्यस्ययोजनयातथार्थप्रतीतिः एवमपिअपरिभाषितंविद्याधनंनदद्यादित्य
स्यनप्रतीतिः नचपंचनखाननभुञ्जीतेतिवाक्यात् शशकल्पककूर्मखड्गगोधारू
पपंचभिन्नपंचनखमानुषादिभोजनाभावोयथाप्रतीयते तथात्रपारिभाषिकभिन्न
विद्यालब्धधनस्यादानाभावःप्रतीयतामितिवाच्यं तत्रपंचेतिविशेषणसत्वेनतथा
वोधसंभवेपिअत्रपारिभाषिकेतिविशेषणाभावात्तथावोधासंभवात् तथाहिपंचन
खानुपंचैवभुञ्जीतनेतरानितिवोधःअत्रकिमेवविद्याधनंनदद्यादित्यत्रोत्तरंनास्ति
नच अनाश्रित्येत्यादिश्लोकार्द्धेनव्यासेनयदुक्तंतस्यैवप्रदर्शनंविद्यालब्धंचयद्भवेदि
तिएवंचयाज्ञवल्क्यवचनेपिएवमेवव्याख्येयं विद्याप्राप्तंशौर्यधनंयच्चसौदायिकंभवेत्

॥ ।विभागकालेतत्तस्यनान्वेष्टव्यंस्वरिक्थिभिरिति व्यासवचनांतरे एवमपिविद्याप्राप्तमि
त्यस्यवैयर्थ्यात् इदानीन्तुविद्याप्राप्तमित्यादिवचनं परभक्तोपयोगेनेत्यादिनाउपन्य
स्तमित्यादिनाचकात्यायनपरिभाषितविद्याधनपरंविद्यालब्धंचयद्भवेदितितुअना
श्रित्येत्यादेरेवप्रदर्शनमितिनपौनरुक्त्यं अथविद्याप्राप्तमित्यादिनाविद्याधनशौर्य
धनयोरविभागमुक्त्वाअनाश्रित्येत्यादिनाअत्रविशेषउक्तस्तत्रचस्वशक्त्याप्नोतियन्नि
नशौर्यधनमुक्तं साधारणमित्यादिनाचविशेषाभावेविभागउक्तोव्यासेननातोवैयर्थ्यं
विशेषेणसामान्यस्यसामान्येनवाविशेषस्यवैयर्थ्यं नयुज्यतइतिनचैवंसतिकात्यायने
नउपन्यस्तेत्यादिनाविद्याधनस्यपरिभाषणं व्यर्थमितिवाच्यं यत्रविद्याधनेपैतृकधनो
पष्टम्भोनास्तितेषामेवप्रदर्शनानिकात्यायनवचनानिइतिप्रकाशकारैरुक्तत्वात्
विद्याधनप्रपंचस्यैवकात्यायनेनोक्तत्वाद्वाइतिचेत् आहृत्यसंशयंयत्रप्रसभंकर्म्म
कुर्वते तस्मिन्कर्म्मणितुष्टेवप्रसादःस्वामिनाकृतः अत्रलब्धन्तुयत्किंचिद्धनंशौ
र्येणतद्भवेत् ॥ ध्वजाहृतंभवेद्यच्च विभाज्यंनैवतत्स्मृतं संग्रामादाहृतं यत्तुविद्रा
व्यद्विषतांबलं स्वाम्यर्थंजीवितंत्यक्त्वातद्ध्वजाहृतमुच्यते ।इतिस्मृतिवचनेनशौर्य
धनस्यविशेषकथनेन एतादृशशौर्यधनेविशेषोस्तीत्यवगम्यते नहीदंवचनं यादृश
शौर्यधनेपितृधनोपष्टम्भोनास्तितत्परं अत्रापिवाहनायुधादेः पित्र्यत्वसंभवात्॥
नवात्रतस्यैवविशेषतः कथनेन एतद्भिन्नंसर्वंशौर्यधनंपितृधनोपष्टम्भकमितिवं
ज्ञयतिदरिद्रपुत्रस्यवाक्यकौशलविनयादिनातुष्टाद्वाहनायुधादिकमादायपिशौ
र्यप्रकाशनसंभवात्। नचेदंप्रपंचार्थमेव।प्रथमोपस्थितं चेतनंपरित्यज्यअत्युत्कटक
र्म्मकरणजन्यप्रसाद धनस्यैवप्रपंचकथनस्यायोगपत्तात् तत्रचविशेषोनतावत् ए
तादृशधनेकुलेविनीतशास्त्रशिक्षाणांभ्रात्रन्तरसांशब्दानंदइतितथासतियुक्तिवि
रोधापत्तेः तथाहिकुलेविनीतशास्त्रशिक्षाणांसामान्यतशौर्येणालब्धंवेतनरूपंध
नंपित्र्यधनानुपष्टम्भेनार्जितं अविभाज्यं तत्रैवउत्कटकर्मकृत्वालब्धप्रसादधनं
विभाज्यमितियुक्तिविरोधः नवावैद्यायां शब्दानार्थाविशेषोस्तिविरितितद्युक्तिविरो
धादेवतस्मात् पारिभाषिकशौर्यधनंसाधारणधनोपष्टम्भसत्वेप्यविभाज्यंतत्रै
ववेतनंद्भूतस्तत्रचयत् शौर्यधनंतत् साधारणधनोपष्टम्भसत्वेविभाज्यं तदसत्वेऽ
विभाज्यमितिस्थितविद्याधनादावपिएवंव्यवस्थाउन्नेयाएवंचसाधारणंसमाश्रि
त्यइत्यादिवचने शौर्यधनस्यविभागउक्तःसवेतनस्यैवनतत्कटप्रसादलब्धस्यवि
द्याप्राप्तंशौर्यधनपरं अनाश्रित्यपितृद्रव्यमित्यादिव्यासवचनंस्वशक्त्याइत्युपाद
नात् अनुपघ्नन्पितृद्रव्यंश्रमेणयदुपार्जितं मितिमनुक्तत्वात् कृष्याद्युपार्जितपरंवि १७

श्लोकः२८

द्यालब्धंचेतिसामान्यपुराणपाठादिलब्धधनपरंत्वकारात् शौर्यप्रयुक्तत्वेतनपरंच ॥मनुवच
नेचस्वयमिहितलब्धंचेत्यनेनइतरेषांपरिग्रहइत्येवव्यवस्थानन्वेवंवैद्योऽविद्यायनाका
मःप्रदद्याद्वैस्वतोधनात् पैत्र्यंद्रव्यंसमाश्रित्यनचेत्तेनतदाहृतमितिनारदवचनविरो
धः तेनवचनेनपित्र्यधनोपष्टम्भेणार्जितविद्याधनस्यांशमविद्यायापिदद्यादितिबोध
नादितिचेतुअत्रचरेडेश्वरः अत्रचेदमभिप्रेतं यदासाधारणधनेनैवग्रासाच्छादना
द्युपयोगकृत्वासमधिगतविद्यः साधारणधनानाश्रयेणविद्ययाधनंप्राप्नोति तदाऽवि
द्यायनंदेयंसाधारणंधनाश्रयेणतु विद्ययार्जितमविद्ययापिदेयं यदातु विद्यार्जनका
लेसाधारणधनोपयोगोनास्तितदर्जनकालेसाधारणधनोपयोगेविदुषानकस्यचित् ॥
देयंकिंतुविदुषएवऽतद्दनात् पितृद्रव्यानुपष्टम्भेणार्जितस्याविभाज्यत्वमुक्त्वापृथग्विद्याल
ब्धस्यापिव्यासेनाविभाज्यत्वप्रतिपादनात् अतएव पुनरग्रेविद्याधनस्ययद्विभाज्यत्वंव
क्ष्यतेतदसाधारणधनोपष्टम्भेतरेडेणविद्ययाधनार्जनकालेसाधारणधनोपयो
गेद्रष्टव्यमित्याहतदिहसंक्षेपतःकल्पचतुष्टयी यथापित्र्यभक्तोपयोगेन प्राप्तविद्यस्यसा
धारणधनव्ययमन्तरेण धनार्जनमित्येकःकल्पः तत्रैवसाधारणधनव्ययेणइतिद्वि
तीयःसाधारणभक्तानुपयोगेनार्जितविद्यस्यसाधारणधनव्ययेन धनार्जनमितितृती
यः तथैवसाधारणधनव्ययमन्तरेणइत्तिचतुर्थः ॥तत्राद्यकल्पेस्वयमर्जितमवैद्याय
वैद्योनाकामोदद्यादितिगौतमसूत्रात् नाविद्यानान्तुवैद्येनदेयंविद्याधनंक्वचिदिति
कात्यायनवचनाच्चअविद्यायनदेयमित्युक्तंतदाऽविद्यायनदेयमित्यन्तेनचरेडेश्वरे
णननुवैद्योऽविद्यायइत्यादिनारदवचनंनपरिभाषितविद्याधनचेत्तेनतदाहृत
मित्यस्यानुपपत्तेः साधारणंसमाश्रित्येत्यादिव्यासवचनव्याख्याने एतत् परिभाषित
विद्याशौर्यादिधनव्यतिरिक्तविद्याशौर्यादिधनाभिप्रायेणद्रष्टव्यमितिचरेडेश्वरे
णवक्ष्यमाणत्वात् तस्मात्साधारणभक्तोपयोगेनार्जितविद्ययाधनार्जनपरंनाविद्या
नान्त्वित्यादिकात्यायनवचनमप्यगत्यानरदैकवाक्यत्वात्तत् परंनतुस्वपरिभाषितविद्या
धनंपरं अथवामुनिद्वयवचनाभ्यांव्यवस्थाद्वयसिद्धिःनचनारदवचनमपिपरिभाषित
विद्याधनपरमस्तुलाघवादितिवाच्यं परिभाषावैयर्थ्यापत्तेः विद्ययालब्धमेवचेत्यस्यवैय
र्थ्यापत्तेश्च इदानीन्तुसाधारणोपष्टम्भसत्वेपिपरिभाषितविद्याधनेऽविद्यानामनंशि
त्वंपरिभाषाफलंनच कात्यायनवचनबलात् परिभाषितविद्याधनमनुपष्टम्भार्जितमपिवै
द्यायदद्यादितिवाच्यंसाधारणप्रयोजकरूपाभावेसाधारण्यस्यानुभवविरुद्धत्वाद्विद्याध
नदानअविद्यसंप्रदानकत्वनिषेधनतुकारेणचविद्वत्सुसंप्रदानकत्वबोधनात् पूर्वप्रसक्त
दानस्यैवउद्देश्यत्वाच्चातोनवाचनिकमत्रदानमिति अपरेतुनारदवचनेवैद्योविद्यायेतिचरेडे

भ्यसनीभूतवाहनसम्मतपाठः साधीयान् तत्र च कचित्पुस्तके खण्डे ऽकारः लिपिकरप्रमादा
त्तु दृश्यते तथा च विदुषे विद्याधनं परिभाषितं पित्र्यद्रव्यानुपघ्नेनेत्यतिन दद्यादित्यर्थः तत्र वि
द्वद्विशेषमाह कात्यायनः ॥ समविद्येत्यादि एवं च मुनिद्वयवाक्यात् पितृद्रव्योपक्षेपार्जितवि
द्याधनं समविद्याऽधिकविद्याभ्यां देयमिति फलितं चण्डेश्वरवाक्यमप्यत्र संगमयितुं शक्यते
यथावचनार्थबोधनायादौ अपरिभाषितविद्याधनस्य गतिमाह यदा साधारणधनेनैवेत्या
दि इदं च विद्याधनस्याशेषविशेषव्यवस्थासंकलनेन स्फुटीकरणाय साधारणधनेनैवेत्या
दि तु अपरिभाषितविद्याधनमात्रोपलक्षणं अग्रऽविद्ये त्वपि अनर्जकमात्रोपलक्षणं
वचनद्वयविषयमाह यदा तु विद्यार्जनकाले इत्यादिना कस्यचिदित्यनेन विदुषोपि नि
वाकरणशंकावारणार्थमाह किं तु विदुष इति संप्रदानत्वसम्बन्धे षष्ठी राज्ञनादिति अंशं द
द्यादिति शेषः तथा च उपन्यस्ते त्वित्याद्युक्तप्रकारविद्याधनं विद्यार्जनकाले साधार
णग्रासाद्युपयोगेपि धनार्जनकाले तदा साधारणधनानुपयोगेन कस्मैचिद्देयं कृष्या
द्यर्जितधनवत् धनार्जनकाले एव साधारणधनोपयोगे वैद्यमात्राय देयं नारदादिव
चनात् उभयकाले तथाविधोपयोगे सर्वेभ्यो देयं परिभाषितविद्याधनलाभेन द्विरर्ज
यितुरिति वचनविषयत्वात् यथा कथंचिद्विद्यालब्धं तु धनार्जनकाले साधारणधनोप
योगे सर्वस्मै देयं तदभावे तु न कस्मैचिद्वचनाभावादिति संक्षेपः न च उपन्यस्ते त्वित्यादि
प्रकारविद्याधने विद्यार्जनकाले साधारणधनोपयोगे वैद्यायांशदानमनुभूतं वा युक्तं
न वा वाचनिकं तथा हि परभक्तेत्यादिवचने एतदन्यत्तु न विद्याधनं त्वित्येव प्रतीयते नै
तेन वैद्यायांशदानप्रतीतिः यत्तु वैद्यांशबोधकवचने विशेषानुपादानात् साधारण
धनसम्बन्ध एव तदिति तद्युक्तमप्यनादेयमुपार्जनकाले साधारणग्रासस्सम्बंधस्य
कुत्राप्यनुपादेयत्वादित्याहुः द्वितीयकल्पेपि सर्वेषां भ्रातृणां वक्ष्यमाणरीत्या यथायोग्यां
शित्वं साधारणांशमाश्रित्य यत् किंचिद्वाहनायुधमिति अर्जुनकाले साधारणधनोपष्ट
म्भबोधकव्यासवचनात् पित्र्यं धनं समाश्रित्य न चेत्तेन तदाहृतमिति तादृश नारदवच
नाच्च एतदेवोक्तं अविद्यायोपि देयमित्यन्तेन चण्डेश्वरेण तृतीयकल्पे तु विदुषे एव दे
यं नाविद्यायेति गौतमवचने ऽविद्यायेतिस्वरसात् समविद्याधिकानान्तु देयं वैद्येन
तद्धनमिति कात्यायनवचनाच्च एतदेवोक्तं चण्डेश्वरेण किन्तु विदुष एव तद्धनात् इ
त्यन्तेन युज्यते चैतत् विद्यार्जनकाले साधारणधनपयोगाभावे यदि विदुषो भ्रात्रन्तर
स्यांशित्वं भवति तदा किं धनार्जनकाले साधारणधनोपयोगे नांशित्वमिति ध्येयं चतु
र्थकल्पे तु अधिकविद्यस्यापि भ्रात्रन्तरस्यानंशित्वमिति समविद्याधिकानान्तु इत्या
दि कात्यायनस्य साधारणधनोपघातस्थलविषयकत्वेनैवोपपत्तौ अनुपघ्नन् पितृद्र १०४

थ्यं इत्यादिवचनस्य सामान्यप्रवृत्तस्य संकोचे प्रमाणाभावादिति एवंच याज्ञवल्क्यवचने
पितृद्रव्याविघातेनेति मैत्रमित्यादौ नानुषज्यते क्रमादभ्यागतमित्यत्र पितृद्रव्याविघा
तेनेति मुन्यन्तरैकवाक्यत्वात् पूरणीयं अथवाऽनुषंजनीयमित्याहुरेते कुले विनीतवि
द्यामाद्यायापि कल्पचतुष्टयं वेदितव्यं साच परभक्तोपयोगसमशीला इति हलायुधोप्येवमे
वमिश्राश्च परपिण्डोपजीवनेन परतोऽधीतेन शास्त्रेण शास्त्रेण वा विद्योपादानकालेध्याया
दैरपुष्यमाण कुटुम्बकेन साधारणं धनमाश्रित्यापि यदर्जितं तद्विद्यार्जितमविभाज्यमिति
वैद्योऽविद्यायेति नारदवचनं तु विद्यार्जनेपि यत्र धनार्जनं तु साधारणधनोपश्लेष
स्तद्विषयमित्याहुः पितृद्रव्याविघातेन विद्यालब्धपर्यन्ते सर्वत्रैवान्वेतीति पारिजाता
दयः तेच जीमूतवाहनादिमतपोषका भवंति अत्र जीमूतवाहनादिमते विद्यानपरिभाषा
कर्तुः कात्यायनस्य नाविद्यानान्त्विति वचने परिभाषितविद्याधनविषयकत्वं साधु संगच्छ
तेऽउपन्यस्ते त्वित्यादिकन्तु न परिभाषा नारदवचनमपि परिभाषितापरिभाषितविद्या
धनविषयकमिति कात्यायनवचनेनैकवाक्यमिति विधिलाघवं चेति विशेषः चण्डेश्वरादि
मते तु अनुभवाविरोधः उपन्यस्ते त्वित्यादि परिभाषाफलसम्भवश्च इति विशेषः तत्र वि
धिलाघवं यथा पितृद्रव्यानुपघातार्जितं अविभाज्यं दुपघातार्जितं विभाज्यं परिभाषित
विद्याधनं पितृद्रव्यानुपघातार्जितं वैद्यमाध्याय विभजेत् नापरस्मै इति विधित्रयं जी
मूतवाहनमते परिभाषितविद्याधनातिरिक्तं साधारणधनोपश्लेषार्जितं सर्वस्मै विभजे
त् विद्याधनान्यत्वरार्जनकाले पितृद्रव्योपघातसत्वे पारिभाषितविद्याधनं वैद्याय
विभजेत्तादृशं तदनुपश्लेषार्जितं नकस्मैचिद्विभजेदिति विधित्रयं चण्डेश्वराद
मतेऽत्र प्रथमविधौ परिभाषितविद्याधनातिरिक्तत्वस्यानिवेशात् तृतीयविधौ
विद्येत्यादिविशेषणप्रक्षेपाच्च गौरवं अनुभवाविरोधो यथा साधारणधनोपश्ले
षेण ग्रासाच्छादनादिकं कृत्वाऽपात्तविद्येन उत्कटकर्मणा साधारणधनानुपश्ले
षेणार्जितेपि सर्वेषां विदुषामंशित्वं बहुतरसाधारणान्नभोजनेन पुष्टवपुषा श्र
मेण परतो हलादिना कृष्यादितोऽर्जिते नकस्यचिदंश इति विद्याया न्यूनत्वमेव आ
याति जीमूतवाहनमते ऽनुभवविरोध इति यदि च साधारणभक्तोपयोगेनार्जित
विद्येनापि साधारणधनानुपश्लेषेणार्जिते न भ्रात्रन्तरस्यांशित्वमिति विभाव्यते ॥
तदा व्यासादिवचने विद्यालब्धस्य पृथगनुपादानवैयर्थ्यमिति विभावनीयं अत्र यदि कस्मै
चित् अध्यायनाकामाय तदुपयुक्तं धनं कोपि ददाति तत्र काव्यवस्थात इदं नदानं च शास्त्री
यं यथाऽउपाध्यायस्य यो वृत्तिं दत्वाध्यापयति द्विजान् किन्न दत्तं भवेत्तेन धर्मकामार्थ
मिच्छता इति स्मृतिः इति चेत् जीमूतवाहनमते विद्याधनमेव विद्यासम्बन्धाल्लब्धत्वात्

अतः विद्योपादानकालीनग्रासाच्छादनादि किं विविच्यैव व्यवस्थेयं च एडेस्वरादिमते तु
नैतत्तु परिभाषितविद्याधनं अतो धनार्जनकाले साधारणधनोपश्लेषे सर्वेषामंशित्वं त
दनुपश्लेषे तु ग्रासाच्छादनस्य साधारणत्वे विदुषे अंशो देयः नाविदुषे साधारणग्रासा
च्छादनानुपयोगे तु साधारणधनानुपश्लेषे कस्मैचिदपि न देय इति संक्षेपः ॥ अत्र
यदि कियत्कालं साधारणं ग्रासाच्छादनं कृतं तदुत्तरं च भिक्षादिना ग्रासाच्छादनं ए कृतं
वं कियत्कालं कुले विद्यामुपाददात् तदुत्तरं भिन्नकुले तत्र का व्यवस्थेति चेत् यद्विद्यो
पार्जनकाले साधारणग्रासाच्छादनं कृतं या च विद्या कुले धीता तया विद्यया ऽर्जितं धनं
न परिभाषितं विद्याधनं ॥ अथ एकैव विद्या उभयरूपा तया ऽर्जिते का व्यवस्था इति चेत्
। अत्र सूक्ष्मविवेचनया ज्यौतिषादिरूप एक विद्याया यदंशेन धनार्जनं तदंशाध्ययनस्य
अध्यापकग्रासविवेचना कर्तव्या एवं मीमांसादावपि यद्वादमधिकृत्य संशयः प्रवृत्तस्त
द्वादाध्ययनस्य एव विवेचना कर्तव्या यदि च सर्वशास्त्रोपयोगि व्याकरणशास्त्रं कुले
अधीतं तदा कारीतिस्त्रोच्यते धनार्जनोपायविद्योपयोगि व्याकरणविद्यायाः कुले
ऽधीतत्वेपि धनार्जनोपायीभूतायास्तु विद्यायाः कुले अनधीतत्वे परिभाषितत्वभंगो
न भवति यत्र सूक्ष्मविवेचना कर्तुमशक्या तत्र विशिष्टबुद्धिमत्परिकल्पितभाग
हारादरणं कर्तव्यं यथा धनार्जनोपायविद्या द्वस्य कुले अधीतत्वे तद्धनाद्धस्य शास्त्रो
क्तांशो दातव्यः इति ध्येयं शास्त्रोक्तांशः यथा अर्जकस्य द्वावंशौ अनर्जकानां एकैको
ऽंश इति साधारणं समाश्रित्य यत्किंचिद्वाहनायुधं शौर्यादिना प्राप्नोति धनं भ्रातर
स्तत्र भागिनः तस्य भागद्वयं देयं शेषास्तु समभागिनः इति व्यासवचनात् वाहना
युधमिति धनमात्रोपलक्षणं अत्र साधारणवाहनाद्याश्रयः साक्षात् अर्जनोपा
यविद्यापरं परया च वचनवलात् विदुषे विद्याधनस्य यदंशादानमुक्तं कात्यायना
दौस्तदपि न समांसपरमेतद्वचनैकवाक्यत्वात् ॥ वशिष्ठः ॥ येन चैषां स्वयमुत्पादितं
स द्व्यंशमेव हरेत् एतद्वचनमपि साधारणधनोपष्टम्भेनार्जितपरं स्वयमीहित
लब्धं च नाकामो दातुमर्हतीत्यादिना साधारणधनानुपष्टम्भस्थले सर्वहरत्वक
थनात् मन्वादिवचनेषु पितृद्रव्येतिदर्शनात् येनकेनचित् पितृद्रव्येणैव अर्जुनेद्र
दं वोध्यं न तु धनं मात्रेण एवं च पितृसहभावेनैव कस्य भ्रातुरर्जने द्व्यंशभागित्वं युज्य
ते अत एव भ्रातृणामविभक्तानां यद्युत्थानं भवेत्सह न तत्र भागं विषमं पिता दद्यात् ।
कथंचनेति मनुना सर्वेषां भ्रातृणां सहभावेनार्जने समभाग उक्तः अत्र च पितैव साधा
रणं द्रव्यं सर्वेषां पितृत्वात् तथा च पंचपुत्रोत्पादकः पिता एकेनैव पुत्रेण पंचाशत्सुव
र्णानर्जयामास तत्र पितुर्मरणोत्तरं षड्भागान्कुर्यात् किंचिदधिकसार्द्ध षोडशसुवर्णा ९.५

श्लोकः २२

त्वकं भागद्वयं मर्तको गृह्णीयात् अपरे एकैकमंशं किंचिदधिकसुवर्णाष्टकमिति अथापि
तृसहभावे पुत्रस्यार्जनस्थले द्वयोरेवार्जकत्वात् भागद्वयमुचितं एकस्य एकभागं अपर
भागं च पंचधा कृत्वा एकैकं भागं सर्वे गृह्णीयुः नचैवं सति साधारणधनेनार्जनस्थलेपि
तथैवास्तु धनस्य एकोंऽशः स पंचधा करणीयः अर्जकस्य पुरुषस्य एकोंऽशः अखंडस्वा
स्त्विति वाच्यं पितृवत् धनस्यार्जनस्वातन्त्र्याभावेन मुनिवचनोपदर्शितभागकल्पनाया
न्याय्यत्वात् नच यत्र एकस्याश्वेनापरोऽर्जयति तत्र भागद्वयस्य स्मार्त्तैरुक्तत्वेन धनस्या
श्वादेः स्वातन्त्र्याभावेपि समभागो युज्यते इति वाच्यं तत्र यत् किंचिदभिप्रेत्य स्मार्त्तै
रुक्तत्वेपि अत्र मुनिवचनात् साधारणाश्वादिरूपधनप्रश्लेषसत्वेऽर्जकस्य द्व्यंशमात्रा
र्हत्वस्य युक्तत्वात् नच पितृसहभावेनार्जनस्थले पिता साधारणद्रव्यमिति वाच्यं वैपरी
त्यात् पितापुत्रयोरर्जने पुत्रस्यैव प्रधानत्वेन पितृकर्तृकार्जनोपायद्रव्यत्वस्य योग्यत्वा
त् ननु वैषम्यमत्र प्रतिभाति यदि पितापुत्रयोरर्जनस्थले पितुरप्राधान्यमङ्गीक्रियते त
दा पूर्वोक्तस्थले षोडशसुवर्णलाभोऽर्जकस्य पुत्रस्य भवति समतास्वीकारे तु त्रिंशत् सुवर्णा
अर्जकस्य इतरेषां पंचपंच इति चेत् का क्षतिः अत्र केचित् अर्जकस्य अर्जनोपायस्य व्यापा
रानुसारेणैव व्यवस्था तथाहि यत्र अश्वारोहमात्रसापेक्षत्वेन अश्वं दर्शयित्वैव राजादितो
वेतनं प्राप्नोति तत्राश्वस्याधिकं यत्र तु युद्धकरणं अपेक्षितं तत्र द्वयोरेव समता यत्र तु अयं
विनाप्यश्वं योद्धुमीष्टे परन्तु अश्वो वाहनमात्रं तत्राश्वस्य न्यूनत्वं तथा यत्र पुत्र एवार्ज
नोपायव्यापारमुपक्रममाणः पितरमुपयोजयति तत्र पुत्रस्य प्राधान्यात् पुत्रस्य द्व्यंशि
त्वं पितुः प्राधान्ये च उभयोः समत्वे च द्वयोरेवार्जकत्वात् पुत्रोऽ ईदृशः पितुः प्राधान्येपि अ
र्जनोपायः पुत्र इत्यर्ध ईदृश एव अर्जनोपायस्य ईदृशत्वात् साधारणद्रव्याश्रयेणार्जयि
तुर्भ्रातुर्द्व्यंशार्हत्वस्य मुनिनाभिहितत्वाच्च तदिदं स्थूलमेवोक्तं वस्तुतः साधारणद्रव्याश्र
ये भागहार एव युज्यते एतेन यत्र साधारणीं हलबंधनरज्जुमेव गृहीत्वा स्वकीयासाधा
रणगोहलादिभिः कृषिं करोति एवं साधारणमुपानद्युगलमेव गृहीत्वा देशान्तरं गत्वा
भिक्षयति तत्रापि अर्जकस्य द्व्यंशित्वं यत्र च साधारणसमुदायद्रव्येण कृषिं करोति ए
वं साधारणवाहनपुरुषादिना नाविधोपायेन देशान्तरं गत्वाऽर्जयति तत्रापि द्व्यंशित्व
मिति वैषम्यं निरस्तं भागहारविवेचनयैव समाधेयत्वादत एव एतेनैतदपि सिद्ध्यति य
त् साधारणधनोपघातेन यस्य वा यत्नो द्रव्यस्य स्वल्पस्य महतो वा उपघातस्तस्य तदनुसारे
ण भागकल्पना कर्तव्या इति जीमूतवाहन इत्याहुः। एवं साधारणभिक्षयजमानसम्बंधा
दिना तत्तु सम्बन्धपरिचितैरपि यदि संप्रदानस्य गुणमवलम्ब्य दत्तं तदा तु दाने सम्बन्धोप
ष्टम्भाभावात् परिचये सम्बन्धोपष्टम्भेपि न सर्वेषामंशित्वमिति विभावनीयं ननु तस्य भाग

द्वयमित्यत्र युक्तिविरोधः तथाहियः पंचभ्रातृकः साधारणधनोपघातेन त्रिंशतु सुवर्णानर्ज्ज
या मासस भ्रातृभ्यः विंशंतिसुवर्णातु दत्वा स्वयं दशसुवर्णानु गृह्णाती फलतोऽर्जकत्वात्तस्य
पंचसुवर्ण लाभः तत्तुल्याश्रयणेन तुल्यो द्विभ्रातृकोऽपरो यदि त्रिंशतु सुवर्णानर्जयति स पंच
दशसुवर्णानु भ्रातृभ्यां दत्वा पंचदशसुवर्णानु स्वयं गृह्णाति तस्य चार्जकत्वातु फलतः सा
र्द्धसप्तसुवर्णलाभ एवं द्विभ्रातृकस्येईष न्यूनक्षमतायामपि चतुर्भ्रातृकादधिकलाभकर्तृ
त्वं संभवतीति वैषम्यं नहि भ्रातृगतसंख्याया बाहुल्यं अर्जयितुरपराधः येन तस्य हानीः
स्यान्न च व्यासवचनं द्विभ्रातृकस्थल एव नेयं तद्रीत्यैव त्रिभ्रातृकादौ भागह्रारः कर्तव्यः इ
तिवाच्यं शेषाः स्युः समांशिन इत्यत्र बहुवचनानुपपत्तेः न चोद्देश्यगतत्वातु बहुत्वमविवक्षितं द्व्यत्वमपि
वक्तव्यमिति वाच्यं अविवक्षायां अपेक्षाभाव एव नोद्यते न तु बहुत्वे वचना प्रवृत्तिः कुत्रापि दारा
दिपदभिन्ने तद्दादर्शनातु न च भागस्य द्वयं येन प्रकारेण तं प्रकारमवलम्ब्य तस्यार्जकस्य
देयं तथाचार्द्धं देयमिति फलितार्थः एवं च कुत्राप्यसंमतिर्नास्तीति वाच्यं केनापि निबंध
कारेण तथालिखनातु इति चेदत्र केचितु व्यापारलाघवगौरवविवेचनयाऽंशकरणं य
द्यपि क्वचिदर्जकस्यार्द्धं ग्राहित्वस्वीकारावश्यकत्वातु ततु स्थलविषयकतयैव वचनसामंज
स्यं निबन्धकाराणामलिखनस्य किंचितु करत्वं इत्याहुः वस्तुतस्तु दायभागप्रकरणीय
मिदं संभूय वणीजां मातृष्वसेयानां साधारणमश्वमादायकेन चित्तन्मध्यपातिनाऽर्जने
र्जकस्य द्व्यंशित्वं न केनापि मुनिनाऽभिहितं तत्र चाश्वादेर्भाटकादिरेवलब्धव्यः न त्वंशो
स्फुटचेतनस्यांशग्रहणायोग्यत्वातु भवतु वा स्वीकारादिवशादंशो भाटकादिरूपः ए
वं च अनर्जकानां भ्रातृणां स्वसम्बन्धाश्विनस्वाविभक्तस्वपितृपुत्रेणर्जनादंशलाभः
अतएव भ्रातृसंख्याया बाहुल्यस्थले स्वस्य बहुभ्रातृत्वमेव पितृकृतविभागे पितुर्बहु
पुत्रत्वमिवापवाधः अतएवानुपष्टम्भेनापि अर्जिते शौर्यादिधनभिन्नेऽमर्जका
नामपि अंशित्वमाशंक्य जीमूतवाहनेन तन्निराकृतं ननु यद्यविभक्तभ्रात्रानुपष्टंभे
नाप्यार्जितेऽनर्जकानामपि अंशित्वे युक्तिरस्ति तदा कथं तन्निराकरणं भवेन्न च अनु
पघ्नतु पितुर्द्रव्यं स्वशक्त्याप्नोति यद्धनं स्वयमीहितलब्धं च नाकामो दातुमर्हतीत्यादि
मन्वादिवाक्यादेव निराकारणमिति वाच्यं मन्वादिवचने स्वशक्त्येत्यास वचने शौ
र्यादिनेति दर्शनातु याज्ञवल्क्यवचने स्व[illegible]यमर्जितमित्यत्र स्वयकृतिजन्यार्जनवि
षयत्वत्यर्थकरणातु स्वकीयकायव्यापारार्जितपवानं शित्वमित्युक्तौ क्षतिर्विरुद्ध यदि
तिचेन्न तादृशकल्पने प्रमाणाभावात् तथाहि भ्रातृणां संभावितस्वत्वबद्धनद्वारा
र्जित एवाधिकारो लाघवेन वक्तव्यः अविभक्तभ्रात्रर्जनन्नु अन्येषां भ्रातृणां स्वस्वत्वे
न केवलं स्वयंकारणं अपितु साधारणधनसम्बन्धसहकारणैवेति तन्नेवं चेतु ज्येष्ठ

भ्रातामृतपितृकान् भ्रिष्णून् स्वार्ज्जितेन धनेन पुष्णाति तदोत्तरकालं प्राप्तव्यवहारेभ्यस्ते
भ्यस्तद्धनं प्राप्नोतु इति चेन्न पितेव पालयेन्नित्यं ज्येष्ठभ्राता इत्यादिस्मृतिवचनैः ज्येष्ठभ्रातुः
पितृश्राद्धमिव भ्रिष्णुभ्रातृपालनमपि कर्त्तुमुक्तत्वात् एवं च यत्र अस्योवाहनोपयुक्तः नोत्कृष्टो
नवापकृष्टस्तेनास्मिन्नाविभक्तो भ्राता ऽर्जयति स च नातिकुलीनवाईषत्कुलीनवा ऽकुलीनस्त्वा
न्येषामेकैकांशित्वं अर्जकस्य द्व्यंशित्वं द्विरर्जयितुरिति जीमूतवाहनधृतवाक्यमपि तद्विषयक
मेव तस्यैव भागद्वयहारेण अन्यत्रापि व्यवस्था कल्पनीया मुनुक्तस्यैव प्रकारस्य भागहारो ऽन्य
त्रयुक्तः इति एषा अविभक्तार्जिते एव व्यवस्था सर्वग्रन्थकारमतसिद्धा च रुद्रेश्वरादिमते
विद्याधनस्य विद्यावते यद्भागदानं तदन्यैव रीत्या यत्तु जीमूतवाहनादिमते तत्र विद्याधनस्य
परिभाषितस्यानुपष्टम्भेनापि अर्जितस्य विद्यावतो ऽनर्जकस्यांशित्वेन एतादृशरीतेरन
वकाशात् समभाग एव देयः समंस्यादश्रुतत्वादिति न्यायादिति तु विशेष इति ॥ तन्न साधा
रणधनोपष्टम्भसत्वे भागद्वयलाभेन विषमशिष्टापत्तेः ॥ नारदः ॥ कुटुम्बं बिभृयाद्भ्रातुर्यो
विद्यामधिगच्छतः भागं विद्याधनात्तस्मात् स लभेताश्रुतोपि सन् अत्र बिभृयादित्येक
वचननिर्देशात् यदि विद्यामभ्यस्यतः भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययस्वशरीरायासा
भ्यां संवर्द्धयति तदा तद्विद्योपार्जितधने तस्याधिकार इति जीमूतवाहनः स्मार्त्तो अप्येवं ।
तद्विद्योपार्जितधने इति तथा च यद्विद्याभ्यासकाले तत् कुटुम्बभरणं भ्रात्राकृतं तद्विद्योपार्जि
तधन एवांशः न त्वन्यविद्योपार्जितधने इति भावः अत्र अधिगच्छत इति लट्प्रत्ययसमाना
र्थकशतृप्रत्ययेन वर्त्तमानकाल एव कुटुम्बभरणं ज्ञेयं वर्त्तमानकालश्च यत्रारब्धाफ
लान्तैकक्रियाकालः स वर्त्तते इति शाब्दिकपरिभाषणात् आरम्भावधिसमाप्तिपर्य्यन्त
सिद्धिर्यावत्कालेन भवति तावानेव कालः अत एव विद्याभ्यासघटकभूतानां क्रियाणां
कासांचिदतिक्रमे विद्यामभ्यस्तवानिति न प्रयोगः एवं च आरम्भावधिशेषपर्य्यन्तं कु
टुम्बभरणादेवांशलाभः ननु तन्मध्ये यत् किंचिद्दिनेपि विद्यामभ्यस्यतीति प्रयोगात् ॥
तद्दिने कुटुम्बभरणादपि अंशप्राप्तिरस्तु इति चेत् आरम्भावधिशेषपर्य्यन्तस्वघटकक्रि
याकलापस्यैवात्र लक्षणीयत्वात् तथा चैतद्विद्यापाठघटकीभूतप्रतिदिनाध्ययनरूप
क्रियाकलापानां प्रत्येकसमानकालीनकुटुम्बभरणमेव अंशप्रयोजकमिति भावः
। एकवचननिर्देशादिति यदि द्वौ भ्रातरौ स्वधनव्ययशरीरायासाभ्यां बिभृतः तदा किंस्या
दिति चेत् तत्र एकमेव भागं द्वौ विभज्य गृह्णीतां उभयस्यैव एकत्वेन प्रतीतिः यथा महि
षमहिष्युभयं एकं हस्तिहस्तिन्युभयमेकमित्यादि ननु एकवचनादरस्य किं फलमि
ति चेत् अत्र भागद्वयादानं साधारणधनव्ययेन कुटुम्बभरणे भागादानं च इत्यवेहि न
नु साधारणधनव्ययेन कुटुम्बभरणं कुर्वतेऽंशादाने ऽनुभवविरोधः साधारणेपि अविद्य

स्वतस्यस्वत्वादितिचेन्न अविद्यकुटुम्बस्येव पाठककुटुम्बस्यापि साधारणद्रव्योपभोगार्ह
त्वान्नच कुटुम्बभरणे पाठकस्य शारीरायासोनभवति अन्यस्य शारीरायासोवर्त्ततइतिविद्या
धने पूर्णांशानधिकारेपि अर्द्धांशाधिकारोस्त्विति वाच्यं जीवति यत्र जीवंति विप्रामि
त्राणिबान्धवाः सफलंजीवितंतस्य आत्मार्थेकोनजीवतीत्यनेनबान्धवाइतिकुटुम्बा
द्यर्थकपदप्रयोगात् कुटुम्बभरणोपयोगिनगुणस्यश्रवणेनतन्मात्रविद्यागुणाज्ज्येष्ठो
द्व्यंशमादायादवाप्नुयादिति बृहस्पतिवचनेनयुक्त्या केवलगुणयोगेप्यंशाधिक्यबोध
नात् कुटुम्बार्थेषुचोद्युक्तस्तत्कार्यंकुरुतेतुयः सभ्रातृभिर्बृहंणीयोग्रासाच्छादनवाह
नैरितिनारदवचनाच्च असदायत एवज्येष्ठांशादानेनशारीरायासवेतनस्यसिद्धत्वात्।
परंतुपैतृकधनहानिनपैतृकसम्बंधमवलंब्ययाचयाँदिनाधनमर्जयित्वापाठकस्यकुटु
म्बभरणेविद्याधनात् किंचित्प्राप्तुमर्हतीतिविवेचनीयं मैत्रंमित्राल्लब्धंप्रीत्यालब्धमित्य
र्थः यद्विचमित्रायप्रीत्याकिंचिद्धनंदत्तंततःसोपितद्गृहीत्वापुनः तस्मैदात्रेप्रीत्याददाति
तदपिनविभाज्यं दास्यतीत्यभिसंधायदानाभावात् यत्रतुदास्यतीत्यभिसन्धानंवर्त्ततेतत्र
चण्डेश्वरादिमतेतद्धनस्यविभागोवेदितव्यः मित्राल्लब्धमित्यनेनमित्रत्वात् लब्धस्यै
वबोधनात् नचेदंमित्रत्वात् लब्धंकिंतुदातृत्वात् यत्रच परस्परंमित्रभावापन्नयोःपर
स्परंपूजाक्रियते तत्रपूर्वंयोददातिसजानात्येवअयमपिदास्यतीतिगृहीतापिचिंतय
तिअयंदत्तवान् अहमपिददामीतितत्रयद्धनं तद्विभाज्यंनवेति अत्रोच्यते ममस्वत्वा
ददातुइत्यभिसन्धानाभावेपिदानावश्यकत्वात् अदानेचसख्यस्यनिकृष्टत्वात्॥
परस्परदानसत्वेपितद्धनंनविभाज्यं परन्तुस्ववित्ताद्यनुसारमतिक्रम्यकेवललोभा
त् प्रीतिच्छलेन अधिकलाभमात्राकांक्षया दायादवंचनाकांक्षयावायोददातिमि
त्रेणतस्मैदत्तंधनंविभाज्यमित्यनुभवद्भिरवधेयं।औद्वाहिकमाहमनुः॥ यल्लब्धं
लाभकालेतुस्वजात्याकन्ययासह।कन्यागतंतुतद्विद्यात्शुद्धंवृद्धिकरंस्मृतं।वैवा
हिकंतुतद्विद्यात्भार्य्ययायत्समागतं धनमेवंविधंसर्वंविज्ञेयधर्म्मसाधकं स्वजात्ये
तिसवर्णयाएतच्चधनशुद्ध्यर्थमुक्तं असवर्णाविवाहेपिलब्धं अविभाज्यमेव अत्रलाभ
कालेइतितत्पूर्वकालस्याप्युपलक्षणं तदानींदत्तस्यापिशुद्धत्वात् अविभाज्यत्वात् क
न्यासम्बन्धाल्लब्धत्वाच्च सहागतमितिविवाहंकृत्वाभार्य्यामानयतेवरायतुधनंदीयते
तदित्यर्थः॥ विवाहोत्तरंश्वश्रुरादिभिर्यत्तुदीयतेतन्माधुपर्किकमेवज्ञेयंमधुपर्कःअति
थ्यादेःपूजातत्संपर्कात्लब्धंमाधुपर्किकं तथाचगृहमागतायअभ्यर्हणीयायअर्घ्यपा
द्यगवादिकंनिवेदयेत् गांचैवार्घ्यंन्यवेदयेदितिमहाभारतदर्शनात् एषुसर्वेष्वेवसाधा
रणधनोपश्लेषःसंभवतिइदानीमिमंपूजयामिपश्चादसौपूजयिष्यतीत्यभिसंधानसंभवा ९७

(श्लोकः२१

तु परंतु शास्त्रवृत्तिव्यवहारवहिर्भावेन उद्धारप्राप्त्यर्थं साधारणं धनं येन केनचिद् विभाज्यत्वं शा
स्त्रवृत्तिव्यवहारानुसरणे तु साधारणधनोपश्लेषसत्वे ऽविभाज्यत्वं च चण्डेश्वरादिसम्मतं तत्र
विभाज्यत्वमिति जीमूतवाहनादिमतं । याज्ञवल्क्यः । क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च पितृपितामहागतं बलादन्यैर्हृतं सोऽप्यन्यतरानुज्ञ
याउद्धरति तदंशप्यन्तरेभ्यो न दद्यादिति स्मार्त्ताः अंशप्यन्तरानुज्ञापि स्यान्मूलं अत्र चांशप्यन्तरा
णामनुज्ञयेति मिताक्षराकारोक्तिः एतद्वनच चण्डेश्वरादिसम्मतं तेच अंशप्यन्तरानुज्ञावोधक
पदाभावात् तदपेक्षा नास्तीत्याहुः यत्र पंच भ्रातरः अविभक्ताः एकंच पैतामहद्रव्यं अन्येन
हृतं पित्राऽशक्तत्वात् अनुद्धृतं अत्र पंचैव भ्रातरः उद्धर्तुमिच्छंति किन्तु कालापेक्षां कुर्वते पौ
रुषं दैवसंपन्नाः काले फलति पार्थिवेत्यादिवचनात् मध्ये च कोप्यतिशठः सहसा उद्धर्तु
मुपचक्रमे भाग्यवशात् फलसिद्धिर्जाता तत्र तद्द्रव्यस्याविभाज्यत्वेनुभवविरोधः चण्डेश्वरा
दिमते परन्तु तत्र अन्येषां भ्रातॄणां उद्धारापेक्षा अपेक्षणीयेति युक्तमुत्पश्यामः तत्र चा
नुपेक्षितस्य भागदानं इति मिताक्षरास्मार्त्तादिभिरभिमतं । तत्रापि भागः तुरीयांश उद्ध
र्त्रे दत्वा क त्र्यंश इति तेषां मते प्रतीयते तुरीयांशप्रदानं च शंखवचनात् भूमौ दृश्यते अत्रापि त
देवस्मार्त्तजीमूतवाहनग्रन्थे भूमौ विशेषमाह शंखः पूर्वनष्टां तु यो भूमिमेक एवोद्धरेत्
श्रमात् यथाभागं भजन्त्यन्ये दत्वांशं तु तुरीयकं अत्र भूमौ विशेषमाहेति दर्शनात् उपेक्षि
तोद्धारायामपि भूमौ तुरीयांशप्रदानं ॥ अत्र यावती भूमिरुद्धृता च तु शतहस्ताद्यात्मिका
तत्तुरीयो भागः शतहस्ताद्यात्मिका सैव उद्धर्त्री गृह्णाति अनुद्धर्तारश्च पंचसप्तदशवा भ्रा
तरः त्रिशतहस्ताद्यात्मिकां भूमिं गृह्णीयुरिति व्यवस्था अन्ये इति वचनस्वरसादवगम्य
ते इत्युक्तं विषमशिष्टं तथा हि यत्र द्वयोर्भ्रात्रोर्मध्ये एक उद्धर्ताऽपरोऽनुद्धर्ता तत्रानु
द्धर्तुस्त्रिपादी उद्धर्तुरेकपाद इति तस्मादन्ये इत्यविवक्षितं विवक्षितत्वे वा विभागकर्तृत्वेना
न्वितं न तु भागग्राहित्वेनापि तथा च उद्धर्तृसाधारणभ्रातृसंख्यया भागं कुर्युरित्यर्थः अथ
वा अन्येऽन्येपीत्यर्थः भागसंख्या च भ्रातृसंख्या च तुर्गुणा पुनरेका च उद्धर्त्ता पंचभागान् ।
गृह्णीयात् इतरे चतुरश्चतुरो भागानिति तुरीयांशमिति पूर्णभागं तुरीयांशमित्यर्थः भ्रा
तृसंख्या बहुलस्थले उद्धर्तुरल्पलाभः भ्रातृसंख्याल्पत्वस्थले चोद्धर्तुरधिकलाभ इति तु
स्वीकार्यमेव साधारणधनोपश्लेषेण स्वार्जितद्रव्य अत्र च यदि द्वावुद्धर्तारौ तदा एकमे
व तुरीयांशं विभज्य गृह्णीयातां एकस्यापारस्यैव उभाभ्यां कृतत्वेन अंशलाभाधिक्यस्यायु
क्तत्वात् न च भूमावेवमस्तु अस्या दाद्यावनुपेक्षितोद्धर्तुस्तुरीयांशलाभे किं प्रमाणमिति
वाच्यं उद्धारकस्य व्यापारस्य तत्र स्यावश्यकत्वात् न च तथापि तुरीयांशनियमः कथमि
ति वाच्यं एकत्र निरूपितः शास्त्रार्थो बाधकं विनाऽन्यत्रापि प्रवर्त्तत इति न्यायेन भूमिगत।

याथवस्थाया अत्रापिनेयत्वात् नचसाधारणधनोपश्लेषेणस्वार्जितेयाद्युंभग्राहिकव्यवस्था
साकथमत्रनायातीतिवाच्यं असिद्धवस्तुनःसाधनोपयुक्तव्यापारापेक्षयासिद्धवस्तुनोदो
षोद्धारोपयुक्तव्यापारस्यलघुत्वात् यदिचान्यैर्भ्रातृभिर्निसिद्धंकालप्रतीक्षांविनाउद्धरति
तदातुनतुरीयांशलाभोपीत्यनुभवः एतत्पूर्वंनष्टांतुयोभूमिमित्यादिग्रंथस्ववचनमिता
क्षराधृतंस्मृतिमहार्णवकामधेनुकल्पतरुपारिजातप्रभृत्यलिखनाच्च ऐश्वरेणानादृ
तंमिताक्षरादर्शनाच्चस्मार्तैरादृतं जीमूतवाहनेनाप्यादृतंअन्येतुएतद्वचनस्यसमूलकत्वे
पिभूमिमित्युपलक्षणंअनुपेक्षितोद्धारविषयकं उपेक्षितोद्धारेतुभूमावपिअविभाज्यत्वमि
त्याहुः॥ व्यासः॥ विद्याप्राप्तंशौर्यधनंयच्चसौदायिकंभवेत् विभागकालेतत्तस्यनान्वेष्ट
व्यंतद्धरिक्थिभिः विद्याप्राप्तंविद्याधनंतच्चप्रागुक्तंसाधारणानुपश्लेषार्जितंपरभक्तयाद्युप
योगेनलब्धविद्ययार्जितं इतिजीमूतवाहनादिमतंपरभक्तोपयोगेनलब्धविद्ययापणपूर्व
कोपन्यासतरणादिनालब्धं लाभकालेसाधारणधनोपयोगेनतदभावेनवेति च ऐश्व
रादिमतंशौर्यधनंयथामनुः॥ आरुह्यसंशयंयत्रप्रसभंकर्मकुर्वते तस्मिन्कर्मणितु
ष्टेनप्रसादःस्वामिनाकृतः तत्रलब्धंतुयत्किंचिद्धनंशौर्येणतद्भवेत् ध्वजाहृतंभवेद्यत्त
विभाज्यंनैवतत्स्मृतं संग्रामादाहृतंयत्तुविद्राव्यद्विषतांबलं स्वाम्यर्थेजीवितंत्यक्त्वातद्ध्वजा
हृतमुच्यते अर्थव्याकारायपुनर्धारणंसंशयंजीवनसंशयं मारुह्यत्रातापिप्रसभंहठा
त्कारेणकर्मस्वामिनःदुष्टशत्रुवधनिर्यापनादि ननुयुद्धमात्रमेवजीवनसंशयप्रयोजक
मितिचेत्संशयमित्यनेनप्रबलशत्रुसमक्षादिरूपलक्ष्यतेतस्मिन्नित्यादि तथाच प्रसा
दधनमेवशौर्यधनमनेनवचनेनोक्तं ध्वजाहृतंभवेद्यच्चेतिचकारात् पूर्वोक्तंशौर्यधनंस
मुच्चीयअविभाज्यत्वमुक्तंजीवितंत्यक्त्वास्वाम्यर्थापेक्षयाजीवितेगौरवंत्यक्त्वाइत्यर्थः।
तथाचघोरसंग्रामोत्तरंशत्रुबलविद्रावणंकृत्वा शत्रुसेनातोलुण्ठितधनंध्वजाहृतं एत
द्द्वयंपरिभाषितधनंच ऐश्वरादिमते अत्र स्वामिनःप्रसादार्थयुद्धातुपूर्वंसाधारण
धनव्यये कृतेपि प्रसादधनस्याविभाज्यत्वंउभयत्रैवसाधारणाश्वादिसहकारित्वेपिअवि
भाज्यत्वंधनुर्विद्यादौ अन्यूनभारस्यांशोदेयः कर्षकस्यकृषाविवविदुषोपिविद्याकर्म
णियोग्यत्वेतंप्रतिउत्कटत्वाभावात्॥ जीमूतवाहनादिमतेतु एतत्प्रदर्शनपरं अत्रसा
धारणधनोपश्लेषेतुविभाज्यत्वंसौदायिकमितिव्याख्यातंसुदायेभ्यः पित्रादिभ्योलब्धं
सौदायिकंनारदः शौर्यभार्याधनेहित्वायच्चविद्याधनंभवेत् त्रीण्येतान्यविभाज्यानि
प्रसादोयश्चपैतृकः मात्राचस्वधनंदत्तंयस्मैस्यात्प्रीतिपूर्वकम् तस्याप्येषविधिर्दृष्टोमा
तापिदद्यथापिता॥ व्यासः॥ पित्रामह्येनयद्दत्तंपित्रावाप्रीतिपूर्वकं तत्तस्यनापहर्तव्यंमात्रादत्तं
चयद्भवेत् भार्याप्राप्तिकालेप्राप्तंधनंभार्याधनंप्राप्तंचसहभार्ययेतिभरद्वाजैकवाक्यत्वात् ५.८

नतुभार्य्यायाधनंभार्य्याधनमितिषष्ठीतत्पुरुषः तद्धनस्यस्त्रीधनत्वेनभ्रातृभागप्रस
क्त्यभावात् इतिग्रंथकाराणामाशयः मातापीष्टेद्वृतिस्त्रीधनविषयमिदंवृतिरत्नाकरः। दु
हितृसंक्रांतमातामहधनविषयकमपिसंभवति तदानींतद्धनेतस्याएवस्वामित्वात् अ
पुत्रधनाधिकारेवक्ष्यमाणरीत्याअस्यादाननीषेधेपिभक्तत्वादिनापुत्रायदत्तंसिद्ध्यत्येव
अत्रचदंपत्योर्मध्यगंधनमितिवचनात् जीवद्भर्तृधनेपिभार्यायाअधिकारेपितद्धनंतया
दत्तंनसिद्ध्यतितदानींतद्धनेतस्याअस्वातंत्र्यात ननुअपुत्रपितृधनेपितस्याःसधवायाअ
स्वातंत्र्यमेवभार्य्यापुत्रश्चेत्यादिवचनेनवोध्यते स्त्रीधनएवस्त्रीणांस्वातंत्र्यंवक्ष्यतेजीवद्भ
र्तृधनंयथामुनिवचनादुभयस्वत्वास्पदीभूतंतथापत्न्याजन्मकायव्यापारादिनार्जितमपि
उभयस्वत्वास्पदीभूतमविशिष्टमितिचेत् अत्रपितामहचरणाजीवतुपत्नीधनेपत्युःस्व
त्वंजीवतपतिधनेचपत्न्याःस्वत्वंनांगीकुर्वन्तिवचनस्यानर्थादत्तविषयत्वात् तदुभयं
स्वीकुर्वन्तितन्मतेपत्न्यार्जितेपत्नीपरतंत्रंपतिस्वत्वंपतिधनेचपतिपरतंत्रंपत्निस्वत्वंप
त्न्याःशरीरादौचपतिपारतंत्र्यमेववदंति अतोविनापत्यनुमतिंतयादत्तंनसिद्ध्यतीतिवद
न्तिवदंतिकेचित्तुअतिथिसेवादिवत् सिद्ध्यत्येवनचातिथिसेवादिनसत्वेमान्यतःपत्य
नुमतिरस्तीतिनतुसिद्धिः अत्रानुमत्यभावेकथंसिद्धिरितिवाच्यंअनुमत्यभावेपितत्करणं
व्यवहारादितिवदंति तन्नप्रमाणस्यसिद्धंप्रतिभातिपत्यनुमतिसत्वेतुतयादत्तंप्रसादो
निर्विवादंसिद्ध्यतितत्रपत्यनुमत्यनुमानंचतदेवकर्त्तव्यं यदिमात्राकृतंस्वानभिमतमपि
परतोज्ञात्वापितानासंमतिव्यंजनंकरोतिवदतिचद्वयंयथेच्छंकरोत्विति पितृदत्तेच।
त्रचद्वंदमवधेयंकामक्रोधादिवशातापन्नेपित्रादत्तमनुमतंचनसिद्ध्यतिगुणविवेच
नयाधर्म्मादिविवेचनयाचदययादत्तमनुमतंचसिद्ध्यतीति अत्रचसम्बन्धिवाचकपि
त्रादिपदस्वरसात् अन्येनदत्तंविभाज्यमितिसाधारणधनानुपश्लेषेणपित्रादिभि
न्नात्प्रतिगृहीतंव्यवस्थापयंति ततुपूर्वमेवनिराकृतंअत्रचपित्रादिधनंतुभ्यंदत्तमपि
मत्पित्रादिधनत्वात्ममयापिविभजनीयमितिसन्दिहानस्योत्तरमिदंसम्बन्धिवाचकप
दघटितं अतएवव्यासवचनेतत्तस्यनापहर्त्तव्यमित्युक्तमितिध्येयं एकस्यैवद्रव्यस्यएक
स्मैपुत्रायदत्तस्यपुनरपरस्मैदानेपूर्वसंप्रदानीभूतपुत्रएवगृह्णीयात् आद्योप्रतिगृहेक्री
तेपूर्वान्तुवलवत्तरेति याज्ञवल्क्यवचनादितिस्मार्त्ताः यत्तुनर्मनुवचनंयत्तु किंचित्पित
रिप्रेतेधनंज्येष्ठोऽधिगच्छतिभागोयवीयसांतत्रयदिविद्यानुपालिनः अस्यायमर्थः
पितेवपालयेत् पुत्रान् ज्येष्ठोभ्रातॄण्यवीयसः पुत्रवच्चापिवर्त्तेरन् ज्येष्ठेभ्रातरिधर्म्मतः त
स्मात्वचनात्पितापुत्रवदवस्थानात् पित्रर्जितद्रव्यअनुपघातार्जितेपिज्येष्ठधनेकनिष्ठा
धिकारः एतावान्परंविशेषःपित्रर्जितेऽविदुषामप्यधिकारः ज्येष्ठार्जितेतुविदुषामेवएत

च्चपितरिप्रेतेइतिज्येष्ठइतीयस्तामीतिविद्यानुपालिनइत्यादिपदप्रयोगस्यानर्थक्यात् सिद्ध्य
ती तिजीमूतवाहन पंक्तिः एतच्चविद्यानर्जितपरं विद्याधनस्यजीवतिपितरिकनिष्ठार्जि
तस्यविद्यानुपालिनेज्येष्ठ यापिदातव्यत्वात् अत्रचविद्यागतस्यसमन्यूनत्वविवेचनंनकृतं
मुनिनातत्त्वेदानींज्येष्ठकनिष्ठयोः पितापुत्रवद्भावाभावादेषाव्यवस्थानोपादेयेतिप्रतिभाति
अत्रजीमूतवाहनः यश्चानुपघाताजित प्रतिग्रहधनस्यविभागःशिष्टानांदृश्यतेसभ्रातृ
स्नेहेनपौरुषबुद्ध्यावानानुपपन्नः यच्चप्रतिग्रह धनस्य विद्याधनत्वाद्विद्याधनेवसा
धारणधनानुपघातार्जितेपिसमविद्याधिकविद्यानांभागस्यवाचनिकत्वेन तद्विभागंप
श्यंतोविद्याधनस्यविद्याविशेषकृतोयं विभागइत्यज्ञानन्तोऽविभक्तार्जितत्वेनायं वि
भागइतिभ्रांताःस्वयमपितथैवव्यवहृतवन्तः। तन्मूलश्चापरइतिनकिंचि नुपप द·
न्नमित्याह तथाचअविभक्तार्जितत्वमात्रेणविभागः स्नेहमूलकः पौरुषमूलकोभ्रांति
मूलकोवेत्याशयः अपरमविभाज्यमाह तुः संखलिखितौ नवास्तुविभागोनोदकपात्रा
लंकारार्थयुक्तस्त्रीवाससां अपांप्रचारार्थं विभागश्चेतिप्रजापतिः वास्तुगृहंतथाचयत्र
जीवत्येवपितरिपंचभ्रातरः पंचसुगृहेषुशयनभोजनादिकंपरस्परव्यतिरेकेणकुर्वंति
तत्रमितेपितरि विभागकालेतस्मिंस्तस्मिन्नेव गृहेसतिष्ठेतु नात्रगुटिकापातःकर्तव्य
इतिभावः यदितुपंचगृहानसन्तितदाविभागंकुर्युरेवज्येष्ठक्रमेणपूर्वगृहदानांतरंअ
परगृहकरणंयुक्तं अत्यन्तवैषम्येतुविभजनीयमित्यनुभवः अत्रउदकपात्रंलौहवारि
भाजनंअलंकारोऽगन्यस्तएवअर्थयुक्तंउपभुक्तंतेनैकोपभोगविषयस्त्रीवाससांनवि
भागइतिप्राप्यतेइतिरत्नाकरः॥ लौहंतैजसंसर्वंचजैजसंलैहमित्यमरोकोषात् तथाच
जीवतिपितरियोयत् जलपात्रेणव्यवहरेत् इदानीमपिसएवतद्गृह्णीयात्नात्रगुटिका
पातइतिभावः एतदपिजलपात्राणांप्रत्येकव्यक्तिविश्रान्तत्वेअत्यन्तवैषम्याभावेचे
त्यनुभवोव्यवहारश्च अलंकारइतिअयंनप्रसाददत्तः किन्तुधार्यमाणएवअत्रापिअ
त्यन्तवैषम्यंवर्जनीयं यदिचकतिचिदलंकाराःकोषगृहेतिष्ठन्तिउत्सवेषुकदाचित्तुके
नचित्तुधार्यन्तेतत्रतेऽलंकाराअधारकस्यापिविभजनीयः तत्रअस्यइमेइतिप्रत्यया
भावादिति एवंवस्त्रेपिकिंतुअयमिदंवस्त्रंइममलंकारंवापरिदधातुइतिपितुर्ज्येष्ठभ्रातु
र्योगक्षेमकर्तुर्वाइच्छयापरिधानारम्भदिनएवविभागप्रशक्तौतस्यैवतद्वस्त्रं सोऽलंकार
श्चइतिविभावनीयं।अपांप्रचारार्थः जलनिर्गमहेतुः प्रणालीतियस्यास्थ्याअपांप्रचा
रथ्यानांविभागश्चेतिप्रजापतिरितिस्मार्त्तसम्मतः पाठः तत्ररथ्यापन्थागोमनुष्यादिग
मनोपाय अत्रचेतु भिन्नभिन्नस्थानेषुजलनिर्गमपथसंभवः तदाविभागेपिनदोषः
नतुएकस्यभ्रातुःप्रांगणएवपूर्वक्रमपथेनावश्यजलंनिर्गमयेदितिनियमः किन्तुतत् ९

।श्लोकः २८

स्थानंसर्वएवदर्शयेयुरितिअनुभवः मनुविष्णु ॥वस्त्रंपत्रमलंकारः कृतान्नमुदकंस्त्रि
यः योगक्षेमप्रचारंचनविभाज्यंप्रचक्षते वस्त्रमंगयोजितमितिजीमूतवाहनः पत्रंलि
ख्यविनिष्टंधनधनंपत्रनिविष्टमिति कात्यायनैकवाक्यत्वात् इतिच एडेश्वरः अतएवता
वद्वनंदत्तमितिनिजव्यवहार पत्रे पित्रादिनालिखितमितिभावः पत्रंवाहनमश्वादिक
मितिहलायुधप्रकाशकारजीमूतवाहनादयः पत्रंवाहनपक्षयोरित्यमरः कृतान्नंल
डुकादिइतिजीमूतवाहनः॥ शाकादीतिरत्नाकरः तण्डुलादीति पारिजातः वस्तुतः
सर्वएकल्पाआदरणीयाः आदिपदेनसर्वेषांग्रहणासम्भवात तथाचस्वपुत्रदुहि
त्रादि भोजनार्थंयतुलड्डुकादितण्डुलादिंकृतंतम्न विभाज[illegible]वः उदकंवापी वा
कूपगतव्यतिरिक्तंप्रचारोपयुक्त मितिजीमूतवाहनः वस्तुतः एक[illegible]दौविभागाभा
वेउद्धृत्यकूपवाप्यंभस्त्वनुसारेणगृह्यते इतिवृहस्पतिनाकूपादेर्भागस्यप्रकारान्तरेण
प्रतिपादनात् अन्यवस्तुविभागवदस्यनविभागइतिमनुविष्णोराशयः एवंपूर्ववाक्ये
पत्रेनिविष्टस्वकीयधनादेरपितथाविभागाभावः इतिभावः उदकंउदकपात्रंशंख
लिखितोक्तमितिकेचितु स्त्रियःसंभुक्ताइतिरत्नाकरः तथाचयोयांदासींसंभुक्तवा
नुसतामेव गृह्णीयादितिभावः एषाचव्यवस्थावहुदासीकत्वेनियतसंभोगेवइति
ज्ञेयं अत्रमूलंअविभागःस्त्रीषुसंभुक्तास्वितिगोतमैकवाक्यत्वं संभोगोव्यवहारपा
दसंवाहनादिरपि अत्रस्त्रियोदासीव्यतिरिक्तायोगक्षेमप्रचारःशय्याभोजनाच
मनाद्युपयुक्तभाजनानीतिजीमूतवाहनः॥ योगक्षेमंमन्त्रिपुरोहितादितद्धेतुत्वात् ।
प्रचारोगवादीनांप्रचारणमार्गइतिरत्नाकरः तन्मतेयोगक्षेममितिसानुस्वारःपाठः
अथवाशाकपार्थिववत् कर्म्मधारयः यथायोगक्षेमसहितःप्रचारयोगक्षेमप्रचार
इतियोगक्षेमंपितृक्रमेणराजकुलादौउपजीव्यमितिप्रकाशः यानेनयोद्धृतंचचा
मराविविक्रयस्तवादिइतिभावः यानादीनामपिमासविशेषादिनियमेनविभागो
व्यवहारासिद्धःसतुवृहस्पतिसम्मतः॥ इतियोगोयोगहेतुर्नौकादिःक्षेमःक्षेमहेतु
र्गदिरितिहलायुधः एतेनानाग्रंथग्रन्थकारोक्ताःक्वचितुक्वचितुसर्वएवाविभजनीयाइ
तिमन्तव्यं॥ व्यासः अविभाज्यंसगोत्राणामासहस्रकुलादपि याज्यंक्षेत्रंचपत्रंचकृतान्न
मुदकंस्त्रियः क्षेत्रंवास्तुगृहमितिश्च एडेश्वरः॥ क्षेत्रंवास्तुसाधारणभूमिरितिकेचितु॥
याज्यंयागस्थानंइतिजीमूतवाहनः यागोदेवपूजा॥ कात्यायनः॥ धनंपत्रनिविष्टंच
धर्मार्थंयन्निरूपितं उदकंचैवदासाश्चनिवंधोयःक्रमागतः धृतंवस्त्रमलंकारोनानूरू
पंचयद्भवेत् यथाकालोपयुक्तानितथायोज्यानिबन्धुभिः गोप्रचारश्चरथ्याचवस्त्रंय
च्चांगयोजितं प्रयोज्यंनविभज्येतशिल्पार्थंचवृहस्पतिः देशस्यजातेःसंघस्यधर्म्मोग्राम

स्ययेभृगुः उदितःस्यातुसतेनैवदायभागंप्रकल्पयेत् पत्रनिविष्टंधनंकस्मैचितूदत्तंवाप्रति
श्रुतं वाधर्म्ममुद्दिश्य अथवाधनं पत्रनि विष्टंऋणंधर्मार्थं यन्निरूपितं तन्नविभाज्यं उ
दकंदेवाराधनघटादिइतिरत्नाकरः निबंधःआकरादौराजादिदत्तनियमितलभ्यः
निवध्यतेवाचावद्गतुल्यः क्रियतेअपसरणरहितः क्रियते यसनिवंधः कर्म्मणिघञ्
अथवाभावेघञ्यथायावतु कालंभवताअत्राकरेदशद्रव्याणि प्राप्स्यंते इत्यादि एवम
ग्रहाविकब्राह्मणादेरपिअधिकारनिवन्ध एववेदितव्यः शुक्दाहकब्राह्मणादेरपिअ
धिकारोनिवद्धतुल्य एव परंतु तत्रास्यव्यापारद्वारेवलाभइतिविशेषः क्रमागतइत्यु
पलक्षणं अक्रमागतस्यापि युक्तितुल्यत्वात् धृतंवस्त्रंहूमूल्यमितिरत्नाकरः नानु
रूपंनविभाग योज्यंवृक्षादि अत्रचतेषांप्रागुक्तानामविप्रायोविभागाभावात् अवि
भाज्यत्वमुक्तं तथाहिनिवद्धस्यदशद्रव्यलाभस्यतत्प्रतिज्ञायावाद्विधाकरणासंभवात्।
अविभाज्यत्वमुक्तंतत्फलीमूतानांदशद्रव्याणान्तुविभागःकर्त्तव्यः गोप्रचारः गोपथः
रथ्यामनुष्यपथःस्त्रीणांपन्थाइतिविशेषः॥ अत्रांगयोजितंअल्पमूल्यंवस्त्रमिति
रत्नाकर॥ तथाचनपौनरुक्त्यमित्याशयः अयंभावः येनयद्वासः परीधीयतेतदंग
योजितंवासः तेनैवग्राह्यंनतुतत्रगुटिकापातः अत्तवहुमूल्यंवासः राजसभागमन
योग्यंतत्मध्यगमेवस्थापनीयं एकेनग्रहणे अन्येषांराजसभादिगमनवाधायतेः
वहुत्वेविभागेपिनक्षतिः अधृतस्यविक्रयादिकरणानन्तरंस्वतोमूल्यंदत्वापुनःक्र
यादिःसमवतीत्यालोच्यैवधृतमित्युक्तमितिअन्येतुधृतंकोषगृहेस्थापितंअविभा
ज्यंअत्रचस्वरूपत एवविभागनिषेधोवक्ष्यते अंगयोजितस्यतुविक्रयादिनाविभाग
निषेधइतिसूचयितुंपुमरूपादानंइत्याहुः प्रयोज्यं प्रयुक्तमृणंइतिहलायुधः। प्र
योगार्हंऋणवाणिज्यादौतथाहिशतंमुद्रायस्यवाणिज्यायत्तःशास्त्राभिर्नौवर्त्तनाद्र
वदेवाणिज्यंक्रियते नासांततुपुत्रैर्दशभिर्भ्रातृभिर्विभागेकृत्यवाणित्वं तादृशक
स्यापिनशंभवतीतिकेचिदाहुः प्रयोजनार्हं पुस्तकादि ततूमूर्खादयोनविभजेयुः
विक्रयाद्यर्थंकर्म्मवोधमात्रार्थंवाइत्याशेरतेपारिजातरत्नाकरजीमूतवाहनग्रं
थ्यदायतत्वादयः शिल्पार्थंतूलिकादिइतिरत्नाकरः। हलायुधादौस्तुशिल्पग्रा
हेनसामान्यतोजीवनोपायं वोधयित्वातदर्थंपुस्तकतूलिकादयः संग्राह्याइतिवि
भावनीयं वृहस्पतिः। वस्त्रादयोविभाज्याथैरुक्तंतैर्नधीमतां धनंभवेत्समृद्धानां
पत्रालंकारसंश्रितं मध्यास्थितमनाजीव्यंदातुंनैकस्यशक्यते युक्तयविभजनीयंत द
न्यथाऽनर्थकंभवेत् क्रीयवस्त्राभरणमृणाभुक्त्राह्यलेखितं कृतान्नंचाकृतान्नं
नपरिवर्त्यविभज्यते उद्धृत्यकूपवाप्यम्भस्त्वनुसारेणगृह्यते॥यथाभागानुसारेण ९९

सेतुः क्षेत्रं विभज्यते एकां स्त्रीकारयेतु कर्म्म यथांशेन गृहे गृहे । बह्व्यः समां प्राप्तो देशदासना
मप्ययं विधिः योगक्षेमं वतो लाभः समत्वेन विभज्यते प्रचारस्च यथांशेन कर्तव्य ऋत्विग्भिः सदा
। अत्र एतद्वृहस्पतिवचनस्वरसात् वस्त्रादिनामविभाज्यत्वं यथाश्रुतवेदमूलकं ननु अविभाज्य
त्व एव वेदे तात्पर्यं इति प्रतीयते मुनिवाक्यानामपि तत्रैवाप्रायो वक्तुं शक्यते एवं च वस्त्रा
दीनां दैवात् कृतो विभागो न दोषाय इति मन्तव्यं धनं भवेदिति समृद्धानां बहु वास्तु वाहनादि
युक्तानां वाहनालंकार वास्त्वादि संश्रितं धनमविभाज्यं भवेदिति अविभाज्यादि इति तस्य
लिंगवचनविपरिणामेणानुषंगः तथा च तद्गृहालंकारादिकं द्विधाकृत्य विक्रीय वा ॥
विभजनीयमित्यर्थः मध्यस्थितमिति अनाजीव्यमनुपयुक्तं भवेत् उभयोः स्वत्वास्पदी
भूतं एकं द्रव्यं अनुपयुक्तं भवेत् कस्यापि व्यवहारोपयुक्तं न भवेदित्यर्थः तदेकस्यापि दा
तुं न शक्यते अन्यस्यापि तत्र भागित्वादिति भावः अतो युक्त्या विभजनीयं ततु अन्यथा यु
क्त्य भागकल्पनं विना अनर्थकं कस्यापि व्यवहारानुपयुक्तं भवेदिति अर्थापत्ति प्रमाणं उप
न्यस्तं कात्यायन वचने धनं पत्रनिविष्टमित्यनेन ऋणस्याविभाज्यत्वमुक्तं वस्त्राभरणादे
श्चाविभाज्यत्वमुक्तं वस्त्रादिकं विक्रीय मूल्यं विभजेतु ऋणमधमर्णात् गृहीत्वा विभजेदि
त्यर्थः कृतान्नस्याविभाग उक्तः मनुविष्णुव्यासैः ततु यदि सर्वेषां नास्ति किन्तु एकस्यै
व तदा कृतान्न तुल्यो कृतान्नभागवदातव्यः यत्र च एकः कूपो वापी वा वर्तते तत्र तज्ज
लद्विभागेनैव भागः स्वीकर्तव्यः न तु वा — मध्ये सेतुर्दातव्य अनसारेणेति कूपस्याल्प
जलत्वे सर्वेषां सर्वव्यवहारासंभवे कूपात् दशादशपंच वा घटान् उद्धरेयुः अन्यतश्च अ
न्यज्जलमानीय अन्यव्यापारं निष्पादये युः एतच्च स्वरसतः एव कर्तव्यमिति भावः क्षेत्रस्य
च्छेदनासंभवात् व्यासेन क्षेत्रस्याविभाज्यत्वमुक्तं तत्र च्छेदनासंभवेऽपि सेतुनैव विभागः
संभवतीत्याह यथाभागानुसारेण इति एतदपि एकजातीयगुणैकक्षेत्र पक्षे तादृश बहु
क्षेत्र सत्वे तु सेतुदानापेक्षापि नास्ति क्षेत्रवत् वास्तोपरि गृहाणामपि विभागो द्रष्टव्यः
एकां स्त्री दासी विभजेदेव तत्र रीतिः यथांशेनेति व्यापारगणनया यथाद्वयं दीस्तीस
र्वेषां गृहमार्जनं भक्ष्यद्रव्य क्रयादीकं शुश्रूषां च कुर्यात अत्र न वैषम्यं कर्त्तुमर्हतीति विभागः
स्पष्टकालगणानया यथा दिवसे प्रहरं प्रहरं प्रति व्यापारः कर्तव्य इति यमः मासे वा
षट् षट् दिनानि पंच पंच दिनानि इत्यादि व — — तु एकामेकां द्वे द्वे वा एकैकस्मै दद्या
तु तत्र येन या भुक्ता सा तस्यैवेति गौतमोक्तं आदरणीयं एकेन बहूनां भोगे तु केन
चिद्वा भोगादौ संख्यासाम्यं कर्तव्यं न तु वयो बलगुणविवेचनया अल्पार्थे विवादः कर्त्तव्य
इति गौतमाभिप्रायः अयं विधिर्दासानामपि वेदितव्यः योगक्षेमवतो यथा मतं मंत्रि
पुरोहितादेः पैतृकोपजीवस्य नौका दुर्गादेर्भोजनाचमन पात्रादेर्वा समत्वेन समानसंख्य

श्लोकः २१

कत्वेनविभागः तथाचयस्ययतु व्यवहारोपयुक्तं नत्तेन ग्राह्यंसंख्याधिके ऽधिकवैषम्ये
वाऽन्यस्मैदातव्यं एवनतुगुटिकापातादिना विभागः अतोनमन्वादिविरोधः
अत्रच एकेश्वरः वस्त्रादीनां वहुमूल्यानांस्वरूपतो ऽविभाज्यत्वमुक्तं अतोमन्वा
दीनांअविभाज्यत्वमल्पमूल्यवस्त्रादौरूपतएवनिषेधकंवहुमूल्येषु उक्तैतद्वि
भागप्रकारव्यतिरिक्तप्रकारेण विभागनिषेधकं दृष्टव्यमित्य विरोधः इत्याह तथा
चअविभाज्यत्वबोधकश्रुतिमाकलय्यान्यैर्मुनिभिरविभाज्यत्वमुक्तं मेतेषांतत्रचसामा
न्यविभागनिषेधे ऽनुपपत्तिंमध्यस्थितमित्यादिना उक्त्वा स्वरूपतोद्विधाकरण
दिरूपविभागाभावता पर्य्यकत्वंताहृशश्रुतेः कल्पयन् फलगतविभागमेवव्य
वस्थायतीसाशयः प्रकाशकवस्तुतैर्नविचवितंवस्त्रं नविभज्जेदितिवेदस्यअल्प
मूल्यवस्त्रपरत्वंनावकलितंसमृद्धानां यद्धनंसमृद्धमात्रग्राह्यंवहुमूल्यंकमित्य
र्थः नतुयुक्त्याविभजनीयं यतोनैकस्यदातुं शक्यते अल्पमूल्यन्तुतुच्छत्वात्दातुं
शक्यते एव तथाचवाहनंनविभज्जेदित्यल्पहस्त्यश्वादिपरत्वंनेनिवृहस्पतेर्भावः
हस्त्यश्वादेरेकत्वेपिभागप्रकारश्चोक्तः विक्रयादिरूपएवइत्याह अन्येतुएतद्वृ
हस्पतिवचनंप्रदर्शनपरं युक्त्याविभजनीयंतदित्यस्यैव प्रपंचमा तथाचविभागेमू
ल्यंद्रव्यविनाशाशंकायायत्रास्तितत्रताहशाविभागाभावः श्रुतिविषयः यत्रचसुव
र्णरूप्यपिण्डादौसानास्तितत्रविभागः कर्त्तव्यएवइतिसर्वमुनिसम्मतं यत्रचवा
हनादौहुत्र वविभागः केनापिमुनिनानोक्तः वाहनंनविभजेदिति श्रुत्यनुसारे
णतद्विचारं विनैवस्थूलतएवोक्तमितिभावः अतोमन्वादीनामपिनन्यूनताअ
न्यथा युक्तिहीनवादेनतेषांन्यूनताप्रसज्येत तथाचसंख्यायावाहुल्येभागकरणे
पिनदोषः एकस्यापिविक्रयेणाकालनियमेनवाविभागः कर्त्तव्यः इतिनतुदास्या
दीनांविक्रयोनकर्त्तव्यः वनानुइतिवाच्यं नानुरूपंच यद्भवेदितिकात्यायनेनते
षामप्यविभाज्यत्वकथनात् अत्रचयस्मिन् यस्मिन् द्रव्येविभागोनसंभवतित
त्रयुक्त्याविभागः यत्रयत्रच एकेनमुक्तेदासीजलपात्रादौपृथगविभागः उ
क्तः तत्रतुल्यद्रव्येणभागसमाधानंप्रयोजनार्हेपुस्तकादौमध्यस्थितेपिसर्वे
षां प्रयोजनसाधनं तत्रचपंचानां भ्रातॄणां यः कश्चिन्मूर्खः सपुस्तकस्यांशंन
प्राप्नोतिनतुत्रः पण्डितश्चेतु सतत्रप्रयोजनंसाधयेत् यदिसोपिमूर्खः तदासो
पिनप्राप्नोतितथैवंक्रमेणयंचसप्तपुपुरुषेषु गतेषु अनन्तरं एकः पण्डितोजा
तः सतदंशंप्राप्नुयान्नवाअविभाज्यत्वेउक्तेपिसर्वेषांनतु पूर्वपुरुषाणां स्वत्वसत्वात्
।तस्यापिस्वत्वं जायतेनचभूयोदायविभागः स्यादाचतुर्थादिति स्थितिरिदेलवचनात् २११

चतुर्थानन्तरं स्वत्वं निवर्त्ततइति वाच्यं यत्राविभाज्यत्वं नोक्तं तत्परत्वेनैव तद्वचनस्य स
माधानात् अन्यथा सर्वेषां स्वसन्तानानां भ्रातॄणामपरिछिन्नत्वे चतुर्थपुरुषोत्तरं तद्द्रव्य
स्याविभाज्यत्वेन निधित्वापत्तेः अविभाज्यत्वेपि पर्य्यन्तमुपेक्षयैव स्वत्वनाशः नचानुपेक्ष
यां अन्यकुत्रचित् न्यस्तस्य धनस्य केनापि चतुर्थपुरुषपर्य्यन्तं अभुज्यमानस्य निधित्वा
पत्तिः स्यात् तस्मात्तेषां पुरुषपरंपरया स्वत्वं तिष्ठत्येव प्रयोजनाभावात् वशीकरणं नभ
वति किंतु ससाक्षिकलेख्यपूर्वं स्थापयेत् इदानीन्तु शाठ्यभयात् पुस्तकादिकम
पि विभज्यते किन्तु तन्न पारिजातरत्नाकरदायतत्वादि शास्त्रसम्मतं पुस्तकादिमू
ल्यन्तु विभजनीयमेवइत्याहुः अत्रापि युक्त्याविभागः सर्वेषां गृहेगृहे लिखन
पूर्वकं स्थापनं कर्त्तव्यं नत्वेकस्यैव गृहे सर्वपुस्तकानां स्थापनं वस्तुतः तक्षप्रभृतीनां
वासीटंकादेरविभागे व्यापारकरणवाधः स्यात् तक्षविद्यारहिताय अद्यत्वाभागक
रणे तु तत्पुत्रस्याप्राप्तिः स्यात्तस्मात् सविदैरेव तदस्त्राणि विभज्य व्यापारः प्र
वर्त्तनीयः अनन्तरं निर्गुणस्य सगुणे पुत्रे जाते पुनर्विभजेत् व्यापारेण चेत् वस्य
चित् अस्त्रस्य विनाशो जातः तदा तमपास्यैव निर्गुणपुत्रेण विभागः कर्त्तव्यः य
दितु ते गुणवंतस्तक्षाणो विक्रीतवन्तः किंचिदस्त्रं तदापरतो ज्ञाते विक्रये मूल्यां
शं दद्युः नात्र तेषां दंडइति हलायुधमते तु पुस्तकादेरपि विभागोवर्त्तते अविभा
ज्यम ऽगणनात् प्रयोज्यपदेन ऋणस्यैव ग्रहणात् तन्मतन्तु सम्यक् प्रतिभा
ति वृहस्पतिना हि पुस्तकादेर्यौक्तिकविभागो नत्वलिखितः किंतु चण्डेश्वरस्त्रस्य
कालनियमेन व्यवहारो न कर्त्तव्यः ऋणं ऋणिकात् गृहीत्वैव विभजनीयमि
ति नियमः अत एव ऋणस्य तदानीमुद्ग्रहणासंभवस्थले ऽकमियमविभागः
क्रियतेइति व्यवहारः अल्पमूल्यकभक्तवस्त्राणां कृतान्नवत विभागः बहुमूल्य
वस्त्राणां विक्रयादिना विभागः मनुवचने कृतान्नमुदकं स्त्रियइत्यत्र स्त्रियोदासी
व्यतिरिक्ताइति जीमूतवाहनमते विवाहविशेषलब्धभार्य्याणां साधारणोपक्ले
षेणार्जितत्वात् विभाज्यत्वप्रसक्तौ निषेधति मनुर्विष्णुर्व्यासश्चेत्यभिप्रायः ॥
अत्रेदमवधेयं तासां युक्त्यापि विभागो नास्ति भार्य्या याः यथाकथंचिल्लब्धाया अपि ए
ता नैव वा पुरुषो यज्वायात्माप्नोतिहिति मनुना पत्युरसाधारणत्वकथनात् नचकृ
तान्नवत् अन्यस्त्रियातस्य भागः पूरनीयइति वाच्यं तत्र साधारणे पष्टम्भसत्वेपि
साधारणासत्वान् पगमेन भागपूरणस्याप्रसक्तत्वादेतन्मूलकमेवाविभाज्यत्वमुक्तम
त्रइति वस्तुतः त त्रस्त्रीपदेन दासीनामेवाविभाज्यत्वं स्थूलतउक्तं वृहस्पतिना च तासा
मेव युक्त्याविभाग उक्तः भार्य्याणान्तु असाधारणत्वात् विभागप्रसक्तिरेव नास्तीति तथा

चपित्रादौमृतेतत्सत्वास्पदीभूते स्वर्णरूप्यपिण्डदासीगवादौ सर्वत्रैवसर्वेषामधिकारिणां स्व
त्वं स्मार्त्तसम्मतं जायतेकारणाविशेषात् तथाचसर्वेषामेवविभागेद्विधाकरण प्रसक्तौमु
निभिः केषांचितविभागनिषेधउक्तः तत्रवबृहस्पतिना एकद्रव्यमखण्डं एकस्य अपरद्रव्यं
अखण्डं अपरइत्यादिरीत्या द्रव्यचाहुल्ये एकद्रव्यस्यतुकालानियमविक्रयादिना विभागउ
क्तः द्विधाकरणोत्तरं चस्वुवर्णपिण्डादौ पूर्वसत्वविनाशो गुटिकापातादिसहकारिण एकै
कभ्रातुरेवैकैकत्रस्वत्वंजायते पित्रादिसत्वास्पदीभूतद्रव्यावयवत्वादिदानींभग्नघटादि
वत् नचनायंशास्त्रार्थः यत्रसमसंख्याप्रवर्तते तत्रविधानकर्त्तव्यमितितुशास्त्रार्थः व्य
वहारोपितथैवप्रमाणमितिवाच्यंतथासतिएकांस्त्रीकारयेत् कर्मयथांशेनगृहेगृहेवस्था:
समासतोदेयादासानामयंविधिरितिवृहस्पतिनायुक्त्या विभागप्रकरणेवहूनां दासीनां
समांशकथनानौचित्यात् व्यवहारस्तुसुवर्णरजतमुद्रावस्त्रगोमहिष्यादौभंगव्यतिरेके
णापिविभागदर्शनेस्वर्णरूप्यपिण्डादावपितथैवप्रचरति नचद्विधाकरणमेवविभाग
इतियदिशास्त्रार्थः तदापश्वादीनामपिद्विधाकरणमस्तु केनचिच्चतेषामविभाज्यत्वाकथ
रादिनव्यसंप्रदायपर्यंतं अनेकनिबंधकारैरुक्तत्वस्यैवपरीत्यकथनमयोग्यमितितनुप्रका
शोलिखितइतिविवेचनीयमितिवर्णयन्तिइत्यविभाज्यं ॥
इतिविवादभंगार्णवे पंचमेदायभागद्वीपेसुकान्तचन्द्रकान्तरत्नंपंचमं ॥ ० ॥
एतत्पर्युदासातुविभाज्यंतदाह कात्यायनः पैतामहंचपित्र्यंचयत्किंचित्स्वयमर्जितं
। दायादानांविभागेतुसर्वमेतद्विभज्यते पैतामहंपितामहादागतंपितृद्वारास्थलविशे
षेतमुल्लङ्घ्यवाएतत्पूर्वपुरुषागतस्योपलक्षणंपित्र्यंपितुःस्वोपार्जितं स्वयंशब्दोवहु
वचनान्तः तथाचभ्रातृः कृष्यादिनायदर्जितं तथाचमनुः अविद्यानांतुसर्वेषामी
हातश्चेद्धनंभवेत् समस्तत्रविभागःस्यादपित्र्यइतिधारणा समःविभागइतिन
ज्येष्ठांशप्रदानमित्यर्थः अत्राविद्यानामित्युपादानात् तन्मध्येकस्यचिद्विद्यावलेगुणप्र
युक्ताधिकदानं केचिद्वदन्ति तन्नयुज्यते यतो यदिजन्मज्येष्ठस्याधिकदानमननुम
तंकथंतर्हिविद्याज्येष्ठस्याधिकदानं तस्माच्चण्डेश्वरादिमतानुसारेणइदंसमा
धेयंयदिपंचभ्रातृणांमध्येकश्चित्तुकृष्यादिनाकश्चिद्वाणिज्यादिनाकेचिच्चविद्यासौ
र्यादिनासाधारणधनोपष्टम्भेनधनमर्जयंति तत्रकृष्याद्यर्जितधनांशभागि
नोविद्यावन्तः परिभाषितविद्याधनांशभागिनः नकृषकादयः इतिअविद्याना
मित्युक्तं अतएवअविद्याःसमंभजेरन् इतिगोतमवचने ऽविद्याः तद्धनासाधा
रणप्रयोजकविद्याशून्याइत्युक्तंश्चण्डेश्वरेण किन्तुतद्गोतमवचनंज्येष्ठांशनिषेध
परंसंभवतीतिध्येयं इदानींविद्याशून्यानान्तुकृष्यादिनासहभावेन पृथग्वासर्वेषा ६१

मर्ज्जने सर्वेषामेवार्जकत्वेन भागद्वयप्रशक्तौ समभाग एव युज्यते तत्रचार्जनन्यूनाधिकं
नकर्त्तव्यमित्याह च णडेश्वरः यदासर्व एवभ्रातरोऽविद्यांसः कृष्यादिना धनमर्ज्जयंति त
दातस्मिन्नपि पित्र्य धनेसम एवविभागो नतु बहुतरमनेनोपात्तमित्युधारादिकर्त्तव्यमि
त्यर्थः इत्यनेनसाधारणधनानुपघातेपि अविभक्तानांतथैवज्ञेयमितिजीमूतवाहना
दिमतानुसारेणतुसाधारणधनानुपघातेन परिभावितविद्यार्ज्जितधनेअन्यूनविद्या
नामेवाधिकारः नतुन्यूनविद्यानामविद्यानाम्चाइत्यभिप्रत्याविधानामित्युक्तमिति
ध्येयं यत्किंचित्स्वयमर्ज्जितमितिअसाधारण्यप्रयोजनकरूपव्यतिरेकेणेतिशेषइ
तिरत्नाकरः तथाचस्वयमर्ज्जितग्राह्यःभ्रातृणांमध्येयेनकेनाप्यर्ज्जितमितिफलि
तार्थः ॥ कात्यायनः ॥ ऋणं प्रीतिप्रदत्तंतु दत्वादेयं विभाजयेत् ॥ आचतुर्थात्तु तद्ग्राह्यं
क्रमेणेवन्नतत्सुतैः ॥ पित्रायाद्दत्तंऋणंकस्मैचितुदातुंप्रतिश्रुतंनतु प्रीतिदत्तं त
द्दत्वावशिष्टं विभजनीयमत्रविभागग्राहिणः भ्रातरोऽन्येवाकेचिदित्याकांक्षायामाह
याचतुर्थादितित्रयाणां उदकं कार्यं पिषु पिण्डप्रवर्तते चतुर्थः संप्रदातेषां पंचमोनो
पपद्यते इत्याद्यभागप्रकरणे उक्तमनुवचनात्तुत्रयाणां पितृपितामहप्रपितामहा
नांउदकतर्पणंकार्यमित्यर्थकात् योयस्यउपकरोतिसतस्यधनंगृह्णीयात् इतिला
भेनधन्यपेक्षयाचतुर्थस्यप्रपौत्रस्यापिभागाधिकारित्वलाभइतिरत्नाकराशयः एवं
चततुविभज्यमानंधनमित्यर्थः हलायुधस्तुततुप्रतिश्रुतं आचतुर्थात् यस्मै
प्रतिश्रुतं तत्पपौत्रपर्यन्तंयेनकेनचिद्ग्राह्यंतन्मरणेतत्पुत्रेणग्राह्यंतन्मरणेतत्पु
त्रमरणेचततुपौत्रेणतेषांमरणेततुप्रपौत्रेणेतिभावः अत्रापिवीजंत्रयाणामित्या
दिमनुवचनंइत्याग्र ते अत्रेदमवधातव्यंप्रतिश्रवसंप्रदानस्यसन्तानाय यस्मैदत्तं
तेनैवग्राह्यंनतुतद्विभजनीयं तद्भ्रात्रादिनातद्धनेप्रतिश्रवसंप्रदानस्यस्वसत्वाभा
वात् दानसंप्रदानस्यैवस्वत्वजननात् यदितुपूर्वमेवदत्तं असमर्पितं तदातुजीमूत
वाहनादिमतेसंप्रदानस्यस्वत्वंजातमेवइतिविभजनीयं येतुप्रतिग्रहात् स्वत्वंव
दंतितन्मतेपिपितरमुद्दिश्यदत्तस्य तदानींनिधिभापन्नस्याविशेषात् सर्वपुत्राणा
मेव स्वीकारेकर्त्तव्ये एकस्यस्वीकारो ऽनुचितइति ॥ प्रकृतमनुसरामः ॥ पित्रादातुं
प्रतिश्रुतंपित्रादत्तमसमर्पितं पितृकृतऋणंचपरिशोध्यविभागः कर्त्तव्यतदाह नार
दः ॥ यच्छिष्टंपितृदायेभ्योदत्त्वर्णंपैतृकंचयत् भ्रातृभिस्तद्विभक्तव्यमृणीनस्याद्य
थापिता ॥ पितृदायेभ्यः पित्रादातुंप्रतिश्रुतेभ्यः इतिनिबंधारः पित्रादत्तमसमर्पि
तंपितुःसमेवनइतिनतत्रविभागप्रशक्तिः प्रकाशकारस्तुपितृदानेभ्यइतिपठति तत्रा
पिसएवार्थइतिचण्डेश्वरः ऋणंपैतृकमित्युपलक्षणं पितृव्यादिकृतकुटुम्बार्थऋ
णमपिशोधयेत् ॥ यथाकात्यायनः ॥ भ्रात्रापितृव्यमातृभ्यांकुटुम्बार्थमृणंकृतं विभाग

कालेदेयन्तद्दृक्थिभिः सर्वमेवतु तदृणंधनिनेयंनान्यथैवप्रदापयेत् भावितंचप्रमाणेनवि
शोधात्परतोयदाविरोधात्परत ऋणंकृतंनदेयंमयेति विवदमानेपितरितन्मरणानन्तरं
पुत्रेणातदैवऋणंशोधनीयंयदितुप्रमाणेनभावितंस्यादन्यथातुनशोधनीयमितिरत्ना
करावकलितोऽर्थः निर्विवादेतुप्रमाणोपन्यासंविनैवशोधनीयमितिभावः पितृव्ये
नाविभक्तेनभ्रात्रावायदृणंकृतं मात्रावापिकुटुम्बार्थंदद्युस्तत्सर्वं मृक्थिनः अवि
भक्तेनेतिअनुमतिंविनापिविभक्तेनतुअनुमत्याकृतंशोधनीयमितिज्ञेयं एतद्भ्रातुष्पुत्रा
देरुपलक्षणं तथापित्र्यंपितृणासम्बद्धमात्मीयंचात्मनाकृतम् ऋणमेवंविधंशोध्यं
विभागेबन्धुभिःसह पित्र्यंऋणंकुटुम्बार्थमकृतमपिऋणादानद्वीपोक्तप्रकारकंशो
धनीयंपितृणसम्बद्धंपितॄणाशोधनार्थंआत्मनाकृतमपिऋणंविभागकालेभ्रातृभिः
सर्वैःशोधनीयं आत्मनाकृतंकुटुम्बार्थंसर्वैर्भ्रातृभिःशोधनीयंविभागकालेइतिचण्डे
श्वराविरुद्धोइतर्थः तथाधर्म्मार्थंप्रीतिदत्तंचयदृणंस्वनियोजितं तद्दृश्यमानंवि
भजेन्नदानंपैतृकाद्धनात् धर्मार्थंकेवलनिजधर्म्मार्थंयत्द्रव्यंदत्तंविभागकालेतद्वि
भजेत् तद्वैरेणतस्यभागपूरणंकर्त्तव्यंएवंप्रीतिदत्तेपि यत्रऋणंस्वनियोजितंतदाथा
अविभक्ततादशायांभ्रातरमेकंकोप्युदासीन ऋणमयाचतुअपमाहददामीति
अन्येचभ्रातरोनिषेधयन्निसभ्राताआह एतदृणंममैवइत्यादिस्थलेस्वमात्रप्रयु
क्तमृणंविभजेत् तद्धनेनतस्यभागपूरणंकर्त्तव्यमित्यर्थः अत्रहेतुः नदानंपैतृका
धनादितिपैतृकात् साधारणाधनात् असाधारणं दानंस्वत्वनाशककर्म्मकरणंन
भवतिइतिकल्पतरु अत्रदृश्यमानंनिश्चीयमानंइदंचस्वरूपसद्विशेषणंअनि
श्चितस्यभ्रातृभिर्विवादासंभवात् तथाचअह्नवकरणेदोषोवत्येवअथवासाधारणध
र्म्मार्थंव्ययंकुर्वाणेनसाधारणधर्म्मार्थंसाधारणधनव्ययेकृतेद्वैवात् विस्मृतेचअ
न्येपरद्रव्येवदत्ताज्ञानकृतोदोषोनभवतीतिज्ञायदृश्यमानमितिऋणमित्युपलक्षणं
विक्रयेपिक्रयेपिआध्यादावपीदृशीरीतिः धर्म्मार्थमित्युपलक्षणंद्यूतवेश्याद्यर्थं
मपिदत्तेतथैवइत्यवधेयंप्रकाशकारपारिजातौतुधर्म्मार्थंप्रीतिदत्तंस्वनियोजितं
चयदृणंतद्दृश्यमानंविभजेदित्यन्वयः अविभक्ततादशायांऋणंकृत्वाअसाधार
णधर्म्मःकृतकस्मैचिद्वाप्रीत्यादत्तंस्वस्यसूक्ष्मवस्त्रपरिधानादिरूपउपभोगोवाकृ
तस्तद्दृणंविभजेत् अन्यभ्रातृसम्बन्धशून्यंकुर्य्यात् यथावृक्षात्पत्रंविभजेदितिअन्यै
र्भ्रातृभिर्नशोधनीयमित्यर्थः पैतृकाद्धनादानंतत्परिशोधनं नकर्त्तव्यमित्यर्थइत्या
हतुः अत्रचण्डेश्वरः एतन्मतानिलिखित्वावस्तुतस्तुसर्वमेतद्विवक्षितंसर्वार्थप
रतयैववाक्यमिदंव्याख्यातुमुचितमितिलिखितवान् अत्रह्यर्थकाव्यवतुअर्थद्वयेएवमु ११३

नैस्मात् पर्थ्यं कल्पनीयं अथवा एको ऽर्थः शब्द अपरो यौक्तिकस्तुल्यत्वादिति भावः उपभो
गार्थमिति यद्येकः साधारणधनव्ययेनोपभोगं करोति अन्यं च भ्रातरं कर्तुं नानुमन्यते
तदास्यापि ऋणं न शोधनीयं अस्यापि व्ययो भागपूरकः यदि तु सर्व एव साधारणधनव्यये
न धर्म्ममुपभोगं वा कुर्वन्ति तत्रोपभोगाः सर्वे एव सर्वेषामर्ज्जनवत् तत्र न्यूनाधिकविवेच
नं न कर्त्तव्यमिति प्रतीयते यदि तु कश्चित्तु शठः स्वयमुपभोगाद्यर्थं यथेष्टं व्ययते भ्रातरं च
उत्तरकालं भूयः अर्थं किंचिद्व्ययं कारयति तत्र शाठ्योन्निश्चिते तदा तद्व्ययेनैव शठभागपूर
णं युक्तं अन्यभ्रात्रुपभोगस्यापि फलतः शठोद्देश्यसाधकत्वात् अत्र यद्येको भ्राता इतस्त
तो गत्वा उपार्ज्जनं कृत्वा साधारणकुटुम्बभरणं करोति तदा तत् कृतसूक्ष्मवस्त्रपरीधाना
द्युपभोगार्थं कृतः साधारणव्ययः सर्वेषामेव तदर्थं कृतमृणमपि सर्वैः शोधनीयमिति
मन्तव्यं कल्पतरुमते बन्धूनामविभक्तानां भोगं नैव प्रदापयेदिति कात्यायनविरोधः कर्म
प्रीत्यादेरपि भागत्वाविशेषादिति चेत् नित्यभोगवत् पुत्रसंस्कारादिरूपनित्यधर्म्मादि
परमेवेदं हि वचनं अत्र ननु यदि साधारणधनं निजधर्म्मार्थं व्ययते तदा तद्धर्म्मः तस्यैव भ
वति एवं चेत् दृष्टवन्तो भविष्यन्ति त्वयीष्टवति पार्थिव इति महाभारते युधिष्ठिरं प्रति
व्यासवाक्यं विरुध्यते तत्र भीमादीनामपि तद्धर्म्मभागित्वकथनात् इति चेत् सर्वेषां ध
र्म्ममुद्दिश्य कृतं कर्म्म सर्वेषां धर्म्मं करोति एकस्य धर्म्ममुद्दिश्य कृतं कर्म्म तस्यैवेति न
विरोधः अत एव तुल्ययुक्त्या क्रयोऽपि तथेति चेदिष्टापत्तिरिति पूर्वमुक्तं अथ यदि कोऽपि
साधारणव्ययं कृत्वा किंचित् स्वार्थमर्जयति तदा तद्धनं तस्यैवास्तु न चेष्टापत्तिः यत्र
च साधारणार्थव्ययं कृत्वा सर्वानुद्दिश्यार्थमर्ज्जयति तत्परमेव हि रज्जयितुरित्यादि
वचनमिति वाच्यं तथा सति शठस्य निराकरणापत्तेः तथा हि शठः साधारणधनव्यये
नार्ज्जनं कृत्वा उत्तरकालं यदि लाभं बुध्यति तदा मया असाधारणमर्ज्जितमिति क्रयात् ।
यदि च अलाभं बुध्यति तदा सर्वार्थमेव कृतमिति ब्रूयात् यत्तु धर्म्मार्थदत्तादेरेव वचने
उपन्यासात् तत्रैवेयं रीतिः अन्यत्र तु साधारणधनार्ज्जितं साधारणमेवेति तच्चिन्त्यं
युक्तिसाम्ये व्यवस्थावैलक्षण्यस्यान्याय्यत्वात् युक्तिहीनविचारेण धर्म्महानिः प्रजाय
ते इति बृहस्पतिवचनात् अत्र केचित्तु साधारणधनव्ययेन कृतं धर्म्मधनाद्यर्जनं साधार
णमेव इति सामान्यतः पृथग्विवर्द्धते धर्म्मस्तस्माद्धर्म्या पृथक् क्रिया इति मनुवचन
स्वरसात् दृष्टवन्तो भविष्यन्ति त्वयीष्टवति पार्थिवेति महाभारतस्वरसात् येन चैषां स्व
यमुत्पादितं स्यादित्याह वसिष्ठ इत्यादि वसिष्ठवचनादिस्वरसाच्च यत्र साधारणकर्म्मकर
णार्थं साधारणधनव्ययं कुर्वाणमन्यो निषेधति अयं च अत्र ममैव व्ययलाभौ इत्युक्त्वान्ययं
करोति तत्र तदर्ज्जितं धर्मधनादिकमस्यैव भवति अन्यत्र साधारणं न च तथापि युक्तिविरो

धः तथाहियदिअयमपह्नुवानोऽनिषिद्धोवास्वार्थंधर्म्माद्युर्जयतितदान्येषां कथमंशि
लंक्रियाणन्यफलस्यअनुद्दिश्य कर्त्तरिचानुत्पत्तेरितिवाच्यंअनुद्दिश्यतेऽकर्तृत्वेपिध
नवत एव फलवत्वात् नहिपरद्रव्येणअननुमतेनवापिज्यंकृत्वाकोपि फलभागीभ
वतितथासतिनिःक्षेपद्रव्यस्यनिःक्षेपधारिणाकुसीदकरणेनिःक्षेपधारिणए
ववृद्धिभागित्वापत्तेः अस्यचाविभक्तभ्रातृत्वेनधनस्यचसाधारणत्वेनचौरत्वाभावा
द्दण्डाभावः कर्म्मवेतनंचपरंअंशाद्ययादिरूपंइतिसमादधते साधारणधनोपश्ले
षेणार्जितेऽसाधारणत्वव्यवहारस्यप्रायोनदृश्यते अन्यैर्निषिधेतुतद्धनंअसाधार
णमिवभवतीतिमन्तव्यं यत्तुधर्म्मस्थलेफलमुद्दिश्यधनिनापुत्रेणक्रियमाणंकर्म्मापि
तर्थेवफलंजनयतिव्यवहारेतुन तथामानाभावात् अतोनिषिद्धमानोपिस्वार्थंयंध
र्म्यंकरोतिसस्यैवअर्ज्जनन्तुस्वार्थंकृतंधनवतांसर्वेषांभवतीति तदपिचिन्तनीयं
ऋणस्यापितद्वचनेनोपादानादिति अत्रापरेस्वनियोजितमित्यस्यपूर्वत्रितयेसम्बन्धात्
स्वोपभोगार्थव्ययेपैतृकाद्धनादेरसकलनीयं अतएवबन्धुनामविभक्तानां भोगंनैवप्र
दापयेदित्यस्याविरोधः धर्म्मार्थदत्तप्रतिदत्तयोः स्वार्थत्वलाभश्च एवंप्रकाशकारादि
मतेपियद्येकभ्रात्रापैतृकंधनंभुज्यते अपरेणच दैववशादन्यत्रसंस्थितेनभोजनार्थमृ
णंक्रियते तत्रापि तदृणंसाधारणधनंभुंजानेनापिशोधयितुंयुज्यतेइतिस्वनियो
जितमित्यस्यधर्म्मार्थप्रतीदत्तयोरन्वयएवयुक्तः नन्वेवंस्वोपभोगार्थंकृतमृणंअ
न्यभ्रातृसाधारणेनशोधयतुइतिचेत्साधारणधनेनकुटुम्बार्थाद्यतिरिक्तस्वकृ
तऋणशोधनस्यशास्त्रासिद्धत्वात् नचैवमेतस्यापिभोजनाद्यर्थंकृतस्यऋणस्याशो
धनंआयातमितिवाच्यंअस्ययुक्तिसिद्धत्वात् नचैवंप्रकाशकारादिमतेवचनवैयर्थ्यमि
तिचेन्नएतद्वचनेनपूर्ववचनार्थस्यदृढिकरणात् तेतुवचनस्यावश्यकत्वमेवसाधारण
त्वरूपाधिकार्थस्यप्रतिपादकत्वादित्याहुः अथनिह्नुतविभागः कात्यायनः दृश्यमानं
विभज्येतगृहंक्षेत्रंचतुष्पथं ॥गूढद्रव्याभिशंकायांप्रत्ययस्तत्रकीर्त्तितः प्रत्ययोदिव्यं ए
वदेवस्पष्टयति गृहोपस्करवाह्यास्तुदोह्याभरणकर्म्मिणः दृश्यमानाविभज्यन्तेदोषंगू
ढे ब्रवीन्मनुः गृहोपस्करः उदखलादि कर्म्मिणोदासादयः सुप्रसिद्धमन्यदितिचण्डे
श्वरादयः॥अत्रयदिगूढद्रव्यमस्तीतिउपन्यासस्यकिंचित्कारणंसंभाव्यतेतदैवदिव्य
करणं यथाआयस्यवाहुल्यमस्तिव्ययस्यचअल्पत्वं यस्तुपुरुषः द्रव्यसंग्रहव्यय
योरध्यक्षः सआयव्ययौवोधयितुंचनशक्नोतिएवंयत्र यत्तुद्रव्यंपूर्वदृष्टंविभागकालेभ्रा
तरोआचक्षते अध्यक्षोभ्रातातन्नतुद्रव्यंव्ययितमितिवदतिव्ययश्चनदृश्यतेतत्रएवंयत्र
मुद्राःसन्तिइतिअध्यक्षआहपुनश्चकारणवशात् एकादशमुद्राउपस्थिताः तत्रएव 

श्लोकाः २५

मादिस्थलेदिव्यकरणंइतिबोध्यं अन्यथासर्वत्रैवशंकासंभवात् दिव्यंविनाविभागस्य
प्रायोऽनुपपत्तेरितितुस्मार्त्तानामनुमतं कोषः उग्रदेवतास्नानोदकस्पर्शादिः तत्
प्रकारोदिव्यप्रकारस्तोऽअनुसंधेयः ततस्वदिव्यादिनाअधिकद्रव्यस्यलाभेतन्मात्रस्यवि
भागः कर्त्तव्यः नतुअपहर्तुर्निरंशत्वं तत्रदण्डोवातुद्रव्यस्यतस्यचौरत्वाभावात् ए
तच्चविभागकालेऽभिसंहितेपश्चादभिसंहितेश्चाहभिसंहितेपाह ।मनुः ऋणेधने
चसर्वस्मिन् प्रतिभक्तेयथाविधि पश्चाद्दृश्येत यत्किंचित्तत्सर्वंसमतांनयेत् यदि
पश्चाद्दृश्येत यदिपश्चात् लौकिकप्रमाणेनज्ञातंभवतिनिश्चितंसन्दिग्धंवानतुवि
भक्तस्यभ्रातु सम्बन्धेलौकिकप्रमाणेनअपह्नवेऽज्ञायमानेपिमानसकल्पितसं
न्देहात्दिव्यमुपन्यसेत् यदितदेवात्दिव्योपन्यासः सचदिव्येनअपह्नुवान् इतिनि
श्चितोभवतितदापिसमभागंकूर्यादेवनतुतर्हि पश्चात् दृश्येतइत्यस्यविरोधइति
चेन्नदृशधातोर्ज्ञानार्थत्वात् ननुतर्हिमनसाकल्पितसन्देहोत्तरंदिव्योपन्यासोभ
वतीतिचेन्न वादिप्रतिवादिनोरूपन्यासद्वारामध्यस्थानांराज्ञांवासंदेहस्थलएव
दिव्योपन्यासस्ययुक्तत्वात् अत्रवादिनः हेतूपन्यासासामर्थ्यान्नमध्यस्थादेः सं
देहः अतोनदिव्यमितितत्त्वं यथाविधीतिअविहितविभागेतुअपह्नवानुपन्या
सेपिपुनर्भागकरणंयथाविधिभागेतुअपह्नुतंविनानविभागइतिभावः याज्ञ
वल्क्यः ।। अन्योन्यापहृतंद्रव्यंविभक्तेयत्रदृश्यते ततुनस्तत्समैरंशैर्विभजेरन्निति
स्थितिः अत्रउत्सर्गतत्रववविभागेप्राप्तेवचनारंभवत्वेनसाधारणद्रव्यापहारेस्ते
यदोषोनभवतीतिविज्ञाप्यतेइतिहलायुधविश्वरूपचण्डेश्वरजीमूतवाहनस्मा
र्त्तप्रभृतयः समैरंशैरितिनज्येष्ठत्वनिरासपरं किंतुअस्यापहर्तृत्वान्न्यूनत्वशंकानि
रासकमिति ।। अन्यथाकनिष्ठस्यापहर्तृत्वेऽनपराधिनोज्येष्ठस्याधिकप्राप्त्यभावे
युक्तिविरोधः स्यात् इतिब्राह्मणीक्षत्रियापुत्रयोश्चसमांशतास्यात् जीमूतवाहनोप्ये
वमेव अत्रचसमपदमनिह्नवेयाद्दृशोऽंशोऽभविष्यत्तत्परं कात्यायनः प्रच्छा
दितंतुयद्येनपुनरागत्यतत्समं भजेरन्भ्रातृभिः सार्द्धमभावेतुपितुः सुताः अ
न्यान्यापहृतं यच्चदुर्विभक्तंचयद्भवेत् पश्चात्प्राप्तंविभज्येतसमभागेनतद्गुरुः विभ
क्तेनैवयत्प्राप्तंधनंतस्यैवतद्भवेत् हृतंनष्टंचयल्लब्धंप्रागुक्तंचपुनर्भजेत् वंधुना
हृतंद्रव्यंवलान्नैवप्रदापयेत् वंधूनामविभक्तानांभोगंनैवप्रदापयेत् आसन्यकुप्र
कारेणगत्वाप्राप्यगत्यर्थप्राप्त्यर्थयोः प्रयोऽभेदात्प्राप्तेर्गत्यन्तर्भूतत्वाच्च अन्योन्या
पहृतंइतियदिसर्वएवभ्रातरः किंचित्किंचिदपहृतवंतः विभागोत्तरं तत्सर्वमेव
ज्ञातंतत्रार्जनस्थलवत् न्यूनाधिकत्वविवेचनामपहाययेनयदपहृतं तस्यैवतद्भव
तीतिशंकानिरासायइदमुक्तं दुर्विभक्तंचयथाएकस्मैभ्रमात् अन्यंभ्रातरंप्रतार्य्य

श्लोकः २८

वाअधिकंदत्तंतत्रोत्तरकालंआधिक्येनिश्चितेपुनर्गुटिकापातः नतुआधिक्योपन्यास
मात्रेण एवंचसकृदंसोनिपततीति मनुवचनं यथाविधिविभक्तपरंवेदितव्यं येनांशो
यो दृष्टोभुक्तस्तस्य तन्नविचालयेत् स्वेच्छाकृतविभागोयः पुनरेवविसंवदेत् सराज्ञां
घोसकेस्थाप्यः शासनीयानुबंधकृदिति यदितु विभागकालेएववादिनाउक्तंमयैषांशो
नग्राह्यः इतिएकवादिपक्षपातिनावलवतामध्यस्थेन यदिसएवांशोग्राहितः तदा
तुराजसमीपेसर्वंसप्रमाणंअंशादोषंचसमानयेयपुनर्विभजेदितिसूचितं एतदपि
कात्यायनोक्तंदुर्विभक्तमितियदित्तुतदानींदुर्विभक्तंसम्यक् विभक्तम्त्वाअनुमन्यतद्इदा
नींचविषमविभागोजातइति वदति सराज्ञाम्बके ऽंशोस्थापनीयः यदिचराजवाक्योल्लंघ
नरूपंअनुवंधंकरोति विभागकाले ऽज्ञातंवैषम्यंच दर्शयितुं नशक्नोतिसशासनीयः
दण्डनीयो राज्ञाइत्यन्वयः अत्रवैषम्यंज्ञात्वान्यूनाधिकत्वविवेचनंकर्त्तव्यंमित्यनुभवः
स्मार्त्ताअपिस्वेच्छाकृतइतिपदादेवैतदर्थलाभइत्याहुः अत्रचइच्छास्वारसिकीमन्त
व्यानतुभयप्रदर्शनादिरूपमध्यस्थव्यापारजन्यामत्तोन्मत्तार्त्तव्यसनिवालभीतादियोजि
तः असम्बन्धकृतश्चैवव्यवहारोनसिद्ध्यतीतिवचनेनभयादिसमुत्थेच्छयाकृतव्यव
हारस्यासिद्धिकथनात् नचभयादिस्थलेइच्छैवनजायतेइतिवाच्यंइच्छांविनाप्रवृ
त्त्यनुपपत्तेः इतिपश्चात्प्राप्तमित्यनेनैतन्मात्रस्यैवविभागोनपूर्वविभक्तमपिविभ
जनीयमित्यवगम्यतेसमभागेनेतिअपहृततयाभागोनदेयोऽन्योवादेयइतिनि
रासार्थमितिस्मार्त्ताः अत्रकेचिदाक्षिपंतिअन्योन्यापहृतस्यद्रव्यस्यप्राप्ते भावे
विभागंएवनस्यादत्तः कात्यायनोक्तंपश्चात्प्राप्तमितिनतुतत्पदादेवतावन्मात्र
स्यविभागलाभः नचतथापिपश्चादितिकथनात्तल्लाभइतिवाच्यंअन्योन्याप
हृतंविभागकालएवप्राप्तंचेत् विभजेत्तुपश्चात्प्राप्तन्तुनविभजेदितिशंकानिरासयै
वपश्चादित्यस्यकथनादितिचेन्न पश्चात् प्राप्तस्यैवविभागस्यवाचनिकत्वेनपूर्ववि
भक्तेपुनर्विभागस्याप्रसक्तेः मन्वादिनानिषेधाच्चफलवैषम्येशास्त्रविवेचनायाअकिंचि
त्विभक्तेनैवइतिविभागानंतरं असाधारणपित्र्यधनोपश्लेषेणयदर्जितं तत्तस्यैवइति
(विभागानंतरं) इतिस्वरूपकथनंअथवाविभक्तेनभ्रात्राविभागावशिष्टेनसाधारणध
नेयदिकिञ्चिदर्जितंतदपितेनैवग्राह्यंनतुतत्रार्जकस्यद्व्यंशोऽखिलमितरे षांएकैको
ऽंशइतिपरंतुउपश्लेषीभूतधनस्यभाटकरूपंकिंचिद्दातव्यंतच्च धनजनयोरायासा
नुसारेणैवकल्पनीयंसंभूयवणिजांसाधारणे धनेन एकार्जितद्रव्य अत्रविभक्तेनै
वेति एवकारसम्वलितविभक्तपदस्वरसात् साधारणानुपश्लेषेणापिअविभक्ता
र्जितेऽनर्जकानामंशंकल्पयंति प्रांचः तच्चसाधारणंसमाश्रित्येत्यादिव्यासवचने
साधारणधनोपश्लेषस्थलेऽर्जकस्यद्व्यंशकथनात् अनुपश्लेषस्थलेभागविशेषस्य ११५
श्लोकाः २५

केनापिमुनिनाऽकथनात् इषितंजीमूतवाहनेनप्राक् परंतुयत्सर्वानेवोद्दिश्य एकस्मैसमर्पि
तंद्रव्यंतत्रसर्वेषामेवसंप्रदानत्वात् सर्वैरेवतद्ग्राह्यंसमभागेनदानप्रयोजकायासस्वत्वे तु
विषमविभागोनइतितत्सं ॥ हृतंचौरेणभ्रष्टं अदर्शनतांगतं मृत्तिकाद्याच्छादनेनस्थि
तंअन्येनवानिधिभावेनगृहीतं प्रागुक्तं भ्रात्राऽपहृतंअन्योन्यापहृतंदुर्विभक्तंचपुनर्भ
जेत् एतान्येवपुनर्विभजेतुनापराणीतिपरिसंख्याविधिः पुनर्विभागश्चपित्र्यधनांत
रस्यविभागापेक्षयाइतिबंधुनापहृतमिअपहृतंसाधारणद्रव्यंअत्रापहारोगौणःस्ते
यलक्षणाभावात् स्तेयंहिपरमात्रद्रव्यस्यस्ववशीकरणं इदंचद्रव्यंनपरमात्रस्वत्वास्प
दीभूतंतदपिसामादिनाप्रदापयितव्यं नतुबलात् इतिस्मार्ताः अत्रेदमवधेयं यदिसा
मादिनानददात्येवतदाबलंकुर्यान्नवानचबलान्नैवप्रदापयेदितिमुनिवचनात् बलं
नकुर्यादेवेतिवाच्यंयः पूर्वं विभागमनुमत्यइदानीं ममापकृष्टभागोजातइतिशं क
यापुनर्विभागमिच्छति नतुसाधारणद्रव्यंछलादिनागृहीतुमिच्छतितस्यापिशा
सनकथनेन अस्याशासनस्ययुक्तिविरुद्धत्वादितिउच्यते तत्रैवअत्रापिराजादिवा
कोल्लंघनेदण्डोभवत्येवनतुप्रच्छादनमात्रेणदण्डः चौरस्ययथाग्रहणमात्रेणद
ण्डोभवति अत्रतुतथानइतिभावः इतिबलान्नेतिछलादिनेतिरत्नाकरः बंधूना
मितिअविभक्तैर्यदधिकंभुक्तंतदसौनदाप्यइतिजीमूतवाहनस्मार्तादयः वस्तुतस्तु
निह्नुतप्रकरणेलिखितत्वात् निह्नवविषयकमिदं तथाचनिह्नुंभूम्यादिकंयदसौभुक्त
वान् तत्रचभोगमूल्यांशंपरेपिप्राप्नुवन्ति तन्निरासकंवचनमिदंतथाचविभक्तानां
बंधूनांअविभक्तधनात् ग्रासाधिकंनदापयितव्यमित्यर्थः नचतथासतिअविभक्ता
नामित्यनर्थकंइतिवाच्यं तद्धनांशेऽविभक्तत्वसत्वात् विभक्तधनभोजनेतुभोगमू
ल्यस्यदानावश्यकत्वात् नचग्रंथकारेणस्पष्टालिखनात् वचनेचयथाश्रुतेनाबोधनात्
विभक्तानामविभक्तनिह्नुतद्रव्यभोगोदापनीयएवेति वाच्यंअविभक्तानामिवविभक्ता
नामपिसाधारणद्रव्यभोगेस्तेयलाभावेनभोगमात्रेणनष्टस्यदानायोग्यत्वात् निह्नु
तप्रकरणेतथालिखनस्वरसाच्चइतियुक्तमुत्पश्यामः। बृहस्पतिः। साधारणंऋणं
न्यासंनिह्नवेच्छद्मनाक्रियां पार्श्वहानिकरीकृत्वाबलान्नैवप्रदापयेत् मायाविनोधृतध
नाः क्रूरालुब्धाश्चयेनराः संप्रीत्यसाधनीयास्तेस्वार्थहान्याछलेनवा साधारणौयोऽत्रऋ
णन्यासौतयोर्निह्नवेदित्यर्थः नतुसाधारणस्यनिह्नवेऋणस्यनिह्नवेदित्यन्वयः ऋणस्यनि
ह्नवेबलाद्दाप्यत्वस्यऋणादानद्वीपेउक्तत्वादितिछद्मनानिह्नवेकृतेइतिपूरयित्वा
ऽन्वयः पार्श्वहानिकरीं निह्नवकर्तृच्छद्महानिकरीं क्रियांकृत्वादापयेत् नतुबलात्
यथाकस्मैचिद्दत्तंरत्नंअपह्नुतेभ्रातृभ्यः भ्रातरश्चविभक्ताःसन्तःकार्यवशात् तमत्रासा
राजसभांपिनिवेदयेतिराजाचतंप्रहृत्यनस्वीकारयेत् परंतुकार्यद्वारैवतत्प्रकारस्तु

श्लोकः २५

इमं पृच्छेत् देवदत्तस्तवऋणिको न वा इति स आह न ममऋणिकः किन्तु मम श्यालस्य इ
ति तत्र पृच्छति राजा कति मुद्राः कदा गृहीता इति ततस्तेन कृतमुत्तरं सावधानं स्थापये
त् राजा तत्र श्यालं परोक्षमानीय तव कति मुद्राः कदा देवदत्तेन गृहीता इत्यादिकं बहुप्रका
रं पृच्छेत् ततस्तेन कृतोत्तरस्य ऐक्ये ऽपरप्रकारमनुसरेत् अनैक्ये तु तत्र मिथ्यावाक्यरू
पच्छद्मभंगात् सामादिना दापयेत् छलेन वा इति अथवा साधारणन्यास निह्नवे छद्मना
दापयेत् पार्श्वहानिकरी निह्नवकर्त्तुः स्वार्थहानिकरी क्रियां कृत्वा दापयेत् वा करः पूर
णीयः स्वार्थहानिर्यथा यावन्न ददाति तावदस्य भूम्यादिकमवरुणद्धि राजेति अर्थः माया
विनः छलोपजीविनः छलेन धृतधना इत्यर्थः त एव क्रूरा लुब्धाश्च लोभं क्रूरतां च विना
परद्रव्यस्य छलेन हरणं न कुर्युरित्यर्थः संप्रीत्यातिसाधनियाः अथवा स्वार्थहान्या पूर्वो
क्तप्रकारेण अथवा छलेन इति पुत्रकृतविभागप्रकरणं जीवत् पि तृकविभागेपि
एष प्रकारो यथायथमनुसंदे यः यथा औरसपुत्रायैव पूर्णांशो देयः इतरेभ्यो ब्रह्म
पुराणाद्युक्तो भागस्तृतीयांशो वा औरसाभावे तु तेषामपि यथाक्रमं पूर्णांशो देयः अवि
भाज्यस्य च यथोक्तरूपेण विभागः अविभागो वा निह्नुतस्यापि एतादृश्यरीत्यैव एवं जी
वति पुत्राणां स्वार्जिते तु पित्र्यधनोप म्भसत्वे पितुर्द्व्यंशहरत्वं तदसत्वे पितुर्द्व्यंशित्व
मिति जीमूतवाहनमतं एतत् प्रपंचितं प्राक् भ्रातृधनोपघाते तु पितुर्द्व्यंशौ अर्जक
स्य द्वावंशौ धनिनामैकैकांश इति स्मार्त्ताः अत्र साधारणधनोपष्टम्भे ऽर्जकस्य द्वावंशौ
धनिनामैकैकांश इति स्मार्त्ताः अत्र साधारणधनोपष्टम्भे ऽर्जकस्य द्वावंशौ इतरेषामेकै
कांशित्वं व्यासादिवचनात् भ्रातृणामसाधारणे धनोपघाते पितर्य्येतत् कुतो लभ्यते स्व
यमेव पूर्वं लिखितं एकस्याश्वायासेनापरस्य स्वायासेनार्जितत्वात् समभागो युक्त इ
ति अत्र केचित् इदं लिखनं भ्रातॄणां अर्जकसाधारणधने नार्जनस्थले प्रायकं असा
रधनोपश्लेषस्थले तु वचनबलात् पितुर्द्व्यंशित्वं अर्जकधनवतोरेकैकांशित्वं बहु
नामर्जकत्वे तु एको ऽंशः सर्वैर्विभज्य ग्राह्यः बहूनां धनत्वे पि तथा सर्वेषां धनानां उप
ष्टम्भ द्वारा एकाकारजननात् न चैवं द्वाभ्यां भ्रातृभ्यां अन्येषामसाधारणधनेना
र्जने द्वावंशौ एव विभज्य गृहीतां न तु प्रत्येकं द्वौ द्वौ तथा च यात्र सहायेनार्जनं तत्र द्वा
वंशौ अत्र फलं तत्र को ऽंशा इति ससहायभावेनार्जने ऽप्रवृत्तिः स्यादिति वाच्यं एकेना
र्जितापेक्षया द्वाभ्यामर्जने अधिकधनलाभाद्युद्दिश्य एव प्रवृत्तिसंभवात् भ्रातृणां साधा
रणाधनार्जनस्थले पितुर्द्व्यंशाहरत्वकथनप्रयोजनं एवं विद्योपार्जितधनेपि एषैव री
तिर्यथामतमवलम्बनीया यदि तु विद्यामभ्यस्यतः कुटुम्बं पिता पुष्णाति तदा किं स्यादिति

श्लोकः २५

चेतु स्वभावत एव भागद्वयभागिनः पितुः पोषणे च विशेषाभावात् न च भागाधिक्यमिति
वाच्यं पुत्रकुटुम्बस्यापि पितृपोष्यत्वात् नहि एषां स्वामी यतु पोष्यते किंतस्य न पोष्याः यदि
च वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीदि
दिमनुवचनस्य यथाश्रुतार्थावकलनात् पुत्रकुटुम्बस्यावश्यपोष्यत्वं नास्तीत्यालोच्यते
तदा कुटुम्बं विभृयाद्भ्रातुर्यो विद्यामधिगच्छतः इत्यत्र भ्रातृपदं विवक्षितार्थकं वाच्यं न चै
वं पितृव्यभ्रातुष्पुत्रादेरपि निह्नुतं कुटुम्बपोषणमात्रेण विद्याधनादंशं प्रसनुपपत्तिः इ
ति वाच्यं पितृव्यभ्रातुष्पुत्रादेरपि भ्रातृतुल्यतया शास्त्रग्राह्यत्वेन भ्रातृधर्म्मारोपस्य युक्तत्वात्
॥अत्रेदमवधेयं भ्राता पाठार्थं गतः दैवात् तत्स्थानस्थस्य पोषककुटुम्बस्य भरणं करोति
॥तदा पोषकाय विद्याधनांशो न देयः । फलतः पोषणविनिमयादित्यनुभवः एवं यदि के
न चिद्भ्रात्रा केन पाठार्थिनः तदितरस्य च कुटुम्बभरणं करोति तदापि नास्य पोषकत्वमि
ति न विद्याधनांशलाभः यदि तु तत्र प्रतिग्रहभागी एक एव भ्राता तदा प्रतिग्रहजन्यपाप
भागित्वात् अनेनैव पोषणं सिद्ध्यती त्यंशलाभोपि युज्यते इति एतत् सर्वं अविभक्तार्जितत्वे
विभक्तार्जितत्वे तु पितुरपि न तत्रांशः दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः विभक्तानां
पृथग्ज्ञेयाः पाकधर्म्मागमव्ययाः इति नारदवचनात् पाकः अतिथिसेवाद्यर्थः कुटुम्बभोजनार्थ
श्च धर्म्मः नित्यनैमित्तिकक्रियाकलापः आगमः अर्जनं व्ययः मुष्टिदानादिः अत्राविशेषेण
विभक्तानामित्युपादानात् पितुरपि विभक्तत्वे आगमस्य पृथक्त्वं बोध्यते इदं च विभागसंदे
हे निर्णायकं वचनं अतो नेदं वचनं भ्रातृमातृमात्रविषयकं विभागसंदेहनिर्णायकया
ज्ञवल्क्यवचने पितुः पुत्रस्य चेति दर्शनात् एषां निर्णायकत्वमनुमानविषयत्वे लेख्याद्यभावे
तथा हि विभागधर्म्मसंदेहे दायादानां विनिर्णयः ज्ञातिभिर्भागलेख्येन पृथक्कार्य्यप्रवर्त्त
नादिति नारदेन लेख्यानंतरं पृथक्कार्य्यप्रवर्त्तनस्योपन्यासात् लेख्यस्य सर्वतोबलवत्त्वा
च्चात्र विभागो योधर्म्मस्तस्य संन्देहे एषां विभागो जातो न वेति सन्देहे इति रत्नाकर नतु विभा
गस्य यौ धर्म्मौ समीचीनत्वासमीचीनत्वरूपौ तत्सन्देहे इत्यर्थः पृथक्कार्य्यप्रवर्त्तनेन तयोर्नि
श्चेतुमशक्यत्वात् नच पृथक्कार्य्यप्रवर्त्तनमित्यनेन यत् द्रव्यांशः समीचीनत्वं जातं तद्व्ययं न
न्तरस्थाने स्थापयित्वा कार्य्यप्रवर्त्तनमेव बोध्यते इति वाच्यं पृथक्कार्य्यप्रवर्त्तनस्य स्वरूपमेव
नारदेन दानग्रहणेत्यादिना स्फुटीकरणात् साक्षित्वे लेख्ये तु तत्रापि निर्णायके भवितुमर्हत
इति भागलेख्यस्वरूपमाह । वृहस्पतिः । भ्रातरः संविभक्ता ये स्वरुच्या तु परस्परं विभागप
त्रं कुर्वन्ति भागलेख्यं तदुच्यते भ्रातरइत्युपलक्षणं पितृविभागे पिनापि त्वे य एवं भ्रातुष्पु
त्रादयोपि संविभक्ता इति स्वरूपकथनं असंविभागे पि लेख्यकरणात् वस्तुतस्तु लेख्यं नि
रर्थकमेव स्वरुच्येति स्वपदेन यस्य कस्यचितु भागिनो ग्रहणं विभागे सर्वेषामिच्छाया अ न

पेक्षणात् विभागपत्रं वृत्तविभागबोधकपत्रं यत्कुर्वन्ति तत्पत्रं भागलेख्यमुच्यते पत्रनि
विष्टाक्षराणां विभागबोधकत्वेन तद्धारकतयापरं परथापत्रस्यापि विभागबोधकत्वं अथ
वापत्रलेख्ययोरभेदारोपात् तथाएवंच वृहस्पतिना तत्पत्रस्य भागलेख्यसंज्ञाकरणात् भा
गलेख्यपत्रमिदं इति लिखनं युज्यते अत्रच विभागबोधकत्वाख्यानात् यादृशशब्दविन्यासे
न विभागो बुध्यते तादृशशब्दविन्यास एव युक्तः यथा अहं भवद्भ्यः सकाशात् पैतृकस्य अ
शेषस्य धनस्य विभागं सम्मतं एतावदेतावद्धनं प्राप्तवान् भवद्भ्यश्च एतावदेतावद्धनं दत्तवा
न् इति लिखनं अन्यदस्तीति यद्वक्ष्यते तन्मिथ्यैवेति दृढीकरणं अनेनैव विभागो बोध्यते दृ
ढीकरणाच्च तत्र प्रमाण्यं ज्ञाप्यते तत्रापि धनानां प्रत्येकं नामलिखनं युक्तं अन्यथा निह्नुत
विभागसंभवनात् पश्चात् लिखनस्य पृष्टेकरणे पि न क्षतिः किंतु तदानीमपह्नुतद्रव्यस्य उ
त्तरकालं लिखनशंकया सर्वधनानां कबन्धः कर्तव्यः यदि तु लिखनमध्ये एव तेषां समुदाय
धनानां लिखनं भवति तदा सुष्ठु भवति इति विभावनीयं एवं प्रतिभ्रातृलिखनमपि मिथ्या ते
केन किं प्राप्तमिति विशेषस्य युगपल्लिखनस्य प्रायोऽसंभवात् तत्फलं च उत्तरकालं विभागस
म्यकृत्वा सम्यकत्वज्ञानं एवं ज्येष्ठत्वादिना यदधिकं दीयते तस्यापि प्रत्येकं लिखनमिति मुख्यः
कल्पः तदभावे तु स्वसम्मतेन सम्यक विभागो लब्ध इति केवलं लिखेत् भ्रातृगुणानुसारेण
अत्रच यः कश्चिदर्थी निश्चातुः स्वरुच्या तु परस्परं लेख्यन्तु साक्षिमत्कार्यं तस्मिन् धनिकपूर्व
कमिति याज्ञवल्क्यवचने यः कश्चिदर्थ इति सामान्यत उक्तेरत्रापि आकांक्षासत्वेन तादृशी
रीतिरनुसरणीया तत्रच ऋणादानप्रकरणोक्तत्वात् धनिकशब्दकीर्त्तनं वस्तुतो धनिकशब्दस्त
त्प्रकारवचनः तथाच ऋणादानपत्रे धनिको यथा लिखनोद्देश्यः अत्रापि तथा यो लिख
नोद्देश्यः स एव धनिकशब्देन धर्म्मभ्यः एवंच यान् भ्रातृन् प्रति लिखनं क्रियते तेषामे
व नामादौ लिखनीयं एवं भ्रातृणां परस्परसमभावात् स्तुतिबोधकपदापेक्षा नास्ति स्म र
णबोधकपदलिखनन्तु अवारितमेव एवं पितृनामादि चिह्नं कर्तव्यमेव याज्ञवल्क्येन लि
खितत्वात् तावन्नामक भ्रातृवर्गाणां अन्येषां शंकानिरासकत्वाच्च अन्यथा तावन्नामक
भ्रातृणां कश्चित् शठः तदेव पत्रमानीय स्वकीयविभागेऽवृत्तेपि विभागो वृत्त इति वक्तुं दैवा
त् शक्नुयाच्च एवं वत्सरमासमासार्द्धदिवससंकेतोपि लिखितव्यः अतएव वहितोत्तरमर्ज्जि
तस्य विभक्तार्ज्जितत्वं बोध्यते एवं सर्वाक्षरलिखनशक्तिमता लिखित तादृशगुणायुक्त मिथ्या
पत्रस्य तल्लिखितमासीयत द्दिवसोत्तरकालीना पृथक कार्यप्रवर्त्तननिश्चयेन मिथ्यात्वमपि
ज्ञायते एवं लेखकः स्वहस्तेन स्वनामलिखनशेषे लिखेत् तत्रापि पित्रादिनामसमाप्ते
ऽर्थिऋणीनाम स्वहस्तेन निवेशयेदिति याज्ञवल्क्यवचनात् अत्रापि ऋणिपदं स्वतः प्र
तिनिधिद्वारा लिखनकर्तृपरं पूर्वोक्तयुक्तेः एवं साक्षिणोऽपि स्वनामलिखेयुः पितृनामादि ११७

पूर्वकं लेखकोऽपि स्वनाम लिखेत् एवं विनासाक्षिणः स्वहस्तलिखितं प्रमाणं वस्तुतस्तत्रा
ऽपि साक्षिणः कर्त्तव्या इति क्रमेण लेख्याद्विशेषो विशेषस्तूक्तः अधिकं स्वबुद्ध्या कल्पनीयं
एतत्प्रकरणे स्मार्त्तधृतो बृहस्पतिः यद्येकशासने ग्रामक्षेत्रारामाश्च लेखिताः एकदेशो
पभोगे तु सर्वे भुक्ता भवंति हि शासनं पत्रादीति स्मार्त्ताः तथा चात्र शासनपदं लेख्यसामान्या
धारपरमिति तदभिप्रायः एवं च यत्र भ्रातृभिर्विभज्य यद्ग्रामादिकं भूम्यादिकं वा भागले
ख्ये लिखितं तत्र यदि दैवात् कियती भूमिर्भुज्यते अपरा च न भुज्यते तत्रापि सर्वैव भूमिर्भुक्ता
सिद्ध्यति न तूपेक्षिता यदि तु मध्यस्थादिनिकटे वाक्येन सा गोवृत्तः तदाऽनुमानापेक्षयाऽ
त्र शास्त्रस्य बलवत्त्वेन तन्मध्यस्थवचसा उपेक्षिता सिद्ध्यतीति मंतव्यं अत्र च संविभागक्रय
प्राप्तं पित्र्यं लब्धं च राजतः स्थावरं सिद्धिमाप्नोति भुक्त्या हानिमुपेक्षया प्राप्तमात्रं येन भु
क्तं स्वीकृत्यापरपस्थितं तस्य तत् सिद्धिमाप्नोति हानिं चोपेक्षया तथा पित्र्यं पितुरागतं
पितुश्च लाभो द्विविधः सभ्रातृविभागात् एकः क्रयेण च एकतादृशं द्विविधं पितृद्रव्यं ल
ब्धं एतच्च अन्येषां पितृलब्धानामुपलक्षणं अथवा संविभागप्राप्तं क्रयप्राप्तं पितृतो लब्धं
राजतो लब्धं चेति चतुष्टयं न च संविभागप्राप्तस्योपादानं व्यर्थं पित्र्यपदेनैव लाभादिति
वाच्यं संभूयवणिजां संविभागसंग्रहार्थमेव तत् कथनात् न वा पित्र्यपदं व्यर्थं संविभागेनै
व तत् संग्रहादिति वाच्यं अविभक्तपित्र्यधनसंग्रहार्थं तत्कथनादिति एवंभूतं द्रव्यमुपेक्ष
या हानिमुपैति यथा चत्वारो जनाः एकग्रामवासिनः कथंचित् कियतीं भूमिं अर्जितवंतः
ततश्चतुरोंऽशान् कृत्वा लेख्यं कृतवन्तः एकस्तल्लिखितांशं न भुंक्ते किंतु उपेक्षितवान्
अपरस्तमंशं भुंक्ते तत्र उपेक्षकस्य हानिः एवं क्रये विक्रीताऽभुंजानस्य उपेक्षकस्य हानि
र्मूल्यं तु लभ्यते वस्तु विक्रयणात् एवं पित्र्यं धनं प्राप्यायं न भुंक्तेऽपरस्तद्भुंक्ते न तत्स्यैव एवं
राजादिनो लब्धं भूम्यादिकं यदि न भुंक्ते किंतु उपेक्षते तेन दातस्य हानिः अत्र च भोगेन सिद्धि
कथनादेव उपेक्षकस्य हानिप्राप्तौ हानिमुपेक्षयादिति व्यर्थमिति वाच्यं यत्र संविभागप्राप्त
स्यैवादभोगः किंतु उपेक्षा नास्ति तत्र हानिर्नास्तीति फलबोधनरूपार्थबलात् अत्र
च याज्ञवल्क्योक्तविंशतिवर्षपर्यन्ता भोगापेक्षा न वेति उच्यते अस्वामिकृतभोगस्य विंश
तिवर्षीकस्य स्वामिनः पेक्षाकालो याज्ञवल्क्येनोक्तः न तु स्वामिनोऽभोगस्य एवं सका
लः सिद्धप्रसिद्धस्वत्वस्य विनाशकाल उक्तः अत्र च उपेक्षासाध्यमानस्वत्वविरोधिनी न च क
याघनन्तरं तत्र स्वसत्वं सिद्ध्यत्येव उपेक्षयाच्च तस्य नाशोऽस्त्रेति वाच्यं तथा सति विंशतिव
र्षापेक्षया केनापि वारयितुमशक्यत्वात् अत्र च विभागोऽसंमतः अथवा तदंशं एकस्मै द
त्वा अन्यत्रांशं गृहीत्वाऽयं भुंक्ते अन्यस्मै उदासीनाय कस्मैचित् दत्तवान् वा इति क्रयस्थ
ले क्रयनुमतो न वा इति पित्र्यस्थले पिता भुंजानाय दत्तवान्न वा इति राजलब्धस्थले राज्ञा दा
श्लोकः २८

नमनुमतंनवेत्यादिसंदेहे नस्वत्वस्याप्रसिद्धस्य एव अभावोऽनुमीयतेऽतोविंशतिवर्षकाला
पेक्षानास्ति परंतुसुस्थेनतद्भूमिभोगक्षमेणावर्तमानसंप्रदानातिरिक्तविवादमन्तरेणय
द्यभोगस्तदैवतस्यहानिरितिफलितार्थः तत्रचयदिएकलेख्येवहवोभूमिग्रामादयो लि
खिताः सन्तितदेकदेशभोगेनैवसर्वभोगः सिद्धइतिवृहस्पत्युक्तः अत्रराजलब्धे किंचिद
धिकमालोचनीयं प्राप्तमात्रेणइतिअपरिपन्थितमिति यदितुकश्चिद्विवमादत्तेभोगार
म्भकालेतदातद्विवादनिरासंविनाभोगसिद्धिर्नभवतिततश्चवलवत्वादिसमक्षंसति रा
जनिनिर्विवादं भोगमात्रेणस्वत्वेसिद्धेवहुजनप्रसिद्धेचसतिअनन्तरंदानक्रियविनि म
यविंशतिवार्षिकाभोगादिरूपकारणंविनातन्नाशोनानुमातुंशक्यतेइतिभावः तथाचभो
गकालेऽतीतेकिंचिद्भोगसंवलितंलेख्यभोगकालेऽनतीतेचलेख्यामात्रंनिर्णायकंभो
गकालेऽतीतेऽपिअस्वास्थ्यविदेशगमनादिरूपभोगप्रतिवंधकसंवलितंलेख्यमपिनि
र्णायकं तावतु यावत्प्रतिवादिना अत्रस्वत्वाभावसाधकप्रमाणंनोपन्यस्यते ततश्च
लेख्यादिषु अप्रमाणत्वंवोध्यतेइति विभावनीयंअत्रचनारदवचनेज्ञातिभिरितिविशेष
णातृतीया तथाचसाक्षिरूपज्ञातिरूपज्ञातिमतु भागलेख्येनइत्यर्थः अतएवज्ञातीनां
कीर्तनंतेष्वसत्सु अन्यसाक्षिणांग्रहणंइत्येतदर्थंइतिजीमूतवाहनेनोक्तं यथायाद
शीजात्याकर्मणाचवादिप्रतिवादिनौजात्याकर्मणाच तादृशाणामेवसाक्षित्वंमुख्यअ
न्येषान्तुगौणं तथाविभागविवादेज्ञातीनामेवसाक्षित्वंमुख्यं अन्येषांगौणमितिभावः
एतेनज्ञातिभिन्नसाक्षिमतुभागलेख्यस्यावतारणेकिंज्ञातयः साक्षिणोनकृताइतिनि
मित्तंपृच्छेद्राजाइतितत्रचनिमित्तवादेयदिवादीअसमर्थोभवतितदालेख्येसंदेहोजा
यतेइतिद्रष्टव्यं चण्डेश्वरस्तुज्ञातिभिर्निर्णयःकर्तव्यःइतिपृथगुक्तवान् ज्ञातयोविभाग
द्रष्टारइतिविवादचिन्तामणिः एवयोर्मतेज्ञातीनांकेवलसाक्षिविधया निर्णायकत्वंवोध्यं
जीमूतवाहनस्यापितादृशव्याख्यानेदोषाभावः वस्तुवस्तु लिखितन्तुसाक्षिभ्योवल
वदित्युक्तंइतिजीमूतवाहनोक्तेर्लिखितस्यसाक्षितोपिवलवत्वात् पूर्वंसाक्षिणांकी
र्तनंअनुपयुक्तंभवति एवंयदिअलिखिताःसाक्षिणोज्ञातयस्तत्रवप्रशस्ताः तदालि
खिताअपिज्ञातयएवप्रशस्ताःस्युरितिज्ञातिसाक्षियुक्तंलिखनंमुख्यं तदभावेऽ
न्यसाक्षियुक्तं तदभावेकेवलसाक्षिणः तदभावेपृथक्कार्यप्रवृत्तिरितिसंक्षेपा
त्क्रमइतिध्येयं ज्ञातयोविभागद्रष्टारइतिविवादचिंतामणौज्ञातीनांतदन्येषांचसा
क्षित्वमायातं तत्रापिअन्यापेक्षयाज्ञातेर्मुख्यत्वंगोत्रजैश्चापरिज्ञातेइतिशंखवचनात्
व्यवस्थेयं नचतदेकवाक्यत्वात् ज्ञातिपदेनगोत्रजाएवग्रहीतव्याइतिवाच्यं तथासति
नारदस्यन्यूनतापत्तेःन्यूनताभंगायउपलक्षणपरत्वस्वीकारमपेक्ष्ययोगार्थस्वीकार ११८

श्लोकः ३०

एवमुचितः क्रमस्तु योक्तिक एवद्रत्याशयः। याज्ञवल्क्यः। विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभि
लेखितैः विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः। प्रथमं ज्ञातयः सपिण्डाः तदभावे बंधु
यदोपनीताः सम्बंधिनः तदभावे उदासीना अपि साक्षिणः इति जीमूतवाहनः तथा च त्रिवि
धानां साक्षिणां लिखितस्य च पृथगुपादानात् अलिखितानामपि यथाक्रमं विभागद्रष्टॄणां प्र
माणं बोद्धव्यं ज्ञातिबंधुतदितरेषु क्रमशो न्यूनत्वं बोध्यं अन्यथा तेषां पृथक् पृथगुत्कीर्तनं न
स्यात् इति जीमूतवाहनमतं यौतकैः पृथग्भूतै युमिश्रणे इति धात्वनुसारात् तथा च पृथग्भू
तैर्गृहक्षेत्रैरिति मिश्राः पूलमिश्रणे यू इति द्रव्यभाष्यटीकाकि चितु यमिश्रणे इति धात्वनुसारा
तु मिश्रितैरित्यर्थः तथा चाविभक्तानां मिश्रितैर्गृहक्षेत्रैरविभक्तत्वमनुमीयते वैपरीत्ये च वि
भक्तत्वमिति भावः। शंखः। गोत्रभागविभागार्थे संदेहे समुपस्थिते गोत्रजैश्चापरिज्ञाते
कुलं साक्षित्वमर्हतीति। गोत्रजैर्ज्ञातिभिरित्यर्थः। तैरज्ञाते कुलबंधुः साक्षित्वमर्हतीति
न पुनर सम्बन्धी तेनापरिज्ञाते ऽन्यः साक्षीत्यर्थः अत एव मुख्यभूता ज्ञातय एव नारदेन नि
र्द्दिष्टाः इति जीमूतवाहनः बंधुः संबन्धी अन्यः साक्षी याज्ञवल्क्य वचनादिति भावः अ
त्र केचित् कुलं गृहचतुष्टयमिति प्राचीन प्रवादात् कुलशब्देन प्रतिवासिनां गृहचतुष्टय
स्थ बोध्य प्रतिवासिनां तदभावे ऽन्येषां अथवा सजातीयैः कुलं यूथं इत्यमरकोषात्॥
जात्या कर्मणा च तुल्यानामेव कुलशब्देनोपादानं तेषामप्यभावे विसदृशानामपि व्य व
हारप्रकरणे मुनिभिरनुमतानां अगत्या साक्षित्वं स्वीकरणीयमेव अत्रेदमवधेयं रघु
नन्दनाः(?) तत्पुरुषाणां च सर्वतो बलवत्वात् तत्सन्निधाने कृतं तत्साक्षियुक्तं पत्रमपि बलवद्भव
तीत्याहुः गोत्रभागविभागार्थे गोत्रलब्धविभाजनीयविभजनार्थे वृत्त विभागवैरीत्य
संदेहे च इति स्मार्त्ताः गोत्रात् कुलात् भागो भजनं प्राप्तिर्यस्य स गोत्रभागः दायस्तद्वि
भागोर्थो विषयो यस्य एवंभूते संदेहे तथा च दायविभागविषयसंन्देहे इति फलितार्थः
स च द्विविधः विभागो वृत्तो न वा इत्याकारकः विभागः समीचीनो न वा इत्याकारकश्च इ
ति स्मार्त्तानामाशयः गोत्रजादीनां सम्यकुला सम्यकुलज्ञाने पि शक्तिमत्वात् युज्यते
तत् इति नारदेन पृथक् कार्यप्रवर्त्तनादिति यदुक्तं तत्प्रकारं स्वयमेवाह भ्रातॄणाम
विभक्तानामेको धर्म्मः प्रवर्त्तते विभागे सति धर्म्मोपि भवेत्तेषां पृथक् पृथक् दानग्रहणप
श्वन्नगृहक्षेत्रपरिग्रहाः विभक्तानां पृथक् ज्ञेयाः पाकधर्म्मागमव्ययाः साक्षित्वंप्रा
तिभाव्यं च दानं ग्रहणमेव च विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परं येषामेताः क्रिया
लोके प्रवर्त्तंते थरिक्थिनां विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेन तान् दानादिकर्म्मणां
विभागनिर्णायकत्वं वक्ष्यन् तदन्तः पातिनो धर्म्मस्य निर्णायकत्वे सन्देहात्तसारणाय
भ्रातॄणामिति वचनस्य प्रथममुपन्यासः विधिरूपः अत्र संदेहो यथा मृतपितृकत्वेना।

श्लोकः २२

धिकारिणां अविभक्तानामपि भ्रातृणां सर्वेषामेवसन्ध्यावन्दनादिवत् प्रत्येकमेवगार्हस्थ्या
श्रमकर्म्मदेवपूजादेराव पृथक्त्वं एवंविभक्तानामपिवा मिलितानां एककर्म्मकरणेनैवसि
द्धिरिति यदिभवेत्तदा विभागाविभागयोरेवमिलित धर्म्मभागित्वेनप्रत्येकधर्म्मभागित्वेन
वाविभागसंदेहानिरासादीदानिंचअविभक्तानामेकधर्म्मभागित्वविधानात् विभक्तानां
चप्रत्येकधर्म्मभागित्व विधानात् विभक्तानांच प्रत्येकधर्म्मभागित्वविधानात्तदुत्सारणं यच्चवि
भक्तैरपि मिलितैर्गार्हस्थ्याश्रमकर्म्म क्रियते तन्नारदवचनसम्मतं एतच्चकर्म्मनकाम्येष्टा
पूर्त्तादिनत्राविभक्तानामपि मिलितानामिलितानामिवप्रत्येकमप्यधिकारस्य सर्वसिद्धत्वा
त् वक्ष्यतेहि जायापत्योरपि प्रत्येकमधिकार नवानित्यंसंध्यावंदनादिकं ततुकरणाकरण
फलस्यपुरुषएवकथनात्तस्मात् यदकरणे धनहान्यादिरूपमार्हस्थ्याश्रमगतदोषोभ
वतितदेवएवं यत्कर्म्मकरणे धनवृद्ध्यादिरूपगार्हस्थ्याश्रमगत गुणोभवति तत् कर्म्मा
पितृत्येयं एवंपार्वणश्राद्धाद्यपिअलंविस्तरेण धर्म्मावैश्वदेवादीतिचण्डेश्वरवाचस्पति
मिश्रौ आदिपदेनातिथिसेवादेर्ग्रहणं इतिदानं ग्रहणंच परस्परनैरपेक्ष्येण पशुक्र
यादि अन्नोपादानंच पृथक्क्षेत्रच परिग्रहोवन्धकादेः पाकधर्म्माः पार्वणादिः आ
गमोवृत्तार्ज्जनादिः व्ययोधनविनियोगः इतिमिश्राः एतन्मतेभ्रातृणामित्यादिवच
नंनविधिःकिंतुविभागनिर्णायक धर्म्मबोधक मेवमत मेतत् सुष्ठु केचित्तुअन्नंअन्ना
र्थंधान्यतण्डुलक्रयादीति वदंति एवं एकस्यऋणादिप्रयोगेऽपरः साक्षीचेत्प्रति
भूश्चेत् एकेनदत्तमपरोगृह्णातिचेत्तदातौ परस्परं विभक्तौज्ञेयौइति मिश्राः एवंच
याज्ञवल्क्यवचनेगृहक्षेत्रैश्चयौतकैरित्यनेनापिएतदेवोक्तं एतेषांप्रत्येकंसमुदायो निर्णा
यकंइत्यत्र यदिप्रत्येकमेवनिर्णायकमित्युच्यते तदाकेवलधनार्जनादपिविभागोनिर्णीयंतदृष्टा
पत्नीचअविभक्तेनस्वमात्रोद्देश्यकार्ज्जनस्याप्रसिद्ध्या अनाश्रित्येत्यादिवचनवैयर्थ्यपत्तिः न
चतत्रप्रत्यक्षादिनाविभागवाधात् नतन्निर्णयःइतिवाच्यं तथासतिविभागंविनापिपृथगर्ज्ज
नसत्वेन तस्यनिर्णायकत्वाभावप्रसंगात् नहियेनविनायत्तिष्ठति तत्तस्यनिर्णायकं भवेत् तथा
सतिद्विपदत्वस्यब्राह्मणत्वनिर्णायक त्वापद्येत नचअपृथक्कृधनार्जनाभाववत्वं पृथक्शब्देनवो
ध्यतामितिवाच्यंतस्यविकल्पेनवक्तुमशक्यत्वात् तथाहि किंअपृथगधनार्ज्जनाभाववत्वंकदा
चिदपृथगर्ज्जनाभाववत्वं यावत्कालं अपृथगर्ज्जनाभाववत्वंवेतिविकल्पः तत्राद्योवक्तुमश
क्यः अविभागकालेपिभ्रातुर्निद्राभोजनादिकालेस्वस्वत्वमात्रोद्देश्यकार्ज्जनकालेचकादा
चित्कापृथगर्ज्जनाभाववत्वात् तदानींचवास्तवविभागासत्वेनरतस्यनिर्णायकत्वासम्भवात्।
द्वितीयोऽपिवक्तुमशक्यः तेनैवकदाचित्अपृथगर्जितत्वात् नचउत्तरकालमपृथगर्जनसंभ
वनारहितत्वंतदितिवाच्यं तस्यविभागसंदेहकालेनिर्णेतुमशक्यत्वात् अत्रोच्यतेएकैकाएवए

तेविभागनिर्णायकाः तथाप्रसादलब्धादीतरपित्र्यधनसहकारेण पृथगधनार्जनमेवविभागनिर्णायकं
दानंचपित्र्यधनस्यभ्रात्रंतरानुमतिमंतरेणतत् समक्षकृतंग्रहणंचग्रामीणैर्दत्तस्यभ्रात्रन्तरेणग्रहण
समानकालीनंतैरेवदत्तस्य एवमन्यत्रापिस्वबुद्ध्याकल्पनीयं पशूनांक्रयः पित्र्यधनेनपित्र्यपशौअ
सत्यपृथग्भावेपिनिर्णायकोभवितुमर्हति अन्नंचभिन्नभिन्नस्थानेपच्यमानंतण्डुलादिऋयस्यपृथक
पृथङ्मूल्यकः पित्र्यमूल्यदानेनयत्रचबहुपरिजनानांएकत्रान्नपाकेदुःखदर्शिनांपृथकपृथगन्नपा
कोऽप्यविभक्तानांदृश्यतेतत्रस्वार्थमात्रपाकोहिःसः देवतातिथिभृत्युभरणाद्यर्थःपाकस्तुतत्राप
पृथगेवभवति ननुयेषांविभक्तानामेवदेवतापूजाद्यर्थंस्थापितासाधारणद्रव्येणैवदेवतापूजादिकंप्र
चरंतितेषामन्नपार्थक्येनविभागनिर्णयोनभवतिद्दतिचेत्कांक्षतिः तत्क्रियान्तरपार्थक्येनैवविभा
गनिर्णयसंभवात् अतएव एतेसामप्युत्कीर्तनंअन्यथाअन्नपाकस्यसर्वेषामावश्यकत्वेनतस्यै
वनिर्णायकत्वसम्भवेदानग्रहणादेरुत्कीर्तनवैयर्थ्यापत्तिः वस्तुतस्तुयेषांकुटुम्बसम्बन्ध्यतिथ्या
द्यर्थसाधारणाशेषपाकाः पृथक्पृथगन्यनैरपेक्ष्येण प्रवर्त्तन्तेतेविभक्ताएवतेषांधर्मकृयापृथ
गेवकर्त्तुमुचिता अतएव एकपाकेनवसतांपितृदेवद्विजार्चनं एकंभवेद्विभक्तानांतदेवस्याद्गृ
हेगृहे इतिवचनेन एकपाकेनवसतांधर्म्माचरणैक्यमुक्त्वाविभक्तानांतत्पार्थक्यकथनात्
अन्नविभागएवविभागइतिप्रतिपादितं ततश्चाविभक्तानिअवशिष्टधनानिसन्त्यपिनाविभाग
प्रतिपादकानिविभक्तानामपिसाधारणधनस्यबहुशोदर्शनात् एवंचविभागपदार्थएवकइति
जिज्ञासानिवृत्तिश्चभवति यतोनपित्र्यधनविभागोविभागपदार्थः पित्र्यधनशून्यानामविभाग
प्रसंगात् अथयत्किंचिद्धनविभागः अतएवअशक्तस्यानीहमानस्यकिंचिद्दत्वापृथक्क्रियाइ
तियाज्ञवल्क्योक्तं विभागंविनापृथग्धर्म्मावश्यकताभावइतिचेन्न येषांकिंचिदपिनास्तितेषांअ
विभागप्रसंगात् तस्मात्साधारणसम्बंध्यतिथ्याद्यर्थपाकविभागएवविभागपदार्थः ननुये
षांसम्बन्ध्यागमनंअतिथ्यागमनंचनास्तिकथंतेषांविभागइतिचेत् अद्यप्रभृतिवयंविभक्ताइतिनि
यमपूर्वकपाकपार्थक्यमेवविभागः तदुत्तरंधर्म्मक्रियापित्र्यसम्बन्धाल्लब्धंधनादिकंचपृथगे
वभवतितत् पूर्वंचैकमिति एवंचपाकपार्थक्येनैवविभागनिर्णयेसंभवेऽन्ये—मुत्कीर्त्तनंव्यर्थं
पृथक्पाकएवचेद्विभागः तदातस्यवादिप्रतिवादिनोर्वचनादेरनिर्णयेपुनस्तेनविभागनि
र्णयप्रयासोव्यर्थइतिनवाच्यं अभिसंधिपूर्वकपृथक्पाकस्यैवविभागपदार्थत्वात् नियमपूर्वक
त्वसंदेहस्थलएवविवादप्रवृत्तिः तत्रचक्वचित्पाकस्यस्वरूपज्ञानेनैवनियमपूर्वकत्वंनिर्णी
यतेक्वचित्पृथग्धर्म्मक्रियादिद्वाराइतियदिसमवधानेनुदृढतरनिर्णयोभवतीतिविभावनीयं।
॥याज्ञवल्क्यः॥ भ्रातृणामथदंपत्योःपितुपुत्रस्यचैवहि प्रातिभाव्यमृणंसाक्ष्यमविभक्तेन
तत्स्मृतं प्रातिभाव्यंसाक्षित्वंऋणप्रदानंग्रहणंच एवंनारदोक्तंअदृष्टार्थकद्रव्यदानंत
द्ग्रहणादिकंचअविभक्तधनमाश्रित्यपरस्परंवर्जयेदित्यर्थः वर्ज्जनेनैवपरस्परसम्बंधःन
तुपरस्परसाक्षित्वादिकंवर्जयेदित्यर्थः एकस्यापिसाक्षित्वादिवर्ज्जनात् एतद्वचनंचयाज्ञवल्क्ये

नप्रतिभूप्रकरणेलिखितंअतोनिषेधस्सः तथाचशास्त्रबोधितसाक्षित्वादिनिवृत्तिरेवविभा
मबोधिकासाक्षित्वादयोविभागबोधकाः ननुसाधारणमेवद्रव्यंएकस्मैददातिसच अयमिदा
नींददातुउत्तरकालंस्वमात्रोद्देशेनधर्म्मार्थंत्यक्तत्वात्अस्यांशस्यैवन्यूनताभविष्यतीत्यभि
मन्धायगृह्णातितत्रवास्तवविभागासत्वात्दानस्यविभागनिर्णयत्वंमास्तुइतिचेत्साधारणध
नस्यतदंशिनेदानादेःशास्त्रनिषिद्धत्वेनअकर्त्तव्यत्वमेवअज्ञानतःकृतमितिचेत् अज्ञान
कृतान्यत्वविशेषणमपिअनुसरणीयं वस्तुतएतादृशाज्ञानवानिदानींप्रायोनदृश्यतएवइ
तिविभावनीयंदानग्रहणपदेविक्रयक्रयादेरपिलक्षकेइतिमंतव्यं यद्वनेसाक्षित्वादिकम
स्तितद्वनेएवविभागबोधः पारुष्यसाहसादौतुअविभक्तस्यापिभ्रातुःसाक्षित्वादिकरणे
नदोषोबोध्यतेपरन्तुनब्रूयाद्बन्धवःस्नेहादित्यादिनानिषेधात् तेसाक्षिणोनकर्त्तव्याःइति
ध्येयंएतेषांविभागात्प्राक्परस्परं प्रातिभाव्यादिव्यवहारोनेत्यर्थः इतितुमिश्राःदंपत्यो
रितिजायापत्योर्नविभागोविद्यतेइत्यापस्तम्बवचनात् दंपत्योर्विभागासंभवे एवतात्पर्यं
अन्यथासर्वेषामेवसमानत्वेनजायापत्योर्विशेषोक्तिवैफल्यंस्यात् तथाचात्रअविभक्तेइ
तिव्यर्थंनचभार्य्यायाःस्त्रीधनेस्वातन्त्र्यात्तत्रदानाद्यनुमत्यर्थं अविभक्तेइतिपदं एवंचकायि
कश्रमोपार्जितादौदानादिनिषेधइतिवाच्यं तत्रापितस्याविभागेप्रमाणाभावात् नचभार्य्या
पुत्रस्चइत्यादिमनुवचनंप्रमाणंभार्य्यायाःस्वोपार्जितेभर्तृस्वत्वबोधनादितिवाच्यंतद्वचनस्य
यथाश्रुतार्थकल्पनेभर्तुरेवस्वत्वेनअस्वातंत्र्यमात्रपरत्वकल्पनेचभार्यामात्रस्वत्वेनअविभक्त
त्वाभावात् एवमपिभर्त्तरिअविभक्तत्वविशेषणवैयर्थ्यात्चइतिचेदत्रकेचित्संभवव्यभिचारे
हिविशेषणमनर्थवद्भवतीतिन्यायेनअविभक्तेइतिविशेषणंतत्रनदेयमेवइत्याहुःअ
परेतुदंपत्योर्मध्यगंधनमितिवचनात् पत्युर्धनेपत्न्याःस्वत्वंविद्यतेतत्रचापकृष्टस्वत्व
वत्वादनयादानादिकंनिषिद्धंविभागोवितस्याविद्यतएव यदिकुर्यात्समानांशान्पप
त्न्यःकार्य्याःसमांशिका इतियाज्ञवल्क्यवचनात् आपस्तम्बोक्तविभागाभावःसाक्षात् या
ज्ञवल्क्यविरोधात् पाणिग्रहणाद्धिसहत्वंकर्म्मसुतथापुण्यापुण्यफलेषुचेतिआपस्तम्ब
वचनशेषात् विवाहाग्निसाध्यकर्म्मसुअग्निहोत्रार्थंअग्न्याधानेतदग्निसाध्यपुण्यक
र्म्मादौचाविभागएवआपस्तम्बोक्तःनतुधनेऽविभागः नचद्रव्यपरिग्रहेषुचनहिभर्तुःप्रवा
सेनैमित्तिकेदानेस्तेयमुपदिशन्तीति आपस्तम्बवाक्यान्तरेणद्रव्येष्वपिअविभागउक्तःइ
तिवाच्यं याज्ञवल्क्येनसाक्षात्विभागबोधनात् तद्वचनस्यापिपतिधनेपत्नीस्वत्वमस्तीति
एतावन्मात्रतात्पर्यकत्वकल्पनादतएवनहिइत्यादिहेतुवन्निगदोपिसंगच्छते तथाहि
तद्वनव्ययकर्तृत्वंतद्वनस्वामित्वमेवनिर्णाययतिनतुतद्वनेविभागासंभवं एवंचविभक्तया
भार्य्ययागार्हस्थ्याश्रमीयस्त्रीसाधारणकर्त्तव्यदेवतापूजादिधर्म्माःकर्त्तव्याःविवाहाग्निसाध्य
क्रियाकलापस्तुतदानीमपिपतिसमाहवेनैवइतिइदंपुनारिहावधेयंपत्न्याकायिकश्रमे १२०

णार्जितंपितृमातृभर्तृकुलादितरस्मात्प्राप्तंचधनंपत्न्यासहविभजेत्यत्नेसमधिगच्छंतीतिव
चनात् तत्रचसपत्नीनांपुत्राणांनांचांशोनास्तिपतिस्वत्वस्यपत्नीपरतन्त्रत्वात् नन्वेवंत्रयएवाधनाः
स्मृताइतिवचनात्पत्नीधनेपुंसएवस्वत्वात् तद्धनाधिकारिणामधिकारोस्तुनचतेषांधनसा
ध्यवैदिककर्म्माधिकारस्यसर्वसिद्धत्वात्तेषामधनत्वंअस्वातन्त्र्याभिप्रायकमितिवाच्यंस्त्रीपु
त्रवत्दासस्यापितुल्ययुक्त्याप्रसादलब्धधनेस्वातंत्र्यात्तेनैववैदिककर्म्मनिर्वाहात् नचयत्नेसमधि
गच्छंतीत्यनेनअर्जनबोधनात् अर्जनस्यस्वत्वफलकव्यापाररूपत्वात् एवंस्वार्जितधनेस्वत्वंसिद्धमि
तिवाच्यंतेषांस्वत्वस्यपत्न्यादेः स्वत्वंजनयित्वानाशोअपिक्षत्यभावात्तेषांस्वम्वत्वफलकव्यापारे
णपत्न्यादेःस्वत्वंभवतीत्यपिवक्तुंशक्यत्वाच्च उच्यतेप्राप्तंशिल्पैस्तु यद्वित्तंप्रीत्याचैवयदन्यतः।।भ
र्तुःस्वाम्यंभवेत्तत्रशेषंतुस्त्रीधनंस्मृतमितिकात्यायनवचनात् परिभाषितस्त्रीधनातिरिक्तेभर्तुःस्वाम्यं
वोधितंनतुभर्तुरेवस्वाम्यंतज्जीवतुस्वामिसम्बन्धाल्लब्धत्वात् तत्परतन्त्रमेवएवंचत्रयएवधनाःस्म
ताइतिअस्वतन्त्रधनाइत्यर्थः नह्यधनास्त्रीइतियथाश्रुतंवक्तुंशक्यतेतस्याःस्त्रीधनस्वत्वेनप
तिधनेस्वाम्येनचधनसम्बन्धाभाववाधात् अतएवपित्र्यधनानुपश्लेषेणजीवत्पितृकेणार्जितेइतरे
षांपुत्राणामनंशित्वंस्मार्त्तादौरुक्तंसंगच्छते एवंचपत्न्याउपरमेसत्यपिपुत्रादौशिल्पार्जितादौतद्ध
नेपत्युरेवाधिकारः ननुपुत्रादेस्तस्यांजीवन्त्यामपितद्धनेतत्स्वामित्वात् ननुपेदन्तिदंपत्योर्मध्य
गंधनमितिवचनात् जीवत्पतिधनेपत्न्याःस्वत्वात् पत्युर्मरणानन्तरंपतिसमशीलस्वत्वंपुत्रादेः
पत्न्याःस्वत्वात् पत्युर्मरणानंतरंपतिसमशीलस्वत्वंपुत्रादेःपत्न्याश्चतदेवस्वत्वंतिष्ठतीतिन
न्मतेऽत्रापितद्वत् पत्न्यामरणेपत्नीधनेतत्समशीलंपुत्रादिस्वत्वंभवतुनचेष्टापत्तिःस्त्रीधनए
वपुत्रादीनांस्वत्वबोधनात् स्त्रियाएतादृशधनेपुत्रादेःस्वत्वस्यकेनाप्यनुक्तत्वादितिचेत् स्त्रिया
एतादृशधनेपुत्रादेरधिकारस्यमुनिभिरनुक्तत्वेनकस्यस्यादित्याकांक्षायांतत्स्वामिनः
।पत्युरेवाधिकारः आदौभर्तुर्मरणेपत्नीसन्ततेरेवसम्बन्धसन्निकर्षादधिकारःयौक्तिकः
एवंपतिधनेविवाहमात्राम्नायमानस्वत्वस्यपत्न्याउपरमादुपरमेपतिसंततेरेवाधिकारः दा
यादादूर्ध्वमाप्नुयुरितिवक्ष्यमाणवचनान्तुचैतत् संक्रांतधनमात्रविषयकमितिवाच्यंसम्बंध
प्रयुक्तस्वत्ववद्धनविषयकत्वात्तद्वचनस्येति संक्षेपइत्याहुः मिश्रास्तुपत्न्यधिकरणेपतिध
नेपत्न्याअपिस्वत्वमुक्तमितितस्याअपितर्हिपत्न्यासहविभागोभवेत् यदिश्राद्धस्तुविभागो
यदिश्राद्धस्तुनिषेधोनस्यादितिचेन्न अधनास्त्रयएवैतेभार्यादासस्तथासुतः।।इत्यनेनत
स्याअधनत्वोक्तेरित्यवेहि पत्न्यधिकरणंलिप्स्यामात्रेसहत्वेनाधिकारसिद्धौनत्वधिकरणेनयो
षिदधनत्ववचनवाध तस्यन्यायत्वेनवचनवोधकत्वात् विभागस्तुदंपत्योःपत्न्यःकार्य्याःस
मांशिकाइतिवचनादितिरत्नाकरः इत्याहुःअत्रविनापिपुत्रविभागंकेवलयापत्न्यास्वामि
नोभागोगृह्यतांतुल्याधिकारित्वादितिपूर्वपक्षयितुराशयःविभागस्तुविनापिस्वत्वंपु
त्रस्यामिवपत्न्याअपीतिरत्नाकराशयवर्णनंतेषांइतिअत्रकेशांचिदाक्षेपःभार्यायाअ

(श्लोकः ३०

धनत्वं वाधितमेव तस्याः स्त्रीधनववत्वात् अतो अधनाइत्यनेन धनसम्बंधशून्यत्वं नविवक्षितं किंतु
तदज्ञानात् पतिस्वत्वं वोधयति यत्ते समधिगच्छन्तीति मन्वेकवाक्यत्वात् अत्र च नार्जनभवं स्वत्वं किं
तु सम्बन्धभवं यदि च अधनाइत्यस्य स्वार्जित धने ऽस्वतंत्रा इति स्वार्जित धने सम्बंधशून्या इति वार्थः
तदा तु पति धने पत्नी स्वत्वं बाधितमेव इत्यधिकरणे संकोचे मानाभावः स्मार्तास्तु आपस्तम्बोक्त वि
भागाभावः सामान्यप्राप्तः तेन च पुत्रभ्रात्रादिवत् पत्न्याः स्वातन्त्र्येण विभाग ग्राहित्वं नास्तीति भावः
लभ्यते ॥ याज्ञवल्कीय विशेषशास्त्रेण च तं वाधित्वा पुत्राणां विभाग करणकाले पत्न्या विभागो वो
ध्यते इत्याशेरते अत्र च विभाग निषेधस्य विभागप्रशक्तिमंतरेणासंभवात् विभाग प्रशक्त्यर्थं प
ति धने पत्न्याः स्वत्वं स्वीकुर्वन्ति च तदपि दृढं विवेचनीयं एवं सति एकपुत्राया मातुरपि पुत्रात् ।
स्वातंत्र्येण विभागग्राहित्वं स्यात् यदि च पत्यौ मृते तद्धने पुत्रवत्याः स्वत्वं नास्तीति कुतो विभाग प्रसंग
इत्यंगीक्रियते तदा तु न दोष इति अपरे तु आपस्तम्बोक्त वचनस्यायमर्थः यथा दंपत्योः पुण्य
कर्मादौ द्रव्यपरिग्रहे च विभागो न विद्यते इदमस्य द्रव्यं पत्न्या न इत्यादि विशेषो न विद्यते इति या
वत् विभाग शब्देन धनाधिगत विभागो न वोध्यते किंतु आत्मगत विभाग एव तदभावश्चारोप्यते श
रीरार्द्धं स्मृता जाया इत्यादि वचनैकवाक्यत्वात् एवं चास्या धनादौ सर्वत्रैवाधिकारः स्त्रीधने तु
विशेषवचनाद्भर्तुरनधिकारः अस्याः पुत्रविभागकाले ऽंशोपि स्त्रीधन भिन्नत्वात् उभयस्वा
मिक एव परन्तु तत्र अस्याः किंचितु स्वातंत्र्यं कल्पनीयमनुभवात् निर्वृत्त्यर्थमेव विभागदानं च
न हि या आत्मस्वरूपा सापि कदाचितु वस्तुतो भिद्यते इत्यभिनवः पन्थाः विज्ञानेश्वर मतमालो
कयतीत्याहुः आपस्तम्बेन द्रव्यसंग्रहे पि विभागनिषेधात् जायापत्योर्विभागो नांगीक्रियते
एव यच्च याज्ञवल्क्योक्तमंशाकरणं तत् पुत्राणां स्वपैतृक धने नियत समान पक्षे पत्नी सम्बंधांशग्रहण
पर्य्यवसितमेव एवं च दंपत्योरित्यत्र अविभक्त इति स्वरूप सदेव विशेषणमिति मंतव्यमित्यपि व्याकु
र्वते इति संक्षेपः ॥ वृहस्पतिः ॥ साहसं स्थावरं न्यासः प्राग्विभागश्च देहिनां अनुमानेन विज्ञे
यं न स्यातां यत्र साक्षिणौ वलानुवंध व्याघात होढं साहसभावकं अस्य भोगः स्थावरस्य विभा
गस्य पृथग्धनं पृथगायव्ययधनं कुषीदं च परस्परं वणिक्पथं च ये कुर्युस्ते विभक्ता न संशयः ।सा
हसादि चतुष्टये यदि पत्रं साक्षी च प्रमाणं नास्ति तदा अनुमानेन विज्ञानं तत्र साहसानुमान माह
वलानुवंध इत्यादि वलस्य मारणाद्युपदायभूतस्य अनुवंधः संग्रहादिः मारणात् पूर्वं यो मारणा
य उद्योगं चक्रे स मारण रूप साहसकारी इत्यनुमेय एवमन्यत्र व्याघातश्चिह्नं होढं लोप्त्रं एतत्त्र
यं साहसभावकं साहसविज्ञापकं स्थावरस्य भोग एवानुमापकः भोगविशेषस्तु व्यवहार
प्रकरणे अनुसंधेयः न्यासेनुमापकं पूर्वोक्तं पुनर्न्यासादिकं वोध्यं विभागे ऽनुमापकं पृथगध
नं एतच्च उपलक्षणं कृत्वा स्वयमेव व्याकरोति पृथगायेत्यादि ये पृथगायव्ययधनाः पृथगर्जयन्ति
पृथग्दानं कुर्वन्ति पृथगधनन्यासस्थापनादिकं कुर्वंति ते विभक्ताः एवं ये परस्परं कुसीदं ऋण
दानग्रहणे कुर्वंति एवं वणिक्पथं परस्परं क्रयविक्रयौ कुर्वन्ति ते विभक्ताः एतत्सर्वं पैतृकादि १२७

श्लोकः ३३

धनेयदिएकपाकेनवसन्तएवएतादृश्यानिकर्म्माणिपैतृकधनादेवकुर्वन्तितेषामविभ
क्तत्वमंगीकृतमतोवणिक्पथादीनांविभागनिर्णायकत्वंमाभूदितिचेत् अन्यपार्थक्यंवि
नाविभक्तादपिपैत्रिक्धनात् अर्जितंसर्वेषामेवभवेदितिअन्नपार्थक्यस्यैवपूर्वं विभाग प
दार्थत्वकथनात् ननुयेनियमपूर्वकंअन्नपाकमविभज्यैवपृथक् वणिक्पथादीनिकुर्वन्ति
तेषांविभागसंदेहतु ताद्वणिक्पथोर्जितधनएवविवादउपतिष्ठतेतत्रकाव्यवस्थाइतिचेत्॥
परस्परं दानग्रहणाभ्यां तत्वमवधारयेत् तत्रचादृष्टार्थककर्मणः फलबाहुल्यापेक्षयापव
क्रियमाणत्वात् एवंलोकाश्च तत्रजानन्तिइमेनियमपूर्वकं अन्नंविभक्तवन्तोनवेतित्रवंग्रामी
णाश्चतेभ्यःपृथगेवकिंग्रामदेयभोज्यादिकं ददतिइत्यतोपितत्वावधारणंभवेत् एववर्षकृ
त्यलक्ष्म्यादिदेवतापूजादितोपितत्वनिर्णयोभवतीतिदिक्अत्रजीमूतवाहनः एवमादिका
एकैकापिक्रियापरस्परविभक्तानामावसंभवति तयाविभागानुमानंविद्वद्भिरनुसंधेयं न
चतुयेष्वमेताः क्रियाइति एततु श्लोकेनवनामुपादानात् मिलितानामेवगमकत्वमितिवाच्यं
न्याय्यमूलत्वात्वचनानां एकैकस्यापिचन्यायसाम्यात् नस्यातां यत्र साक्षिणावित्यनेनपत्र
साक्षिणोरभावेऽनुमानमनुसरणीयमित्याह ॥०॥ ॥०॥ विवादभंगार्णवेदायभाग
द्वीपेअत्युज्वल सूर्य्यकान्तरत्नंषष्ठं॥० ॥ ॥०॥अथविभक्तकृत्यं॥नारदः॥यद्येकजाता
बहवःपृथक्धर्म्माः पृथक्क्रियाः पृथक्कर्म्मगुणोपेतानचेत् कृत्येषुसंगताः एकजाता
अपिअनेकेयदिकृत्येषुअविभक्तत्वसाधककर्म्मसुनसंगताः नमिलिताविभक्ताइत्यर्थः मि
श्रास्तुविभक्ताइत्यर्थःमिश्रास्तुविभक्ताश्चेन्वसंसृष्टाइत्याहुः तदा। पृथक्धर्माःपृथग्वैश्व
देवादिधर्मकाःपृथक् ॥क्रियाःपृथक् कुसीदादिव्यापारावंतः सम्यगित्यादिअत्रापिपृथ
गित्यन्वेतिअव्ययत्वेननिर्विभक्तिकत्वात् तथाच पृथक्कर्म्माणः पृथक् परिपालपालना
दिकर्म्माणः पृथग्गुणाःपृथक्शुश्रूषादिगुणवन्तः तथाचएतत् सर्वंपृथक्कर्तुमर्ह
न्तीत्यर्थःइतिमिश्रमतं सम्यक्कर्म्मगुणोपेताइतिकर्तृविशेषणं तथाचसम्यक्कर्म्मगु
णैरेवपृथग्वैश्वदेवादिकरणं मूर्खाणामलसानांतुममैवभ्रात्रातत्क्रियतेइतिकृत्वातन्नि
वर्त्तनमितिभावः इत्यन्येविभागफलमाहस्वभागान् यदितेदद्युर्विक्रीणीयुरथापिवा।कुर्यु
र्यथेष्टतत्सर्वंइशास्तेस्वधनस्यवै इतिविवादरत्नाकरविवादचिंतामणी एतन्मतद्वये
अविभक्तत्वादशायांकेनचित् भ्रात्रास्वभागयोग्यद्रव्यदानंनोचितंभ्रात्रन्तराणामनुमतेस्तु
विभाग एवसिद्ध्यतीतिस्फुटं तथायदिकश्चित्तथाकुर्यात्तदासिद्ध्यत्येवदानक्रियादिकंस्वा
मिकृतत्वात् साधारणद्रव्यस्यचादत्तगणेऽपठितत्वात्ऽदेयगणेपाठात्किंतुसोऽंशः सर्वेषां
यातीतिअवशिष्टेषुभ्रावंतरभागेष्वपिपुनरंशंस प्राप्नुयादितिनाशंकनीयं धर्म्मार्थंप्रतिदत्तं
यदृणंस्वनियोजितं इतिवचनव्याख्यानेभ्रात्रंतरानुमतिंविनास्वकार्यमुद्दिश्ययेनयद्दत्तं

श्लोकैः२५